मन्त्रार्थदीपिका विमर्शः



19940

डॉ. धीरेन्द्र झा

ग्रन्थपरिचयः

इह हि विद् धातोः करणे धञि निष्पन्नो वेद शब्दः वेत्ति सृष्टि तत्त्वम् अनेनेति वेद शब्द सामान्योऽर्थः। अथापि वेद्यन्ते ज्ञाप्यन्ते धर्मार्थकाममोक्षादयः येनासौ वेदः। तथा च-"इष्टप्राप्त्यनिष्टपरिहारादि लौकिकाऽलौकिकोपायो येन वेद्यतेऽसौ ज्ञानराशिर्वेदः। वेद शब्दार्थ विचारः (विद+घञ्)- वेदः विष्णु। वेद पदार्थः-वेदो वेद विदव्यङ्गो वेदाङ्गो वेदवित्कविः इति विष्णुसहस्रनामम्निवृत्तम् इति मेदिनी। यज्ञाङ्गम् इति नानार्थरत्नमाला। मीनशरीरावच्छेदेन भगवद्वाक्यमिति न्याय शास्त्रम्। धर्मब्रह्म-ज्ञापकशास्त्रम् इति पुराणम्। तात्पर्यायः श्रुतिः आम्नायः इत्यमरः। छन्दः ब्रह्मनिगमः इति शब्दरत्नावली। महामुनि पाणिनिना उञ्छादिगणे वृषादिगणे च वेदशब्दों द्विधा पठितः। तत्र उञ्छादिगणपठित वेदशब्दः करणेऽर्थे अन्तोदात्तः। वृषादिगणपठितश्चाद्युदात्तः विद्वांसः वेदस्यानेकधा व्युत्पत्तयः कृतवन्तः यथा-"वेदशब्दों द्विधा पठितः। य तत्र उञ्छादिगणपठित वेदशब्दः करणेऽर्थे अन्तोदात्तः। वृषादिगणपठितश्चाद्युदात्तः। विद्वांसः वेदस्यानेकथा व्युत्पत्तयः कृतवन्तः यथा-"वेदेन वै देवा असुराणां वित्तम् वेदमविन्दन्त तद् वेदस्य वेदत्वम्। "वैदिर्देवेभ्यो निलायत तां वेदेनान्वविन्दन वेदेन विविदुः वेदिम्पृथिवीम्। महर्षि, दयान्दस्वामिभिः ऋग्वेद भाष्यभूमिकायां वेदश्चतुर्धा विभक्तः-विदन्ति जानन्ति विद्यन्ते भवन्ति विदन्ति अथवा विदन्ते लभन्ते, विचारयन्ति सर्वे मनुष्यः सर्वाः सत्यविद्या; यैर्येषु वा ते वेदाः।

ISBN - 978-93-87199-42-2

9 7 8 9 3 8 7 1 9 9 4 2 2

ISBN - 978-93-87199-42-2

मूल्य : 650.00 रुपये

19940

[illegible]

मन्त्रार्थदीपिका विमर्शः

डॉ० धीरेन्द्र झा

2018

कला प्रकाशन

बी. 33/33 ए - 1, न्यू साकेत कालोनी,
बी0 एच0 यू0, वाराणसी-5

प्रकाशक :

कला प्रकाशन

बी. 33/33 ए - 1, न्यू सँकेत कालोनी,

बी० एच० यू०, वाराणसी-5

दूरभाष : 0542-2310682

Email : kalaprakashanvns@yahoo.in

© लेखक द्वारा सर्वाधिकार सुरक्षित

प्रस्तुत पुस्तक में दिये गये सभी तथ्य लेखक के हैं, प्रकाशक का इससे कोई सम्बन्ध नहीं है। विवाद की स्थिति में लेखक स्वयं जिम्मेदार होगा।

डॉ० धीरेन्द्र झा

प्रथम संस्करण : 2018

ISBN : 978-93-87199-42-2

मूल्य : **650.00/-** रुपये

कम्प्यूटर अक्षर संरचना :

कला कम्प्यूटर मीडिया

बी. 33/33 ए - 1, न्यू साकेत कालोनी,

बी० एच० यू०, वाराणसी-5

दूरभाष : 0542-2310682

मुद्रक :

महावीर प्रेस

भेलूपुरा, वाराणसी

समर्पणम्



अमृतार्णव मध्यस्थं इन्द्रनील मणिप्रभो शंख चक्र गदा पद्मधारिणं दैत्यसूदनम् ।
समस्त काम दंश्याम योगमाया समावृतं नाना विपत्ति हरणं वन्देऽहं मधुसूदनम् ।।
।। जयतु मंदार मधुसूदनम् ।।

भूमिका

वेद परिचयः—इह हि विद् धातोः करणे धञि निष्पन्नो वेद शब्दः वेत्ति सृष्टि तत्त्वम् अनेनेति वेद शब्द सामान्योऽर्थः । अथापि वेद्यन्ते ज्ञाप्यन्ते धर्मार्थकाममोक्षादयः येनासौ वेदः। तथा च–"इष्टप्राप्त्यनिष्टपरिहारादि लौकिकाऽलौकिकोपायो येन वेद्यतेऽसौ ज्ञानराशिर्वेदः। वेद शब्दार्थ विचारः (विद + घञ्)-वेदः विष्णुः। वेद पदार्थः–वेदो वेद विदव्यङ्गो वेदाङ्गो वेदवित्कविः इति विष्णुसहस्रनामम्निवृत्तम् इति मेदिनी। यज्ञाङ्गम् इति नानार्थरत्नमाला। मीनशरीरावच्छेदेन भगवद्वाक्यमिति न्याय शास्त्रम् । धर्मब्रह्म-ज्ञापकशास्त्रम् इति पुराणम्। तात्पर्यायः श्रुतिः आम्नायः इत्यमरः । छन्दः ब्रह्मनिगमः इति शब्दरत्नावली। महामुनि पाणिनिना उञ्छादिगणे वृषादिगणे च वेदशब्दों द्विधा पठितः। तत्र उञ्छादिगणपठित वेदशब्दः करणेऽर्थे अन्तोदात्तः। वृषादिगणपठितश्चाद्युदात्तः विद्वांसः वेदस्यानेकधा व्युत्पत्तयः कृतवन्तः यथा–"वेदशब्दों द्विधा पठितः । य तत्र उञ्छादिगणपठित वेदशब्दः करणेऽर्थे अन्तोदात्तः । वृषादिगणपठितश्चाद्युदात्तः । विद्वांसः वेदस्यानेकधा व्युत्पत्तयः कृतवन्तः यथा–"वेदेन वै देवा असुराणां वित्तम् वेदमविन्दन्त तद् वेदस्य वेदत्वम् । "वैदिर्देवेभ्यो निलायत तां वेदेनान्वविन्दन वेदेन विविदुः वेदिम्पृथिवीम् । महर्षि, दयान्दस्वामिभिः ऋग्वेद भाष्यभूमिकायां वेदश्चतुर्धा विभक्तः-विदन्ति जानन्ति विद्यन्ते भवन्ति विदन्ति अथवा विदन्ते लभन्ते, विचारयन्ति सर्वे मनुष्यः सर्वाः सत्यविद्या; यैर्येषु वा ते वेदाः ।

अनेन विद ज्ञाने विद् सत्तायां विदल्हलाभे विद् विचारणे एतेषां धातूनां करणेऽर्थेधिकरणेऽर्थे च वेदशब्दो निष्पन्नः। निरुक्ते यास्काचार्येर्लिखितम्–"साक्षात्कृतधर्म्माण ऋषयो बभूवुः। ते अवरेभ्योऽसाक्षात्कृतधर्मेभ्यः उपदेशेन मन्त्रान् सम्प्रादुः।।" अपि ब्राह्मणग्रन्थे–"तेभ्यस्तप्तेभ्यस्त्रयो वेदा अजायन्त अग्नेर्ऋग्वेदः वायोर्यजुर्वेदः सूर्यात् सामवेदः। मनुनापि भणितम्–

"अग्निवायुरविभ्यस्तु त्रयम्ब्रह्म सनातनम् ।
दुदोह यज्ञ सिद्ध्यर्थमृग्यजुः सामलक्षणम् ।।"

वेदलक्षणम्—वेदस्य किं लक्षणमित्यपेक्षायाम्–"मन्त्रब्राह्मणयोर्वेदनामधेयम्" इति प्रतिजानात्यापस्तम्बः। "मन्त्रब्राह्मणमित्याहु" इति बौधायनोऽपि । केचनाऽऽधुनिकास्तु मन्त्रभागमात्रस्यैव वेदत्वं ब्राह्मणभागस्तु तदीय व्याख्यानमित्यङ्गीकुर्वन्ति, तथा सति निरुक्तादिवैदिकग्रन्थव्याकोपो भवति। तस्मात् प्राचीनवेदलक्षणमेव ज्यायः । तत्र पादैश्छन्दाभिश्च बद्धा ऋच इति लक्षणात् । अनियताक्षराणि, अपादबद्धानि यजूंषीति। अनियताक्षरपादाऽवसानं यजुः" लक्षणात् । प्रगीता मन्त्रा; सामानीति "लब्धगेयस्वरं साम" इति लक्षणात् । छन्दोबद्धा ऋग् विशेषाएवाऽथर्वाङ्गिरस इति प्रोच्यते ।

वेदविभाग—पूर्वस्मिन् समये वेदस्य विभागो नासीत् । सर्वे मन्त्राः ब्रह्मणानि, अनुब्राह्मणानि च मिलितान्यासन् । तदानीन्तनाऽलौकिक-प्रतिभाजुषामृषीणां कृते विभागस्यावश्यकतापि नाऽनुभूयतेस्म। परं परकालिक-मानव-मानस-शक्तिह्रासं सम्भाव्य भगवान् वेदव्यासः सवनसौविध्य-विधित्सया तदेव श्रुतिजातं चतुर्द्धा विभक्तवान् । विभागोऽयं पाठक्रममनुसरतैव कृतः । प्रथमः ऋग्वेदः, द्वितीयः यजुर्वेदः, तृतीयः सामवेद चतुर्थोऽथर्ववेदः। पाठक्रमस्य प्रमाणं यदा—"ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं-चतुर्थकम्" इति। (छान्दोग्योपनिषत् 7/1/2)। "ऋग्यजुः सामथर्वाणश्च-त्वारो वेदाः साङ्गाः सशाखाश्चत्वारः पादा भवन्ति" (इति (नृ. ता. उ. 1/2) ऋग्वेदो यजुर्वेदः सामवेद आथर्वणः (मुण्डको. 12 ख. 1 म. 5) इति नियमतो मन्त्राणां छान्दोपाठाऽनुसारेण पठनप्राणाल्यानुकूल्येनैव वेदानां चतुष्टयं विद्यते प्रतिपाद्यविषयभेदो हि तत्राऽकिञ्चत्करः प्रतिभाति। विषयबुद्ध्या तु कर्मोपासनाज्ञानभेदस्त्रयो भेदाः सन्ति। सामवेदे हि (78) केवलं गानस्वरेण गीयमानतया ते साममन्त्राः कथ्यन्ते। याज्ञकर्म्मणि तद्विरहितास्ते ऋङ्मन्त्राः भवन्ति यदि गेयस्वरस्वरूपता ततोऽपयनीयेत तदा तु ऋग्वेदस्यैव शाखैका सामवेदोऽपि स्यात् । सचाऽयं चतुर्द्धविभक्तो वेदो वेदव्यासपरनाम्ना कृष्णद्वैपायनेन सम्पादितः। अनेनैव हेतुना स वेदव्यास इति संज्ञामलक्षत् यथा—'पराशरात् सत्यवत्यामंशांशकलया प्रभुः। अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् । (भा. 12/6/49)। तत्र होतुः कृते ऋग्वेदः, अध्वर्यवे यजुर्वेदः, उद्गात्रे सामवेदः, ब्राह्मणे च अथर्ववेदः । यद्यपि "यद् वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तत् यदृचा तद् दृढम्" (तै. सं. 6/5/10/30) इत्यादि प्रमाणैर्यज्ञसाधनेऽपि ऋग्वेदस्य प्राधान्यं प्रदर्शितम्, तथापि उक्त श्रुतिमर्थवादापरतया स्वीकृत्य याज्ञ-कर्मणि यजुर्वेदस्यैव प्राधान्यं सर्वजनीनसिद्धान्तसिद्धतयाऽङ्गीकृतम् । एतत् कारणमिदमेव यत्-यज्ञाऽनुष्ठाने वेदार्थज्ञानस्यैवोत्कृष्टा कारणत्वं विद्यते। अथ चाऽर्थविषये यजुर्वेदस्यैव प्रधानतास्ति । यथा—ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु। ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उत्वः'।। (ऋ. सं. 8/24) अस्या ऋचोऽयम्भावः-होतृनामकः एक ऋत्विक् यज्ञे क्रियाया यस्य द्रव्यस्य चस्या देवतायाश्च बोधिकाया ऋचः आवश्यकतां पश्यति तत्संकलनं कुरुते। उद्गातृनामक एक ऋत्विक् गायत्रशब्दाऽभिधेयं स्तोत्रं प्रगीतमन्त्रसाध्य-गुणिनिष्ठगुणाभिधानरूपम् (साम) शक्वरीशब्दभिधेयासु ऋक्षु गायति। ब्रह्मानामकं एक ऋत्विक् प्रस्तुते प्रणयादि कर्म्मणि विद्या (न्यूनांतिरिक्तताज्ञानम्) वदति, उपदिशति। तं च ब्रह्मा वेदत्रयोक्तसकलकर्म्माऽभिज्ञः। तत्र होत्रादयस्त्रयो मिलित्वा वाग्रूपं यज्ञमार्गं संस्करोति। ब्रह्मात्वेकल एव मनोरूपं यज्ञमार्गं कृत्स्नमपि संस्करोति। तत्र एकोऽध्वर्युनामक ऋत्विक् यज्ञस्य स्वरूपं निष्पादयति। यज्ञस्य मात्रामित्यत्र मीयते, निर्मीयत इति मात्रा शरीरमित्यर्थात् । एतच्च गोपथब्राह्मणे स्पष्टीकृतं यथा—"प्रजापतिर्यज्ञमतनुत ऋचैव हौत्रमकरोत्। यजुषाऽध्वर्य्यत्वम्, साम्नौद्गात्रम्, अथर्वाङ्गिरोभिर्ब्रह्मात्वम् स वा एष त्रिभिर्वेदैः यज्ञस्यान्तरः पक्षः संस्क्रियते। मनसैव ब्रह्मा यज्ञस्यान्तरं पक्षं संस्करोतीति। यज्ञकर्मणि चत्वारि प्रधानकृत्यानि भवन्ति यदर्थं

चतुर्णा ब्रह्मणानामावश्यकता भवति। मन्त्रानुच्चार्य्य यज्ञियदेवाऽह्वानकार्यं हौत्रं कर्म निपद्यते। यस्य ब्राह्मणस्याधिकारे कार्यमिदं भवति स 'होता' इति नाम्ना प्रसिद्धः। हौत्रकर्मार्थमेव ऋक्संहितायाः संकलन व्यासदेव; कृतवान् । तथा तत्रैव होमादिसकलावश्यक-कर्मसम्पादक; ब्राह्मण "अध्वर्युः" इत्याख्यया सम्बोधयन्ति। अतएव यजुर्वेदसंहितायाः सम्बन्धोऽध्वर्युणा सम्पद्यते। यतः 'अर्ध्वर्युरध्वरयुध्वरं युनक्त-ध्वरस्य नेताध्वरं कामयते इति यास्को निरुवाच। यज्ञे देवताप्रासादानाय गानं भवति। तत्र सामगायकः, पुरोहितविशेषः "उद्गाता" इति कथयन्ति जनाः । तत्कार्यमौद्गात्रं भणन्ति। उद्गातुः कार्यसिद्धये गीतिमयीं सामसंहिता जग्रन्थ परमकारुणिको बादरायणिः । यज्ञे एकस्य विशिष्टस्य ब्राह्मणस्यावश्यकता भवति, यः पूर्वोक्तसकलत्विक् कार्यनिरीक्षणं कुर्यात् । तेषां कार्यत्रुटिञ्च तेभ्य; सूचयित्वा परिमार्जयेत् । एतन्महत्त्वपूर्णकार्य-सम्पादको ब्राह्मणो 'ब्रह्मा' इति कथ्यते। ब्रह्मणः कृते चतुर्णां वेदानामं ज्ञानं नितान्तमपेक्षितम् । यतः यतजज्ञानमन्तरा ब्रह्मा यज्ञान्तरायं दूरीकर्त्तुं नाऽलं भवितुमर्हति। अथर्ववेदे तादृशानां मंत्राणां सम्बन्धोऽस्ति ये रक्षोघ्ना आम्नायन्त। अतएव अथर्ववेदेन साक ब्रह्मणः सम्पर्कोऽभिधीयते। यतोहि 'ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हतीति श्रूयते।' इत्थं यज्ञप्रक्रियाविस्ताराय कृपालुः कृष्णद्वैपायनोमुनिः वेदं विभक्तवान । यथा–"चातुर्होत्रं कर्मशुद्धं प्रजानां वीक्ष्य वैदिकम् । व्यदधात् यज्ञसन्तत्यै वेदमेकं चतुर्विधम्"।।) (भा. स्क. 1 अ. 4) वेदविभाजकत्वादेव तं मुनिं जनाः "वेदव्यासः" इतीरयन्ति। इत्थं संहिताचतुष्टयं संकलय्य भगवान् व्यासः चतुरः स्वशिष्यानध्यापयामास। ते च क्रमशः-"तत्रऋग्वेदधरः पैल; सामगो जैमिनिमुनिः वैशम्पायन एवैको निष्णतो यजुषामुत। अथर्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनि। इतिहासपुराणानां पिता में रोमहर्षणः।। एवं शिष्यपरम्परया वेदान्तमध्ययनं प्रवृधे। शाखाभेदेऽपि शिष्यभेद एवं प्रधानकारणम् । यथा अध्ययनसम्प्रदायप्रवर्त्तकानामेषां शाकलीदानामचार्य्याणां प्रवचनभेदः शाखा-भेदव्यवहारे कारणम् । यथा च याज्ञवल्क्यस्य माध्यन्दिनादयः पञ्चदशशिष्या वभुवुः। तेषु माध्यन्दिनेन या संहिताः स्वशिष्येभ्योऽध्यापनेन प्रदत्ता सा माध्यन्दिनी शाखा निगद्यते। कण्वेनाऽध्यापिता काण्वशाखोच्यते। एवमेव वेदवाक्येषु यः पाठभेदः उच्चारणभेदा वा जातस्तमेव भेदमाश्रित्य शाखापरम्परा प्रवृत्ता। यजुर्वेदो हि शुक्लकृष्णभेदेनद्विविधागण्यते। अयमपि भेदः शाखाभेदवदेव गणयितव्यः । वेदानां शाखास्वपि संख्याभेदो निभाल्यते। यथा–

	मुक्तिकोपनिषदि,	पातञ्जल महाभाष्ये,	अहिर्बुध्न संहितायाम्
ऋग्वेदशाखाः	21	21	21
सामशाखाः	1000	1000	1000
यजुःशाखाः	109	101	'101

अथर्वशाखाः	50	9	5
	–	–	–
संकलनया	1180	1131	1127

व्यासदेवेनाध्यापिताः शिष्याः स्वशिष्यानध्यापमामासुः । ते च स्वशिष्यान् इत्थमध्यापयतां तत्तद्ऋषीणामुच्चारणभेदात् पाठभेदाच्च शाखाभेदः शनैर्वृद्धिमानमापद्यत। चरणव्यूहनामके ग्रन्थे ऋग्वेदस्य शाखानां नामोपलभ्यते। यथा–1. शाकलम्, 2. बाष्कलम्, 3. आश्वलायनम्, शाङ्खायनम्, 5. माण्डुकायनञ्चेति। कुत्रचन एषां पञ्चानां नामभेदोऽपि पठ्यते। यथा–"शिशिरो वाष्कल; साङ्ख्यो वात्स्या चैवाऽश्वलायनः। पञ्चैते शाकलाः शिष्याः शाखाभेदप्रवर्त्तकाः।।" अद्यत्वे तु ऋग्वेदस्य आश्वलायनशाखैव समुपलभ्यते। मन्ये-यावत्य; शाखा भवेयुस्तावत्यः संहिताः तावन्ति ब्राह्मणानि, आरण्यकानि, उपनिषदः, श्रौतसूत्राणि, गृह्यसूत्राणि, अपि भवेयुः परं कालवशेनाद्य महत् परिवर्तनं जातम् । यजुर्वेद शाखासंख्या पातञ्जलमहाभाष्ये एकशतमस्ति, परं चरणव्यूहे षडशीतिरेव पठ्यन्ते। अद्यत्वे यजुर्वेदस्यैव शाखा बाहुल्येन मिलन्ति। तास्वपि माध्यन्दिनशाखाया एव प्रचारो विलोक्यते। सहस्त्रशाखावन्तः सामवेदस्य तिस्रः एव शाखा मिलन्ति। यथा-कौथुम-राणायनीयजैमिनीयाः। अद्यत्वे भारते सामवेदाध्ययने ब्राह्मणानां रुचिर्नैवोपलभ्यते। अथर्ववेदस्य नवशाखासु साम्प्रतं केवलं द्वे एव शाखे मिलतः वेदानां मन्त्रसंख्यासु तज्ज्ञानां नस्ति मतैक्यम् । ऋग्वेदिक 10580 मन्त्रसंख्यां वदन्ति, केचन 10466, केऽपि 10404, अन्ये 10480, चरणव्यूहादिमतेन 10440, मन्त्रसंख्यां दृश्यते। एवमथर्ववेदेऽपि एके 6015, अपरेतु 12300 मन्त्रसंख्यामुद्गिरन्ति। ऋग्वेदस्य ऐतरेयम्, कौषीतकी चेति ब्राह्मणद्वयम्। यजुर्वेदस्य शतपथब्राह्मणम् । सामवेदस्य ताण्ड्यं, षडविंशं ब्राह्मणं दैवतम्, आर्षेयम्, सामविधानम्, संहितोपनिषद्, वंशजैमिनी इत्यष्टौ ब्राह्मणानि सन्ति। पाठप्रणाल्या संहिताया द्वौ भेदो स्तः । प्रथमा निर्भुजसंहिता द्वितीया प्रतृणसंहिता। यत्र मूलमविकलं पठ्यते सा निर्भुजसंहिता, यत्र तु मूलं विकृतरूपेण पठ्यते सा प्रतृणसंहितोच्यते। प्रतृणसंहितायाः पद-क्रम-घन-जटा-माला-लेखा-ध्वज-दण्ड-रथादयोऽनेके भेदाः सन्ति। पदपाठे पदच्छेदेस्तिष्ठन्ति। क्रमपाठे प्रत्येकशब्दानां वारद्वयं, जटापाठे वारत्रयं समुच्चारणं भवति। क्रमपाठ-प्रभृतीनामिदमेव प्रयोजनमस्ति यद्वेदस्य मूलपाठः सदा शुद्धस्तिष्ठेत्, कुतोऽपि प्रक्षिप्तता न प्रविशेत्। पदक्रमादीनामेव माहात्म्यं विद्यते यदद्यापि वेदे प्रक्षिप्तता कृतास्पदा नाऽभवत् । पुराणादौ तु सा परां कोटिमाटीकते। पदक्रमादीनां विस्तारमालोक्य पूर्वजानामृषीणां महतः परिश्रम धैर्य्यस्य च परिचयः प्राप्यते ।

प्रतिवेदं विषयभेदाः–ऋग्वेदं अष्टावष्टकानि, दशमंडलानि चतुःषष्टिरध्यायाः पञ्चाशीतिरनुवाकाः, अष्टाविंशत्युत्तरसहस्रसम् (1028) मतान्तरे सप्तदशोत्तरसहस्रम् (1017) सूक्तानि, चतुर्विंशत्युत्तरसहस्रद्वयमिताः (2024) वर्गाः, ऊननवत्यधिक-पञ्चशतोत्तरदशसहस्रमिताः

(10589), मतान्तरेअशीत्यधि-कपञ्चशतोत्तरदशसहस्रमिता (10580) मन्त्रा, षड् शित्यष्टशतयुतत्रिपञ्चाशत्सहस्र-तोत्तरकलक्षमिताः (153126) शब्दाः, चतुस्त्रिद्विखख-ख-मितानि (432000) अक्षराणि सन्ति। ऋग्वेदस्योपवेद; स्थापत्य (शिल्प) वेदोस्ति। ऋग्वेदस्यैकविंशतिशाखासु साम्प्रतं द्वे एव लभ्यते। सर्वेषु वेदेषु प्रायः कर्मोपासनाज्ञानकाण्डानि सन्ति। तत्र ऋग्वेदे ज्ञानकाण्डस्यैव प्रधानता विद्यते। अत्र-अग्निमीले पुरोहित यज्ञस्य देवमृत्विजम्' इत्यादि मन्त्रसमूहेन अग्नेरेव प्राधान्येन स्तुतिः प्रयुज्यते। परमेकेश्वरवादयाऽग्न्यादिदेवतापदेन ब्रह्मैवाऽभिधीयते। यतः-'इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः ससुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदन्त्यग्नि यमं मातरिश्वानमाहुः।' इति ऋग्वेदीय मन्त्रे ब्रह्मविवर्तरूपेणैवाऽन्ये देवाः स्वीकृताः । अत एव वेदो ह्येकेश्वरवाद इति सर्ववादिनिर्णीतः पन्थाः । अर्णवयानस्य, वायुयानस्य, बृहन्नालिकादि युद्धास्त्राणां नैकविधानामाग्नेयास्त्राणा बहुप्रकाराणां युद्धविद्यानां वर्णनं समुपलभ्यते। ऋग्वेदस्य द्वितीये पञ्चमे च मण्डले शिल्पकलाया विस्तरवर्णनं मिलति। तत्र सहस्रस्तम्भयुताया अट्टालिकायाः उल्लेखो विद्यते। एतदतिरिक्तं बहुविधानां वयनकार्याणां वाणिज्यानां शिल्पकलानां, धातुद्रव्यनिर्म्माणस्य च तत्र तत्र वर्णन निभाल्यते। वैदिककाले सर्वत्र यातायातकार्य्यायाऽऽर्याणां समीपे यानादेरभावो नासीत् तेषां समीपे द्रुतगामिनो रथाः पोताश्चासन् यैरल्पसमयेनेव स्थले जले व्योमानि च तेषां दविष्ठागमनं सिद्धय्यतिस्म। ऋग्वेदप्रथममण्डलीय सप्तत्रिंशतमसूक्तौ प्रथमा ऋगस्ति यत्-'क्रीलं वः शर्द्धो मारुतमनर्वाणं रथे शुभम् । कण्वा अभिप्रगायत'। अत्राऽयम्भावः-विज्ञानकामा ऋषयः कथयन्ति-हे कण्वगोत्रोत्पन्ना ऋषयः। यथा वाष्पप्रभावादश्वरहितो रथः सर्वत्र गन्तुमर्हेत् तथा भवन्तोऽस्मान् सम्यक् शिक्षयन्त्विति। अनया ऋचा तस्मिन् काले वाष्पयानस्य स्थिति सिध्ययति। अस्मिन्नेव मण्डले सामुद्रिकपोतवर्णन-विषये निम्नलिखिता ऋगस्ति। 'द्विषो नो विश्वतो मुखानि नावेव पारया स नः सिन्धुमिव नावयाति पर्षाः स्वस्तये'। अस्या ऋचोऽर्थः-हे विश्वतोमुखदेव। त्वमस्माकं शत्रून् तथा दूरी कुरू यथा जलायानेन क्षणाद् दूरीक्रियनन्ते। अथास्मत्कल्याणाय जलयानास्मान् समुद्रपारं नय एतद्वर्णनेन प्राचीनकाले समुद्रगामिन पोतस्यास्तित्वं विज्ञायते। महाभारतस्यादिपर्वणि लिखितम् यथा–

ततः प्रवासितो विद्वान् विदुरेण नरस्तदा ।
पार्थानां दर्शयामास मनो मारुतगमिनीम् ।
सर्ववातसहा नाव यन्त्रयुक्तां पताकिनीम् ।
शिवे भागीरथीतीरे नरैर्विश्रम्भिभिः कृताम् ॥

इति वर्णेन जलयानस्यातित्वं समुपलभ्यते। ऋग्वेदे तु-आधुनिकानां विज्ञानामविष्कृतानां समेषां यन्त्राणां संक्षेपतो वर्णनं विलोक्यते। अत उक्तम्भूतं भव्य भविष्यञ्च सर्वं वेदे प्रतिष्ठितम्' इति। ऋग्वेदस्यैकविंशति-ब्राह्मणानि, तावत्य एवोपनिषदः सन्ति। परमस्माकं दुर्भाग्यतया

सम्प्रति ऐतरेयं, कौषातकी चेति ब्राह्मणद्वयमेव सुलभमस्ति। ऐतरेयब्राह्मणे चत्वारिशदध्यायास्तथाऽष्टौ पञ्चिकाः सन्ति। तत्राग्निष्टोमसोमयागगवामयनरात्रिसत्र-प्रमादप्रायश्चित्तग्निहोत्रादीनां विशदवर्णनं विद्यते। वेदोच्चारणे स्वरस्यैव प्रधानता तिष्ठति। स्वरज्ञानमन्तरा मन्त्रोच्चार विपरीतफलप्रकाशक भवति। स्वराणां विशदज्ञानाय प्रतिवेद प्रातिशाख्यमस्ति, यस्याऽध्ययनेन सम्यकस्वरज्ञानं सम्पद्यते। स्वरस्तु द्विविधः-कण्ठस्वरो हस्तस्वरश्चेति। तत्र हस्तस्वरस्य समतया चिह्नानि प्रदर्श्यन्ते। स्वरितस्वरस्य चिह्न–(1) उदाहरण यथा-अग्निमीले अत्र 'ईले, शब्दाद्यक्षरं स्वरितस्वरेण चिह्नितम् । अनुदात्तस्वरस्येदम् (-) चिह्नं भवति। यथा-'अग्निमीले' अत्राग्निशब्दाद्यक्षरमनुदात्तस्वर चिह्नितं वर्त्तते। उदात्तस्वरस्य किमपि चिह्नं नैव भवति। अत्र वेदे तु कणठस्वरस्यैव प्रधानता विद्यते।

यजुर्वेदस्य शुक्लकृष्णत्वेन द्वौ भेदौ वर्तेते। भेदः विषये श्रीमद्भागवते एका वैदिकी कथा मिलति। यथा–

वैशम्पयनशिष्या वै चरकाध्वर्यवोऽभवन् ।
यच्चेरुर्ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतम् ॥
याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन् कियत् ।
चरितेनाऽल्पसराणां चरिष्येऽहं सुदुश्चरम् ॥
इत्युक्तो गुरुप्याह कुपितो याह्यलं त्वया ।
विप्राऽवमन्ताशिष्येण मदधीतं त्याजाश्विति ॥
देवराजसुतः सोऽपिच्छर्दित्वा यजुषां गणम् ।
ततो गतोऽथ मुनयो ददृशुस्तान् यजुगणान् ॥
यजूंषि तित्तिरो भूत्वा तल्लोलुपतयाऽऽददुः ।
तैत्तरीया इति यजुःशाखा आसन् सुपेशलाः ॥
याज्ञवल्क्यस्ततो ब्रह्मन् छन्दाँस्यधिगवेषयत् ।
गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम् ॥
एवं स्तुतः स भगवान् वाजिरूपधरो हरिः ।
यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः ॥

अस्या अयमाशयः-क्रुद्धो वैशम्पायनो याज्ञवल्क्यं प्रत्युवाच मदधीतं त्यजेति। स योगसामर्थ्यान्मूर्तां विद्यां विधायोद्ववाम वान्तानि यजूँषि गृह्णीतेति गुरुक्ता अन्ये वैशम्पायनशिष्यास्तित्तिरयो भूत्वा यजूँष्यभक्षयन्, तानि बुद्धिमालिन्यात् कृष्णानि जातानि। ततो दुःखितो याज्ञवल्क्यः सूर्यमाराध्य अन्यानि शुक्लानि यजूँषि प्राप्तवान्। वाजिरूपधरात् हरेः प्राप्तवाद् वाजसनेयीशाखेति नाम जातम् ।

शुक्लयजुर्वेदे-चत्वारिंशध्यायाः, त्रि-ख-त्रि-मिता (303) अनुवाकाः, एक-नव-सप्त-षष्मिता; (1976) मतान्तरे-एक-नव-सप्त-पंचमिता (1975) मन्त्रः, अष्टाऽष्टाऽष्ट-सप्त-पंचमितानि (88875) अक्षराणि, द्वि-नव-षड्-द्वि-पंचमिताः (29625) शब्दाश्च सन्ति।

कृष्णायुजुर्वेदे–सप्तकाण्डानि, चतुश्चत्वारिंशत प्रपाठकानि, षट् पंचैकमिता; (651) अनुवाकाः द्वयेकनवाऽष्टमिता; (2198) मन्त्राः सन्तिः । विषयविभागः-शुक्लयजुर्वेदे प्रथमाऽध्यायात् द्वितीयाध्यायस्याष्टाविंशतिकण्डिकां यावत् दर्शपौणमासयागस्य विधिरस्ति। ततो द्वितीयाध्यायान्तं यावत् पिण्डपितृयज्ञवर्णनं विद्यते। तृतीयाऽध्यायस्य नवमकण्डिकातः चत्वारिंशत् कण्डिकापर्य्यन्तं-अग्निहोमन्त्राः गदिताः । ततोऽध्यायान्तं चातुर्मास्यमन्त्राः समाम्नाताः। चतुर्थाध्यायमारम्भाष्टमाऽध्यायस्य द्वात्रिंशत्कण्डिकापर्य्यन्तमग्निष्टोममन्त्राः प्रतिपादिताः । अष्टमाध्यायस्य त्रिंशमन्त्रामारभ्य सप्तत्रिंशमन्त्रं यावत् षोडशीयाग उक्तः। ततोध्धध्यायान्तं द्वादशाग्रहणान्ता मन्त्राः कथिताः । नवमाऽध्यायस्य प्रथममन्त्रमारभ्य चतुस्त्रिशत्कण्डिकापर्यन्तं वाजपेययागमन्त्राः समुदीरिताः। नवमऽध्यायस्य पञ्चत्रिंशतमन्त्रमारभ्य दशमाध्यायस्य समाप्तिं यावत् राजसूयमन्त्राः पठिताः । एकादशाऽध्यायामारभ्याष्टाशाध्या-यपर्यन्तमग्निचयन अभिहिताः । चयनप्रकरणे एव षोडशाध्याये शतरुद्रियांहोमो व्याख्यातः। अष्टदशाऽध्याये वसोर्धारा मन्त्रा भाषिताः । ऊनविंशध्यायमारभ्यैकविंशाध्यायान्तं सौत्रामणीयागः प्रकटितः । द्वाविंशाध्यायमारभ्य पञ्चविंशाध्यायं यावत् सर्वकामस्य राज्ञोऽश्वमेधमखो वर्णितः। अयं यज्ञः फाल्गुनशुक्लाष्टमीमारभ्य वर्ष निर्बाधं प्रचलति। अग्रिमफाल्गुनपौर्णमास्यामस्य समाप्तिर्दृश्यते। अयं हि यज्ञः सप्ताशीत्युत्तरदिनत्रिंशत्या (387) संपद्यते। श्रुतावस्य महन्माहात्म्यं वर्णितं विलोक्यते। यथा–तरतिब्रह्महत्यांतरतिपाप्मानं योश्वमेधेन यजते, यउचैनंवेदं आध्यात्मिकाश्वमेधस्य सविस्तर वर्णनं विद्यते। तेषां विनियोगः कात्यायनेन विशिष्य नोक्तः। एष्वध्यायेषु अग्निष्टोम-सौत्रामध्यश्वमेध-पुरुषमेध-सर्वमेध-पितृमेध-प्रवर्ग्य-सम्पादकाः प्रकीर्णमन्त्राः प्रायशो लिखिताः । चत्वारिंशत्तमाऽध्याय विहायान्येष्वध्यायेषु कर्म्मोपासना ज्ञानानि प्रतिपादितानि। चत्वारिंशत्तमेऽध्याये तु मुख्यतया ज्ञानकाण्डस्य प्रतिपादनं विद्यते। अत्र वेदेऽपि उदात्तानुदात्तेस्वरितसंज्ञकास्त्रय एव मुख्यस्वराः, वेदान्तरे समुच्चारणस्वरस्य प्राधान्यमवगम्यते परं यजुर्वेदे हस्तोस्वरकण्ठस्वरयोर्द्वयोरपीतिवेदितव्यम् । यथा-'यथा वाणी तथा पाणी रिक्तन्तु परिवर्जयेत। यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति।'' तारस्वराणां पूर्ववत् परिचयः । उदात्तस्वरस्तु मन्त्रोच्चारणकाले कुत्रचनोपरिप्रदेशे कुत्रचन वामभागे हस्तचालने नाभिनीयते। अनुदात्तस्वस्तु कदाचन नीचैः कदाचन दक्षिणभागे हस्तभागे हस्तचालनेन प्रकटीक्रियते। स्वरितोच्चारणे तु मध्ये एव सदा हस्तस्तिष्ठति। उच्चारणस्वराणां सम्यक् परिचयस्तु व्याकरणेन प्रातिशख्येन च मिलति। 'उच्चैरुदात्तः', 'नीचैरनुदात्तः, 'समाहारः स्वरितः', इत्यादिना स्वराणां परिचयः पाणिनिना प्रदत्तः। अत्र वेदे जात्यादयोप्यष्टौ स्वरविशेषाः सन्ति। तेषां परिचयः शुक्लयजु प्रातिशाख्येन वेदितव्यः। कृष्णयजुर्वेदेऽपि प्रायः इमे एव विषयाः किञ्चिद्वैलक्ष्येन वर्णिता विद्यन्ते। सकलेषु श्रौतयज्ञेषु यजुर्वेदस्यैव प्रधानता विद्यते इति पूर्वमेव प्रतिपादितम् ।

तत्र यदि मन्त्रोच्चारण सम्यक् सस्वरं न विधीयते तदा फलन्तु दूरे प्रत्यवाय एव समुपैति। तदर्थमुच्चारणस्वरस्य हस्तस्वरस्य च ज्ञानं नितान्तमपेक्षितम् । शुक्लयजुर्मन्त्राणमुच्चारणेऽपि विशिष्टता विद्यते। यथा-सर्वत्र पदादौवर्त्तमाना यकारा जकारवदुच्चार्यन्ते। तथा वटवर्गयोगरहितः षकारः खकारश्च शल् योगे 'ले' समुच्चर्यते। हल् मकारश्च ह्रस्वात्परं दीर्घ भावं दीर्घाच्च परं ह्रस्व भावमापद्यते मिथिलायान्तु प्रायः शुक्लयजुर्माध्यन्दिनशाखाध्यायिन एव ब्राह्मणाः बाहुल्येन मिलन्ति। योगीश्वरयाज्ञवल्क्यस्य जन्मभूमित्वन्मिथिलायां शुक्लयजुषः प्रधानतया प्रचारो जातः। अत्र समे ब्राह्मणाः याजयूकाः निरन्तरं वेदाऽध्ययनपरा लौकिकवाङ्मयेऽपि समुच्चारणे वैदिकसरणिमनुसरन्तिस्म। तत्प्रचारादद्यापि मिथिलायां वेदवदेव लौकिकप्रयोगेऽपि षकारस्थाने खकारं, यकार जकारमुच्चारयन्ति। एवंविधः प्रचारो मैथिलानां शुक्लयजुषः परमप्रेमास्पदत्वं ध्वन्यति। अस्य वेदस्योपवेदो धनुर्वेदोऽस्ति। वैदिककाले भारत धनुर्वेदस्य कीदृशः प्रचारः आसीदिति महाभारतवर्णितसंग्रामेण विज्ञायते। हन्त परमद्य तु धनुर्वेदस्य नाममांत्रमवशिष्यते।

सामवेद—यज्ञियदेवताप्रसादनाय गानपद्धत्या येषां मन्त्राणामुच्चारणं विधीयते ते एव मन्त्राः सामवेदत्वेनाख्यायन्ते। अयं वेदः भागद्वये विभक्तोऽस्ति। पूर्वभागस्य नाम पूर्वाऽर्चिकमिति, उत्तरभागस्य नाम उत्तरार्चिकमिति ज्ञातव्यम् । अस्यैव नामान्तरं 'छन्दःसंहिता', 'उत्तरसंहिता' इति कथ्यते। पूर्वार्चिके षड् प्रपाठकानि, उत्तरार्चिके त्रीणि प्रपाठकानि सन्ति। गानसंहितायाश्चत्वारो भागाः सन्ति। तेषु प्रथमो गेय, द्वितीय ऊहः, तृतीय उह्याः, चतुर्थ आरण्यकञ्चेति। सामवेद-ऊनत्रिंशदध्यायाः, षड़ार्चिकाणि, ऊननवतिः सामानि, एकाऽष्ट-नव-त्रि-मिताः (1893) राणायनीयाऽनुसारेण-एक-पञ्च-चतुर्नव-मिताः (1549) मन्त्रा; सन्ति। अत्राऽधिक्येन ऋङ्मन्त्रा एव सन्ति। परं पदन्यासोच्चारणशैलीनां विभिन्नतया सामवेदः संगीतमय उच्यते। सामवेदस्योपवेदः, गन्धर्ववेदोऽस्ति। अस्मिन्नुपासनाया एवं प्राधान्यम् । अस्याविर्भावो रवेरभूत् । अस्य वेदस्य स्वरादि यावद्विषयबोधाय सामप्रातिशाख्यस्य पुष्पसूत्रस्याऽध्ययनमत्यावश्यकम् । अस्य सर्वप्रसिद्धा ब्रह्मोपासनात्मिका छान्दोग्योपनिषद् विद्यते, यस्मामुद्गीथोपासनायाः प्रकारः फलञ्च महत्ता प्रयत्नेन निर्दिष्टं निभाल्यते। हिङ्कारुदाताऽनुदात्तस्वरितस्वराणां ज्ञापनं जायते। गानकाले स्वरगणना अङ्गलिपर्वसु क्रियते। गीतिशास्त्रस्योद्गमः सामवेदादेव जातः । एतद् वेदगानसमयेऽन्येवेदाध्ययनस्य निषेधो मनुना कृतो विलोक्यते। यथा–सामध्वनौऋग्जुषी नाऽधीयीत कदाचन। वेदोस्याऽधीत्य वाप्यन्तमारण्यकमधीत्य च।" तत्र कारणं निर्दिशति स एव। यथा– "ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः । सामवेदः स्मृतः पित्रयस्तस्मात्तस्याऽशुचिर्ध्वनिः"। इत्यत्र निर्दिष्टमदृष्टकारणं पश्यदपि चेतः सामगानकाले इतरवेदपठनं सामगानविरोधीति प्रत्यक्षमपि कारणं कल्पयति। सम्प्रति सामवेदस्य महान् विप्लवो दृश्यते। गानभागवेत्तारस्तुस्वल्पा एव वैदिकास्सन्ति।

अथर्ववेदः— एतद् वेद्स्याविष्कर्त्ता अथर्वा ऋषिरस्ति। अथर्वादृष्टत्वादेवाऽस्य नामाऽथर्ववेदो जातः । अथर्ववेदसंहितायां विंशतिः काण्डानि सन्ति। एतानि काण्डानि

चतुस्त्रिंशत्पाठकेषु विभक्तानि सन्ति। अस्मिन् एकादशोत्तरैकमिता (111) अनुवाकाः, सप्त-सप्त-त्रि-संख्यमिताः (773) वर्गाः, सप्त षड् व्योमसंख्या मितानि (760) सूक्तानि, षट्सहस्त्रमिताः (6000) मतान्तरे पञ्चाऽष्टचतु सप्तसंख्यामिता; (5847) मन्त्राः, सप्त-त्रि-गज-द्विषट्संख्यामिताः (73826) शब्दाः सन्ति। अस्य वेदस्य सर्पपिशाचाऽसुरेति-हासपुराणवेदत्वेन पञ्चाङ्गानि सन्ति। अस्योपवेद आयुर्वेदोऽस्ति। यथा-"वास्तुवेदो धनुर्वेदो गान्धर्वश्च तथा मुने। आयुर्वेदश्च चत्वार उपवेदाः प्रकीत्तिताः" इति सीतोपनिषत् । यज्ञकर्म्मणि ये मन्त्रा नोपयुज्यन्ते। ते एव पृथग्भूता अथर्ववेद ग्रन्थीकृता सन्ति। त्रयीशब्देन अस्यापि ग्रहणं भवत्येव। यत ऋगयजुः सामत्वेन मन्त्राणां त्रयः एव भेदाः सन्ति। यत्र वेदे येषां मन्त्राणां बाहुल्येन प्रयोगः तन्नाम्नैव तस्य व्यपदेशः, न त्वयं त्रयेब्राह्यः। यत्र तत्राऽथर्ववेदाऽध्यायिनो ब्राह्मणा मिलन्ति, परन्तेषां संख्याऽल्पीयसी विद्यते। अस्मिन् बहूनि रक्षोघ्नसूक्तानि सन्ति। विघ्नविघातपटुः कृताऽकृताऽवेक्षको ब्रह्मा भवति। ब्रह्मकर्मणि अथर्ववेदाध्यायिन एवाधिकारो निरूपितः। केचन वदन्ति-नार्य्याणामयवेद इति तदज्ञानविलसितमवसेयम् । केचित्तु-वेदमन्त्रेषु ऋग्यजुः सामवेदानामेव नाम मिलति नैवाथर्ववेदस्येति नास्ति चतुर्थोऽथर्ववेद इति प्रतिपादयन्ति, तदप्यज्ञानविजृम्भितमेव बोद्धव्यम् । यतः प्रकार यमुल्लङ्घ्य मन्त्राणाच्चतुर्थः कश्चन प्रकारो नास्त्येव यन्नाम्ना मन्त्रेषु व्यपदेशो भवेत्। यज्ञो हि स्थावरजङ्गमात्मकस्य जगतो रक्षकः तस्य सम्पादनाय पक्षद्वयम्प्रतिपादितम् एका वाणी, द्वितीयं मनः स्वीकृतम् । वाचा, मनसा यज्ञः सम्पाद्यते। ऐतरेयब्राह्मणे वर्णितं यत्-"अयं वै यज्ञः योऽयं पवते। तस्य मनश्च वाक् च वर्त्तन्यौ। वाचा च हि मनसा च यज्ञो वर्त्तते। इयं वै वाक् अदो मनः तद्वाचा त्र्यया विद्ययैकं पक्षं संस्कुर्व्वन्ति। मनसैव ब्रह्मा संस्करोति।" गोपथब्राह्मणेऽपि प्रकारान्तरेण विषयोऽयं प्रकाशितः । यथा-प्रजापतिर्यज्ञमनुत सं ऋचैव हौत्रमकरोत् यजुषाऽऽध्वर्य्यम्, सामनौद्-गात्रम् अथर्वाङ्गिरोभिब्रह्मत्वम् । अत्रैव ब्राह्मणे-"चत्वारो वा इमे वेदा ऋग्वेदो यजुर्वेदः सामवेदो ब्रह्मवेद" इति। ब्रह्मवेदेनाथर्ववेदस्यैव ग्रहणम् । पातञ्जलमहाभाष्ये तु-अथर्वमन्त्रा एव तत्र-तत्र प्रमाणत्वेन निवेशिताः । एतत्प्रसंगेनाथर्ववेदस्य सर्वत्र पूज्यत्वं स्पष्टं लक्ष्यते। द्विविधा व्याधयः शास्त्रे वर्णिताः। एकोन्नपानवैषभ्यनिमित्तः, द्वितीयश्च जन्मान्तरार्जितपाप-राशिमूलकः । तत्र प्रथमस्य चिकित्सा आयुर्वेदशास्त्रे विस्तरेण प्रतिपादिता। द्वितीयस्य चिकित्सायै वहवो मन्त्रा अथर्ववेदे समाम्नाताः। यत्र तत्र औषधप्रयोगोऽपि शोभनतया वर्णितोऽस्ति। यथा-"नक्त जातास्योषधे रामे असिक्रि च। इदं राजिनि रजय किलासं फालितञ्च यत्।" (अ. वे. 1-23-1) मन्त्रोऽयम् अथर्ववेदस्य प्रथमकाण्डे श्वेतकुष्ठभैषज्ये वर्त्तते, तथैव तृतीयकाण्डस्य तृतीयाऽनुवाके यक्ष्मरोगस्य चिकित्सायाः निम्नलिखित मन्त्रो दृश्यते। यथा-"यदि क्षितादुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव। तमाहरामि निर्ऋतेरुपस्थादस्पार्शमेतं शतशारदाय' (अ. वे. 3-11-2) इति। तथा च तत्र मारणमोहनवशीकरणाऽर्थमन्त्राः सन्ति। तत्रैव स्त्रीवशीकरणमन्त्रो तथा-"अधीपर्णा कामशल्वमिषुं सङ्कल्पकुल्मलाम् तासुनता कृत्वा कामो विध्यतु त्वा हृदि"। चतुर्थकाण्डे शान्तिमन्त्रा अभिहिताः पञ्चमकाण्डे "येन मृतं स्नपयन्ति श्मश्रुणि येनोन्दते। तं वैं

ब्रह्मज्यते देवा अपाम्भा गमधारयन्''।। इत्यादयोऽभिचारमन्त्राः पठिताः । षष्ठकाण्डे चं ''यथा बाणः सुसंशितः परापत्याशुमत् । एवा त्वं कासे प्रयत पृथिव्या अनुसंवनम्''। इत्यादिनिगमैः कासादिरोगाणामपसारणं विद्यते। सप्तमे काण्डे सभायां जयाय ''विद्मते सभे नाम नरिष्टा नाम असि। ये ते के च सभासदस्ते सन्तु सवाचसः''। इत्यादो मनोविऽभिहिताः। अष्टमे नवे दशमे च काण्डे संस्कारविषयका बहवो मन्त्राः पठिताः । एकादशे ब्रह्मचर्य्यविषयका मन्त्राः कथिताः। द्वादशकाण्डतः षोड्शकाण्डं यावत् कृषिविषयकानि पृथिवीसूक्तानि प्रतिपादितानि। अत एवाथर्ववेदः सकललौकिकज्ञानामाकरो विद्यते। इत्थं मन्त्रब्राह्मणा-रण्यकोपनिषद्भिः प्रवृद्धो वैदिकवाङ्मयकल्पतरुः समेषां मानवानां मनोरथप्रदोस्तीति नाऽत्र संशीतिलेशः । चातुर्वण्यं त्रयोलोकाश्चत्वारश्चाश्रमाः पृथक्। भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिद्धयति । इति।

विषय-सूची:

भूमिका ... ... v-xiv

प्रथमोऽध्यायः 17-46

मन्त्रार्थदीपिका कर्त्तुः आचार्य शत्रुघ्नमिश्रस्य परिचयः

वेदभाष्यकर्त्तुः उव्वटाचार्यस्य व्यक्तित्वं कृतित्वं च

उव्वटाचार्यस्य भाष्यशैलीः

द्वितीयोऽध्यायः 47-72

स्वस्तिवाचनम्

नान्दीश्राद्ध :

पुण्याहवाचनम्

कलश स्थापनम्

नवग्रहपूजनम्

पञ्चोपचार पूजनम्

षोड्शोपचार पूजनम्

रक्षाविधानम्

कुशकण्डिका

पञ्चभूः संस्कार

तृतीयोऽध्यायः 73-113

संस्कार शब्दार्थः तत्प्रयोजन निरूपणम्

गर्भाधानम्

पुंसवनम्

निष्क्रमणम्

सीमन्तोन्नयनम्

जातकर्मः

नामकरणम्

अन्नप्राशनम्
चूडाकरणम्
उपनयनम्
कर्णवेधः
समावर्त्तनम्
केशान्तः
विवाहः
चतुर्थी कर्मः

चतुर्थोऽध्यायः 114-156
शिवसंकल्प सूक्तम्
पुरुषसूक्तम्
नारायण सूक्तम्
अप्रतिरथ सूक्तम्

पञ्चमोऽध्यायः 157-196
सूर्यसूक्तम्
रुद्र सूक्तम्
सोम सूक्तम्

परिशिष्टम् 197-207
सहायकग्रन्थानां सूचीः
उद्धरण ग्रन्थ संकेत सूचीः

प्रथमोऽध्यायः

मंत्रार्थदीपिका कर्त्तुः शत्रुघ्न मिश्रस्य परिचयः

"आदित्यानीमानि शुक्लानि यूँजँषि व्याजसनेयेन याज्ञवल्क्येनाख्यायन्ते"[1] इति श्रूयते। वेदे द्वौ सम्प्रदायौ स्तः ब्रह्म सम्प्रदायः आदित्यसम्प्रदायश्च। कल्पादौ भगवता श्रीविष्णुना शंखासुर नामानं दैत्यं व्यापाद्य तदाहृतो वेदो ब्रह्मणे प्रददे। ब्रह्मा च तं द्वेधा विभज्यैकं भागं आदित्ये निहितवान् अन्यञ्च भागं स्वापुत्रादिभ्यो वशिष्ठप्रभृतिभ्योऽध्ययन विधिना प्रायच्छत् ते च स्वपुत्रादिभ्यो वशिष्ठप्रभृतिभ्योऽध्ययन विधिना प्रायच्छत् ते च स्वपुत्रपौत्रशिष्यप्रशिष्येभ्यः। ततोऽग्रे द्वापरान्ते भगवान् वेदंव्यासोऽल्पज्ञानल्पशक्तिलोकान् विदित्वा एकं वेदम् ऋग्वेद यजुः सामाथर्वाभिश्चतुर्धाव्यस्यक्रमात् पैल वैशम्पायन जैमिनि सुमन्तूनध्यापयामास ते एव अग्रे शाखा प्रभेदादिन। परमनेकधा विस्तारं नीता। सैषा वेदचतुष्टयी "ब्रह्म सम्प्रदाय" इति प्रसिद्धिं लेभे।[2] पुनश्च योगीश्वर याज्ञवल्क्येन तपस्तप्त्वा भगवन्तं त्रयीमयमदित्यं सन्तोष्य च तस्माच्चतुरोवेदान् ऋग्यजुसामार्थर्वाख्यानधि जगे सैषा वेदचतुष्टयी "आदित्य सम्प्रदाय' इति भावः । उक्तञ्च जाबालसंहितायाम्–

"ब्रह्मणः सम्प्रदायोऽयं व्याससन्दर्शितोऽभवत् ।
विभक्तस्यैव वेदस्य सम्प्रदायो द्विधा मतः ॥
ब्रह्मणः सम्प्रदायस्तु आदित्यस्य तथा मतः ।
आयातायाम संज्ञोऽयं कृत्स्न कर्म प्रकाशकः ॥
यावद् ब्रह्म प्रकाशको रविरूपश्च यो मतः ।
ब्रह्मणः संप्रदायस्तु मिश्रत्वान्न यो मतः ॥[3]

आदित्य संप्रदायस्य अधीयानां प्रमुख केन्द्रं मिथिला प्रदेशः अस्ति यतः अत्रैव महर्षि याज्ञवल्क्यः जन्मं लेभे। अस्मिन्नेव मिथिला मण्डले शुक्लयजुर्वेद भाष्यकारः शत्रुघ्न मिश्रः अवतीर्यवान् ।

मंत्रार्थदीपिकाया; रचना महाभारतसमरख्यातवीर्यस्य सुशर्म्मणो राज्ञः सुप्रसिद्धवंशे समुद्भूतस्य धर्म्मचन्द्रसिंहस्याज्ञया तदाश्रितेन महामहोपाध्याय शत्रुघ्न शर्म्मणोवटादिभाष्यग्रन्थानत्र यथोट्टङ्कितनाम्नः समालोच्य सुप्रसिद्धोऽयं ग्रन्थो निबद्धः[4] शंत्रुघ्नमिश्रेण ग्रन्थस्यास्य मंगलाचरणे अस्य ग्रन्थस्य आधार ग्रन्थरूपेण उव्वटस्य मन्त्रव्याख्या गुणविष्णो[5] ब्राह्मणीयसर्वस्व ग्रन्थभाष्यस्य उल्लेख कृतः ।[6]

किन्तु यत्र तत्र मंत्रार्थ व्याख्याने शत्रुघ्नमिश्रः स्वतन्त्ररूपेण अर्थावबोधः कृतास्पदो विलोक्यते। उव्वटाचार्यस्य भाष्ये श्रौतयागानां प्रति आग्रहः दृश्यते किन्तु आचार्य शत्रुघ्नस्य भाष्यम् स्मार्त्त संप्रदायानुरोधिः वर्त्तते अतः यत्र तत्र मंत्रार्थे विनियोगेऽपि भेदः दरीदृश्यते। अनेकत्र स्थाने-स्थाने उव्वटेन सूत्राणां भाष्यस्य स्पष्टीकरणार्थं श्लोक मुद्धरणादिकं च प्रदत्तमस्ति यथा-बाजसनेयि प्रतिशाख्ये 4/165 सूत्रस्य भाष्ये उव्वटेन सूत्रार्थ स्पष्टीकर्त्तुं याज्ञवल्क्य शिक्षायाः श्लोकः उद्धृतोऽस्ति यथा–

''यमान् विद्यादयस्पिण्डान् सान्तस्थान् दारुपिण्डवत् ।
अन्तस्थान यमवर्जं तु ऊर्णपिण्डं विनिर्दिशेत् ।।[7]

अस्य व्याख्याने उवटेनोक्तं यत् यथा अयः पिण्डादिनां आश्लेषः भवति तथैव व्यञ्जनानामपि आश्लेषः भवति।[8]

"नमस्ते रुद्रमन्यव" इति मंत्रस्य विनियोग यत्रोव्वटेन शतरुद्रियहोंमेकृतमस्ति तत्रैव शत्रुघ्न मिश्रेणास्य विनियोगः रूद्राणां शान्ति कर्मणि कृतः । उवटः यत्र रुद्रम् अग्नि स्वरूपं उच्यते तत्र शत्रुध्नन रुद्र शब्दास्यार्थः ज्ञानप्रदाता निगदितम् । इषव शब्दस्य अर्थावबोधनं उव्वटेन काण्डः कृतमस्ति किन्तु शत्रुघ्नेनाऽस्य अर्थः "बाण" कृतमस्ति ।

इदमित्थं स्थाने-स्थाने उव्वटस्यापेक्षया शत्रुघ्नेन मंत्राणां स्वतंत्रतया सुस्पष्टं अर्थावबोधनम् कर्तुम् प्रयत्नः आचरितो विलोक्यतेति दिक् ।

आचार्य उव्वटस्य व्यक्तित्वं कृतित्वं च

आचार्य उवटस्य नाम्नः अनेके पाठा प्रचलिताः सन्ति उव्वट औवट, ऊवट, ऊअट अउटश्चेति। किन्तु एतेषु पाठेषु सर्वाधिकः प्रचलित पाठः उवटः अस्ति। आप्टे मोनियर विलियम्स कोशो उवट शब्दस्यअर्थः नास्ति अपितु तत्र व्यक्ति विशेषः नाम लिखितः वर्त्तते।

संभवतः उवट शब्दःविशुद्ध संस्कृतस्य नास्ति । प्राकृतकोशे उव्वट उम (उद् + वृत् वर्त्तय) शब्दः मिलति। अस्यार्थः भवति–(1) चलना-फिरना (2) मरना, एक गति से दूसरी गति में जन्म लेना, (3) पिष्टिका आदि से शरीर के मल को दूर करना (4) कर्म परमाणुओं की लघु स्थिति को हटाकर लम्बी स्थिति करना (5) पार्श्व को चलाना-फिराना (6) उत्पन्न होना, उदित होना। उव्वट (वि.) (1) नीराग राग-रहित (2) गलित।

यद्यपि उपर्युक्त प्राकृत कोशे[9] उव्वट्ट' शब्दस्योल्लेख कस्यापि नाम्नः प्रसंगे नास्ति अतः उपर्युक्तानां अर्थानां सह उवटस्य संगतिकरणंः अनुचितः भविष्यति तथापि "उवटस्य' प्राकृत मूलंय 'उव्वट" इत्यस्य प्रतिरूपं स्यात् इत्यत्र् पूर्णतया निषेधः अपि न कर्तुतम् शक्यते।

उवटस्य निवास स्थानम् –

भाष्यकारः उव्वटाचार्यस्य जन्मकालादि परिचयस्य स्रोतः तस्य भाष्यमेव वर्त्तते।

तस्य विषये कोऽपि बाह्य साक्ष्यः उपलब्धः नास्ति। यद्यपि उवटेन स्व जीवनविषयो कुत्रापि विस्तृतोल्लेखः न कृतः तथा च न केनापि परवर्ती विदुषा अपि तस्य जीवन विषयेकिमपि उल्लेखः कृत तथापि तस्य भाष्ये यत्र तत्र तादृशाः संकेताः सन्ति ये तस्य स्थिति कालादि विषये सङ्केतयति ।

उवटस्य जन्मस्थानविषये विवादः वर्त्तते । केचन विद्वासः उवटाचार्यं काश्मीरीब्राह्मणः मनुते यतः प्रायः पुरातन काश्मीरी विदुषां नाम्नः टकरान्त शैल्यां वर्त्तते यथा– वज्रटः, मम्मटः कैयट इत्यादयः । पं. भगवदत्त महोदयस्य मते 'उवटः नागर[10] ब्राह्मणः आसीत्।[11] किन्तु एतन्मतस्य समर्थनेतेन किमपि प्रमाणम् न प्रदत्तम् । सम्भवतः पं. भगवद्त्तेन उवटस्यआनन्द पुर वास्तव्यः" इति कथनस्याधारेणेव तं नागर ब्राह्मण मनुते। आनन्दपुरम्[12] गुजरात राज्ये अस्ति यत् नागर ब्राह्मणानां मूल स्थानं वर्त्तते। किन्तु केवलं एतेनैवधारेण उवटं नागर ब्राह्मण इति कथनं नास्ति युक्ति युक्तम् । उवटेन शुक्ल यजुर्वेद संहिताया विंशतित में अध्याये उक्तम् "आनन्दपुर वास्तव्यः" इति। प्रश्नोऽयम् आपततियत् आनन्दपुरम् कुत्रास्ति? श्रीराम सिंह पथिकेन स्वकीय "शुक्लयजुर्वेद पर महीधर उवट और स्वामी दयानन्द के भाष्यों का समीक्षात्मक एवं तुलनात्मक अध्ययन[13] नामके शोध प्रबन्धे उवटस्य जन्स्थानं काश्मीर राज्यान्तर्गत आनन्दपुर नामके ग्रामे वर्त्तते इति लिखितः। किन्तु एतस्या पृष्ठषोषणार्थं तेन कोऽपि तर्कः न प्रदत्तः। पं वी वेकटराम शर्म्मणः उक्तम् यत् आनन्दपुरम् बनारसे अस्ति किन्तु तदर्थं तेन कोऽपि प्रमाणः न प्रदत्तः।[14]

कोलम्बियायाः लिपिकाट गजेटियरे आनन्दपुरम् उड़ीसायाः उत्तरपूर्वे ओंझार जिलायां एकः ग्रामः वर्त्तते । तथा च उत्तरीमध्य पंजाब राज्यस्य होशिंयारपुर जिलायाम् एकः ग्रामः आनन्दपुरम् वर्त्तते।[15] किन्तु केनापि विदुषां मते उपर्युक्त स्थानेन सह उवटस्यकोऽपि सम्बन्धः न उदीरितम् । भोजेन सम्बन्ध कारणादेव गुजरात राज्ये अविस्थते आनन्द पुरेण साकं उवटस्य सम्बन्धः विदुषां अभिप्रेतम् स्यात् ।

आर. जी भण्डारकर महोदयस्यमतेन आन्दपुरम् गुजरात राज्ये वर्त्ततेन किन्तु तस्य इदानीन्तन नाम वड्नगरउच्यते।[16]

श्री नन्दूलाल डे[17] महोदयोनोक्तम् यत् वड्नगर उत्तर भारतेऽस्ति तत्रत्यः एकं स्थानं इदानीमपि आनन्दपुरमुच्यते। एतद्स्थानं उत्तराद् पश्चिम दिशि वलभी स्थानात् पञ्चाशत क्रोश दूरे अवस्थितोवर्त्तते अस्य प्राचीन नाम अनन्तपुरम् आसीत् ।[18] इदं आनन्दपुरम् यावउनगर नागरमपि उच्यते यत गुर्जर प्रदेशस्य नागर ब्राह्मणानां मूलभूतं स्थानम् अस्ति। इदमपि सम्भाव्यते यत् आनन्द आनन्दनगर आनन्दपुरम वा एकस्यैव स्थानस्य नाम स्यात् तत् स्थानं गुर्जर प्रदेशस्थितं आनन्दपुरम् एवं अस्ति एतस्य पुष्टिः बम्बई गजेटियरेऽपि भवति। अनेन प्रतीयते यत् आनर्तः यत् उत्तरी गुर्जर प्रदेशे अस्ति अस्यापि राजधानीः आनन्दपुरम आसीत्

यत् आधुनिक वड्नगरम अस्ति । एतत् आनर्तपुरमपि उच्यते।[19] एतेन स्पष्टं भवति यत् आनन्दपुरम् गुजराते एव अस्ति ।

श्रीभट्ट वामनाचार्येण काव्यप्रकाशस्य प्रस्तावानायां आनंदपुरम् गुर्जर प्रदेशे अस्ति इति भणितम् ।[20]

उवटः संभवतः आनन्दपुरस्य निवासी स्यात् । किन्तु अन्यस्मिन् श्लोके सः लिखति यत्–

"ऋष्यादींश्चनमस्कृत्य अवन्त्यामुवटो वसन् ।
मन्त्राणां कृतवान् भाष्यं महीं भोजे प्रशासति ।।"[21]

अर्थात् ऋषीन् नमस्कृत्य अवन्त्यां स्थितः सन् राजा भोजस्य राज्ये उवटचार्येण मन्त्राणां भाष्यरचना कृता । अनेन श्लोकेन इदं स्पष्ट यत् अवन्ती नगर्यां भोजराजस्य शासकत्वे उवटेन मन्त्रभाष्यम् कृतमिति ।

अतः संक्षेपतया वयं कथितु शक्नुमः मूलतः उवटाचार्य काश्मीरस्य मूल निवासी आसीत् किन्तु तस्य पिता आनन्दपुरे आगत्य निवासः कृतः तथा उवटेन अवन्त्याम् स्थित्वा मन्त्राणां भाष्य रचनां कृतवान् इति ।

उवटचार्यस्य पितुः नाम वज्रटः आसीत् यथातेन सर्वेषां भाष्याणां अन्ते स्व पितुः नाम वज्रट एव हि लिखितम्–

"आनन्दपुरवास्तव्यवज्रटाख्यस्य सूनुना ।
उवटेन कृतं भाष्यं पदवाक्यैः सुनिश्चितैः ।।"[22]

अर्थात् आनंदपुर वास्तव्यः वज्रस्टस्य पुत्रेणेनोवटेन पदवाक्यैः सुनिश्चितम् उत्तम भाष्यंकृतम् । एतदति रिक्तं ऋग्वेदप्रातिशाख्यस्य प्रत्येक पटलस्य अन्ते उव्वटेनोक्तम् यत्- "इति श्री पार्षददव्याख्यायामानन्दपुरवास्तव्य वज्रट पुत्र उवटकृता।" प्रातिशाख्यसूत्रभाष्ये-... पटलम् । अनेन विज्ञायते यत् उवटः वज्रटस्य पुत्रः आसीत् । किन्तु यजुर्वेदस्य विंशतितमेऽध्याये लिखितमस्ति यत् -

"आनन्दपुर वास्तव्यजैय्यटाख्यस्य सूनुना ।
उवटेन कृतं भाष्यं पदवाक्यैः सुनिश्चितम् ।।"

श्लोकेन अनेन ज्ञायते यत् उवटस्य पिता जैयटः आसीत् । श्री वेंकटराम शर्म्मणापि उवटस्य पिता जैय्यट[23] एव स्वीकुर्वन्ति ।

उपर्युक्त प्रमाणानुसारेण उवटस्य पितुः नाम जैय्यट वज्रटः वा इति विवादस्य विषयः भवति। जैयटः इति उल्लेख केवलं एकस्मिन्नेव श्लोके वर्त्तते किन्तु वज्रटस्य नामोल्लेखः उवट भाष्यस्य विभिन्न पाण्डुलिपिसु वर्त्तते ।

उपर्युक्त श्लोकः "आनन्दपुर वास्तव्य....मही भोजे प्रशासति।[24] इति स्वल्प पाठान्तरेण सह अनेकत्र हस्तलिखित प्रतिषु अन्तेदृश्यते। बड़ौदायाः हस्तलेख संख्या 10447 इत्यस्य अन्ते लिखित वर्त्तते यत्–

"आनन्दपुर वास्तव्य वज्रटाख्यस्य सूनुना।
मन्त्र भाष्यमिदं क्लृप्तं भोजे पृथ्वीं प्रशासति ॥"[25]

पूनायाः हस्तलेख संख्या द्विशंत द्वात्रिंशत् इत्यस्य दशामाध्यायस्य अन्ते लिखितमस्ति यत्–

"ऋष्यादींश्च नमस्कृत्यह्यवन्त्याम् उवटो वसन्।
मन्त्रभाष्यमिदं चक्रे भोजे राज्यं प्रशासति ॥"[26]

वाराणसीस्थ राजकीय संस्कृत पाठशालीय उवट भाष्यानुसारी पाठस्य त्रयोदशेऽध्याये लिखितमस्ति यत्–

"आनन्दपुरवास्तव्य वज्रटस्य च सूनुना।
उवटेन कृतं भाष्यमुज्जयिन्यां स्थितेन तु ॥"[27]

उपर्युक्त प्रमाणानुसारेण इदं सिद्धयति यत् उवटस्य पितुःनाम वज्रटः एवासीत्।

आनन्दाश्रम पूना नगर्यात् ईशावस्योपनिषदः अनेकाः टीकाः प्रकाशिताः अभवन तासु उवटभाष्यम् अपि मुद्रितम् अस्ति। तस्यान्ते उल्लिखित निबन्धनापि इदं ज्ञायते यत् उवटस्य पिता वज्रट नामधेयः उपाध्यायः आसीत्–

"इति श्रीमद्वज्रटभट टटोपाध्यायात्मजसकलनिगमविच्चूड़ामणिश्रीम-
दुवटभट्टार्य विरचिते...चत्वारिंशत्तमोध्यायः॥"[28]

उवटस्य पितरं विहाय अंन्याकापि सूचना तेन कुत्रापि न प्रदत्ता। किन्तु काव्यप्रकाशस्य सुधासागर टीकाकर्त्ता श्री भीमसेन महोदयेन पतंजलि महाभाष्यस्य टीकाकारं कैयटं उवटं च मम्मटाचार्यस्य अनुजम् वदन्ति यथा–

श्रीमन्मम्मट संज्ञयाश्रिततनुं सारस्वतीं सूचयान् ॥
श्रीमान् कैयट-औवटो ह्यवरजो यच्छात्रतामागतो ॥
भाष्याब्धिं निगमं यथाक्रममनु व्याख्याय सिद्धिं गतः ॥

विवरणमनेन सिद्ध्यति यत् मम्मटस्य जन्म जैयटस्य भार्यायाः जठराद अभवत्। अर्थात् मम्मटाचार्यः जैटयस्य पुत्रः आसीत्। कैयटः औवटश्च तस्य अनुजौ आस्ताम्।[29]

भीमसेनस्य मतस्य खण्डनम् कृत्वा आचार्य विश्वेश्वरः प्रमाणं प्रस्तौतियत् उवटेन स्वयं वाजसनेयि-संहिता-भाष्ये स्व परिचयं प्रदत्तम् अस्ति यत्–"आनन्दपुरवास्तव्यः...। अत्र उवटेन स्वयं स्वपितुः नाम वज्रटः उल्लिखितम् न तु जैयटः पुनश्च तस्यवेद भाष्यम् राजा भोजस्य शासनकाले लिखितमस्ति।[30]

आचार्य विश्वेश्वरस्य मतेन मम्मटाचार्यः राजा भोजस्य समकालीनः नास्ति किन्तु उवटः भोजस्य समकालीनः वर्त्तते। मम्मटस्य समयः भोजात् परवर्ती वर्त्तते यतः मम्मटेन स्वयं काव्यप्रकाशस्य दशम उल्लासे उदात्त अलङ्कारस्य उदाहरणत्वेनाऽयं पद्यः प्रस्तुतः यस्यान्ते– "**भोजनृपतेस्तत् त्यागलीलायितम्**" इति। अर्थात् सर्वं भोजस्य दानस्य फलम् वर्त्तते एतेन इदं सिद्धयति यत् मम्मटः भोजात् उत्तरवर्ती अस्ति।[31]

श्री झलकीकर महोदयस्य विचारेऽपि मम्मटः भोजराजस्य समकालीनः नासीत् । तेषां मते जैयट गोत्रोत्पन्नः वज्रटस्य पुत्रः उवटः आसीत् अतः यदि मम्मटः भोजस्य परवर्ती आसीत् तर्हि कथं तस्यानुजः उवटः भोजस्य समकालिकः स्यात् इति ज्ञातव्यम्[32] यतः उवटः स्पष्टतया भोजस्य समकालीनः इति सुस्पष्टम् तर्हि मम्मटस्य भ्रातृत्वं नास्ति युक्तियुक्तम् ।

श्री हनुमत्प्रसाद शास्त्रिणापि उवटस्य मम्मटस्य भ्रातृत्वं खण्डयितुं इदमेव प्रमाणं प्रदत्तमस्ति।[33]

तथापि केचन् विदुषां मते उवटः मम्मटाचार्यस्य भ्राता आसीत् । पी.वी. काणे महोदयस्य विचारेण उवटेन भोजस्य राज्ये वाजसनेयि संहितायाः भाष्यः कृतः अतः तस्य मम्मटस्य भ्रातृत्वं नास्ति कथमपि असम्भवम् ।[34] अस्य पुष्टिकरणे सुशील कुमार डे महोदयः वदति यत मम्मट द्वारा उदात्त अलंकारस्य उदाहरणे प्रदत्तः पद्यांशेन केवलं इदमेव सिद्धयति यत् मम्मटः भोजराजात् पूर्ववर्ती नासीत् ।[35] अर्थात् सः भोजस्य समकालिकः उवटस्य भ्राता अपि भवितुमर्हति। उवटस्य जैयटपुत्रत्वं निर्विवादः नास्ति यतः अधिकांशतया तेन सर्वत्र स्वस्य वज्रटपुत्रत्वेन उल्लेखः कृता किन्तु वाजसनेयि संहितायाः विंशतितमेऽध्याये तेन स्वकीय जैयट पुत्रत्वम् अपि स्वीकृतमस्ति।[36] एतेन उवट मम्मटयोर्भ्रातृत्व सिद्धयति तस्य निषेधः कदापि कर्तुम् नास्ति युक्तिसंगतम्।

उवटाचार्यस्य कालः-

उवटाचार्यस्य भाष्येषु "महीं भोजे प्रशासति" इत्यस्य उल्लेखेन इदं सिद्धयति यत् तेन भोज राजस्य राज्यकाले भाष्याणां रचना कृता । किन्तु प्रश्नोऽयं आपतति यत् कस्य भोजस्य राज्यकाले सः आसीत् यतः इतिहासे अनेके भोज नामधेयाः राजानः अभवन् । किन्तु अस्मिन् सम्बन्धे ऐतिहासिकाः मौनावलिम्बनः सन्ति। प्रायः सर्वे विद्वांसः एकमत्येन उवटस्य स्थितिः भोज परमारस्य राज्यकाले वदन्ति। भोजपरमारस्य राज्यकालस्य प्रारंभिक अवधिः 1011 ई तः 1055 ई. पर्यन्तं ऐतिहासिकाः वदन्ति। यतः उवटः भोज परमारस्य समकालीन वर्त्तते अतः उवटः एकादशशताब्दी ई. ईत्यस्य पूर्वार्द्धे स्यात् इति अनुमीयते ।

उवटः भोजस्य समकालीनस्तु आसीत् किन्तु किं सः भोजराजस्य आश्रितः कविरासीत्। पं. जगदीशलाल शास्त्रि महोदयः शुक्लयजुर्वेद संहितायाः भूमिकायां लिखति यत् उवटाचार्यः

भोजराजस्य आश्रितः आसीत ।[37] किन्तु सामान्यतया उवटाचार्यस्य भोजराजस्य आश्रयस्य कुत्रापि स्पष्ट सङ्केतः न दरीदृश्यते ।

उवटाचार्यस्य ग्रन्था–

आचार्य उवटेन यद्यपि कोऽपि मौलिक ग्रन्थः न रचितः केवलं भाष्याणांमेव रचना कृता । निम्नलिखित ग्रन्थानां उपरि उवटस्य भाष्याः सन्ति –

(1) वाजसनेयि संहिता

(2) ऋक्-प्रातिशाख्यम्

(3) वाजसनेयि प्रातिशाख्यम्

(4) ऋक्-सर्वानुक्रमणी

एतेषाम् ग्रन्थानां सक्षिप्तः परिचयः अधोलिखितःवर्त्तते–

वाजसनेयि संहिता–शुक्लयजुर्वेद संहितायां उपरि सर्वप्रथमं व्यवस्थितं भाष्यम् उवटस्यैव वर्त्तते । उवट भाष्यम् शुक्लयजुर्वेदस्य चत्वारिंशद अध्यायानामुपरि कृतमस्ति। त्रिंशत् तमेऽध्याये केवलं चतुर्णां मन्त्राणामेव भाष्यम् उवटेन कृतम् । अन्य अध्यायेष्वपि मध्ये-मध्ये अनेक मन्त्राणां भाष्यम् उवटेन त्यक्तम् आसीत् । सम्भवतः तेषां मन्त्राणां सरलताकारणात् उवटेन एतादृशं कृतम् इति भाति। उवटेन मन्त्राणां अधियाज्ञिक आध्यात्मिक अर्थमपि कृतमस्ति । उवट भाष्यम् मन्त्रभाष्य नाम्ना प्रसिद्धम् अस्ति ।

उवट भाष्यम् कलकत्ता, वाराणसी मुम्बई नगराद् मुद्रितोऽस्ति।[38] अस्यैकं ससंकरण 1922 तमें वर्षे दिल्ली नगराद् प्रकाशितः अभवत् । 1971 तमे वर्षे मोतीलाल बनारसीदासेन एकं संस्करणम् प्रकाशितम् ।

ऋग्वेद प्रातिशाख्यम्-

प्रातिशाख्येषु ऋक् प्रातिशाख्यस्य स्थानं अत्यन्त महत्वपूर्णं प्रामाणिकञ्च वर्त्तते। एतत् पार्षद सूत्र नाम्ना विख्यातोऽस्ति। विष्णुमित्रेण शौनकाचार्यं अस्या "पार्षदः रचयिता कथ्यते।[39] "शौनकं च विशेषेण येनेदं पार्षदं कृतम् ।।[40] पार्षदसूत्राणामुपरि उवटाचार्येण "पार्षद व्याख्या" विलिखिता । डॉ. वीरेन्द्र कु. वर्मा महोदयेन पार्षद शब्दस्यार्थम् उक्तम् यत्–परिषद शब्दस्य अर्थः भवति-सभा गोष्ठी वा। प्राचीनकाले एतादृशाः परिषदाः आसन यत्र ध्वनि विज्ञान व्याकरणादि विषयानामुपरि नियमित गंभीर चिन्तनं च भवति स्म। एतादृशैः परिषदै संबद्धताकारणादेव प्रातिशाख्यानां नामकरणम् पार्षद परिषद सूत्रम् वा आसीत् । दुर्गाचार्येण निरुक्त पार्षद शब्दस्य निर्वचनम् कृतम् यत[41]–"स्व चरण परिषद्येव यैः प्रतिशाखा नियतमेव पदावग्रहप्रगृह्यक्रम संहितास्वर लक्षणमुच्यते तानीमानि पार्षदानि प्रातिशाख्यानी त्यर्थः ।।" अर्थात् पार्षदाः प्रातिशख्या ते ग्रन्थाः सन्ति ये स्वऽध्येतृणां परिषदि एक शाखा सम्बद्ध

पदविभागः प्रगृह्यम् क्रमपाठः संहिता पाठ स्वराणां लक्षण वा कथ्यते। वेदानां अर्थावबोधने सहायक ग्रन्थकारणाद् एते "पार्षद" कथ्यन्ते ।

ऋग्वेद प्रातिशाख्यस्य उवटाचार्य विरचितापार्षद व्याख्या अतिप्रसिद्धाऽस्ति। सर्वप्रथम इत्यस्य प्रकाशनम् 1856 ई. मध्ये एम. ए. रेग्नियर महोदयेन कृतम् । तेन सूत्राणां अनुवादः फ्रेंच भाषायां कृतम् तथा च उवटभाष्यानुसारेण तेषां संक्षिप्ता व्याख्याऽपि प्रस्तुता।[142]

1869 ई. मध्ये मैक्समूलरेण पार्षद् सूत्राणां प्राकशनम् कृतम् । एतेषां सूत्राणां जर्मन भाषायाम् अनुवादः कृतः पुनश्च उवटभाष्यानुसारी तस्य व्याख्याऽपि प्रस्तुता। तस्मिन्नेव वर्षे ऋग्वेद प्रातिशाख्यस्य सूत्राणाम एवं संस्करणं सत्यव्रत सामश्रमी महोदयेन कलकत्ते नगराद् प्रकाशितम् ।[43] 1903 ई. मध्ये उवटभाष्य संहिता ऋग्वेद प्रातिशाख्यस्य एकं संस्करणम् पं युगल किशोर व्यासः तत्शिष्येण पं प्रभुदत्त शर्म्मणा वाराणसी नगराद प्रकाशनं अकरोत् ।[44]

1905 ई. मध्ये उवटभाष्ययुक्तम ऋग्वेदप्रातिशाख्यस्य एकं संस्करणम् हितव्रत सामकण्ठेन कलकत्ता नगराद् प्रकाशितः।[45] उवटभाष्यसहितम् ऋग्वेद प्रातिशाख्यस्य इदं सर्वप्रथमं प्रकाशित संस्करणमस्ति ।

मंगलदेव शास्त्रिणा लन्दननगराद् 1922 तमे वर्षे ऋग्वेद प्रातिशाख्यम् प्रकाशितः, पुनश्च 1931 तमे वर्षे तेनैव तस्य पुनस्सम्पादनम् वाराणस्याम् अकुर्वन् ।[46]

1970 तमें वर्षे ऋग्वेद प्रातिशाख्यस्य मुद्रणं काशी हिन्दू विश्वविद्यालयस्य संस्कृत ग्रन्थमालायाः पंचम पुष्परूपेण डॉ. वीरेन्द्र वर्म्मणा प्रकाशितम् । अस्मिन् ग्रन्थे उवट भाष्यम तस्य आलोचनात्मामकं अध्ययनमपि वर्त्तते ।

ऋग्वेद प्रातिशाख्योपरि विष्णुमित्रेनापि वृत्ति कृतास्ति किन्तु इयं केवलं प्रारंभिक द्वयानां वर्गानामुपरि एव मुद्रितोऽस्ति। परन्तु शेष पटलानां हस्तलिखित प्रतयः डेक्कन कालेज पूनायाम् समुपलब्धोऽस्ति।[47]

वाजसनेयि प्रातिशाख्यम्—शुक्लयजुर्वेदप्रातिशाख्योऽयं आचार्य कात्यायेन प्रणीतम्। कात्यायन प्रातिशाख्यस्यव्याख्याद्वयम् प्रकाशिताऽस्ति। एका उवटकृता मातृमोद व्याख्याद्वितीया अनन्तभट्ट रचिता व्याख्या। उवट भाष्यस्य मुद्रणम् अनेकाद् स्थानाद् अभवत् तद्यथा-(1) जीवानन्द विद्यासागरेण 1950 ई. मध्ये प्रकाशितं संस्करणम् ।[48]

(2) युगल किशोर महोदयेन सम्पादितं काशी संस्करण् सं. 1964 तमे वर्षे प्रकाशितम् । अस्मिन् संस्करणे प्रतिज्ञासूत्रम्, भाषिक सूत्रम्, जटादि विकृति लक्षणम्, ऋग्यजुः परिशिष्टम् तथा च अनुवाकाध्याय परिशिष्टेऽपि 'अन्ते प्रकाशितो वर्त्तते।[49]

(3) वेंकटरामशर्म्मणा सम्पादितम् मद्रास विश्वविद्यालयात् सं. 1991 (सन् 1934) मध्ये प्रकाशितः अभवत्। तत्र अनन्तभट्टस्य व्याख्यामपि प्रकाशिताऽस्ति। उवटभाष्यस्य उपर्युक्त संस्करणानि नास्ति परिशुद्धम् ।[50]

ऋक-सर्वानुक्रमणी–

अनुक्रमणी मध्ये ऋग्वेदीय मन्त्राणां देवताछन्द ऋषिसम्बद्धा क्रमबद्ध सूचीः वर्त्तते। महर्षि कात्यायनकृता इदं सर्वानुक्रमणी बृहत्तराविख्याताश्च वर्त्तते। अस्योपरि उवटभाष्यम् षड्गुरुशिष्यस्य वेदार्थदीपिका नामधेया वृत्तिरपि अस्ति ।

बिहार उड़ीसा रिसर्च सोसाईटी द्वारा प्रकाशिते मिथिलायाः कैटलॉग मध्ये "त्रिभाष्यरत्नम्" उवट (सोम कृतम्) कृतम् कथितमस्ति। इयं तैत्तिरीय प्रातिशाख्यस्य भाष्यमस्ति। इदम् पूर्णमस्ति किन्तु त्रिभाष्यरत्नस्य अन्यत्र कुत्रापि उल्लख न दृश्यते।[51]

इदमपि मुच्यते यत् माध्यन्दिन शतपथेऽपि उवटेन टीकाकृता आसीत् किन्तु अस्य कोऽपि प्रमाणम् न उपलभ्यते ।[52]

सी कुन्हन राजा महोदयेन पंचम ओरिएण्टल कॉन्फ्रेन्सस्य "दी कमैण्ट्रीज ऑन ऋग्वेद एवं निरुक्त "नामके आलेखे 261. तमे पृष्ठे लिख्यते निघण्टुः 3/4/11 ध्ये देवराजयज्वना उवटस्य एका पंक्तिः उद्धृतम् करोति यत् –

"अमात्यम् इति अत्र उवटः अमा गृहवचनः .सहवचनो वा।
अव्ययात् त्यप्। तत्र भवः इति अर्थे गृहे सत्याहो भवति अमात्यः ॥

सत्यव्रतेनोक्तम् यत् ऋग्वेदे "अमात्य"[53] शब्द केवलं एक बारमेव आगतः।[54] वाजसनेयिसंहितायां 5/23 मन्त्रे[55] आगते अमात्य शब्दोपरि उवटस्य भाष्यमिदं वर्त्तते यत् "यं वलगं मे मम निष्ट्यः पुत्रः । स हि निर्गत्य शरीरात्ततो विस्तीर्णो भवति पंच अमात्यः वलगं निचखान निखनंति।।"

परन्तु वाजसनेयि संहितायां उवटभाष्ये देवराजोद्धृता पंक्तिः न दृश्यते तत्र कुनहनराजा महोदयेन प्रश्नोऽयं उपस्थापितं यत् देवराजेन कदाचित इयं पंक्तिः उवटस्य ऋग्वेदभाष्याद् तु न उद्धृता। पं. भगवद्दत्तेन डॉ. राजस्यास्य मतस्य खण्डनमकुर्वन कथितम् यत् उवटस्य ऋग्वेदस्योपरि कोऽपि भाष्यमपि आसीत् इति सिद्ध्यर्थं डॉ. राजस्यालेखः अपर्याप्तः वर्त्तते।[56]

निष्कर्षरूपेण उवटाचार्यस्य भाष्यः वाजसनेयि संहितायाः ऋक् प्रातिशाख्यवाजसनेयि प्रातिशाख्ये तथा ऋक् सर्वानुक्रमणी ग्रन्थोपरि वर्त्तते । इति दिक् ।

उवटाचार्यस्य भाष्यशैलीः

वाजसनेयि-संहितायाः भाष्यस्य आरंभे पूर्वमेव उवटेन भूमिकायां स्वव्याख्या पद्धतिम् व्याख्याधर्मं च सुस्पष्टीकृतम् । भूमिकायामेव उवटस्य परिष्कृत् भाष्य शैल्याः निदर्शनं दृश्यते यतः तेन स्वकीय भाष्ये प्रायः एतेषां व्याख्या धर्मस्य परिपालनं कृतम् । उव्वटस्य इयमेव वैशिष्ट्यं वर्त्तते यत् तेन स्वशैल्याः संकेतं सूत्ररूपेण आरंभे एव प्रदत्तमस्ति। उवटस्य व्याख्याधर्मः वस्तुतः बृहद्देवता द्वारा पूर्वनिर्धारित सिद्धान्तानां उपरिमेव आधारितः अस्ति। व्याख्यायां वस्तुतः उबटेन प्राचीन भाष्यव्याख्या परंपरायाः परिपालनं एव कृतमस्ति ।

उवटस्य भाष्यशैली

उवटेन मंगलाचरणश्लोकैः इदं स्पष्टीकृतं यत् तस्य भाष्यस्य आधारः गुरु तर्कः शतपथब्राह्मणं च विद्यते। एतेषांमेव अनुसारेण तेन मन्त्राणां ऋषिच्छन्द देवानां सुस्पष्टं निदर्शन कृतमस्ति।[57] तेनेव प्रकारेण तत् ऋक्यजुसामथर्वपदानां वाक्यानामपि अर्थम् स्पष्टीकरोति। अस्य विपरीतं तेन श्रुतीनां याज्ञिक कर्मणा अर्थवादम् अपि उपर्युक्त तर्कादिनां द्वारा स्पष्टीकर्त्तुम् प्रयत्नं कृतम् अस्ति।[58] गुरूरित्यनेन उवटस्य अभिप्रायः गुरुप्रदत्ता विद्याऽस्ति। तर्केण तस्य अभिप्रायं तर्कपूर्ण विचारेन वर्त्तते। उवटस्य मतानुसारेण प्रत्येक मंत्रस्य ऋषिच्छन्ददेवतायाः परिज्ञानं आवश्यकं वर्त्तते। ऋषिः किम् अस्ति? उवटेन वाजसनेयि संहितायाः भूमिकायां इदम् स्पष्टीकृतम् यत् सृष्ट्यादौ विशिष्ट कर्मजनित स्मृतिसंस्कारादि कर्मैयुक्तः, सुप्तप्रबुद्धन्निव याः विद्यायाः अभिव्यक्तिः सृष्टिघटनायाः स्मर्त्ता द्रष्टा मन्त्रद्रष्टा यः आदि हिरण्यगर्भः वर्त्तते सैव ऋषिः। यस्यः स्तुतिर्भवति तथा च यस्य हविभोक्ता भवति सः तत्रत्यः देवता भवति। उवटेन जड़ पदार्थानामपि देवत्वमुपचारेण स्वीकृतम् ।

उवटस्य मतेन प्रत्येक मन्त्रस्य ऋषि देवतारिक्तं छब्दानामपि परिज्ञानं आवश्यक विद्यते। छन्दोज्ञानस्य महत्त्वं स्पष्टीकर्त्तुम् उवटेनमिदं ब्राह्मणमुद्धतम् यत्-दक्षिण दिशि असुरानां त्वष्टापुत्रान्ः[59] राक्षसान् त्रैष्टुभेन नश्यति अतः वज्रमेव त्रिष्टुपमस्ति। अग्रे द्वादशाक्षराणां गायत्र्यः भवन्ति। एतेन इदं सुस्पष्टं भवति यत् छन्दानां परिज्ञानं यस्य नास्ति सः ऋचां अग्निदेवतायाः इदम् विशिष्टं सम्बन्धमपि ज्ञातुं न शक्नोति।[60]

ऋक् यजुषः स्तुत्य देवानां सह अविच्छेद्य सम्बन्धो भवति अतः विशिष्ट ऋक् यजुष् तस्य देवतायाः प्रतिरूप एवास्ति। एतदर्थं देवज्ञान निमित्तं ऋक् यजुषः ज्ञानमपि आवश्यकमस्ति।[61] उवटेन पदवाक्ययोर्ज्ञानंमपि मन्त्रार्थज्ञानार्थं आवश्यकं मन्वते। पदवाक्ययोंः उव्वटेन सुविस्तृतं व्याख्यानं कृतमस्ति। भूमिकायाः अन्ते उवटेन "अथ व्याख्याधर्मा इत्युक्त्वा केचन विशिष्ट नियमानां उल्लेखः कृतः । उवटः व्याख्याननिमित्तं व्याख्येय अंशस्य व्यवस्था प्राथम्येन स्वीकृतम् । तदनुसारं व्याख्या काले अतिरिक्ति पदान् परित्यक्तव्याः, अनुपस्थित पदानां वाक्ये समावेशः कर्त्तव्यः अपि च दूरस्थ शब्दान् समीपे आनेतव्याः । तत्पश्चात् शब्दानां क्रमं यथोचितरूपेण व्यवस्थापितव्याः–

अतिरिक्तं पदं त्याज्यं हीनं वाक्ये निवेशयेत् ।
विप्रकृष्टं तु संदध्यादानुपूर्व्यं च कल्पयेत् ॥[62]

व्याख्येय अंशानां व्यवस्थायामेव हि उवटेः लिंगधातु विभक्तिनाञ्च सन्नमनं कर्त्तुम कथयतिः–

"लिङ्गं धातुं विभक्तिं च योज्यं वाक्यानुलोमतः ।
यद्यत्स्याच्छान्दसं मन्त्रे तत्तत्कुर्यात्तु लौकिकम् ॥"[63]

अर्थात् लिंगधातु विभक्तिनामपि ग्रहणं स्वस्व स्थाने भावानुकूलम् करणीयम् कस्मिश्चित् मन्त्रेयद् वैदिकं स्यात् तत लौकिकरूपेण गृहणीयात् ।

एतासु विभक्ति सन्नमनपद्धति यास्काचार्यसदृशं प्राचीनमस्ति।[64] उवटेन एकैकं कृत्वा उपर्युक्त व्याख्याधर्मान् उदाहरण द्वारा सुस्पष्टीकृताः।

अतिरिक्ति पदानां त्यागः–मन्त्रे समागतं अतिरिक्तं पदं त्यक्तव्यम् । इदं स्पष्टी कर्तुम् उवटेन–"इमा नु कं भुवना सीषधाम[65]" इत्युदाहरणं प्रदत्तमस्ति। अस्मिन् मन्त्रे "कम्" अनर्थक निपातः अस्ति अतः वाक्यार्थे "कम्" इति त्यक्तम् ।

अनेन उद्धरणेन दं प्रतीयते यत् पादपूरण निपातमेव उवटः अतिरिक्तं पदं मनुते ।

अनुपस्थित पदानां वाक्ये निवेशः–अस्योदाहरणं उवटेन "अस्मादन्नादिति भागम वेक्षते"[66] इति प्रदत्तम् । इदं कात्यायन श्रौतसूत्रस्य वचनम् अस्ति। एतदनुसारेण यजमान "अस्माद् अन्नात्" इत्यादि[1] मन्त्रेण भागं पश्यति । परन्तु "अस्मादन्नात" मन्त्रस्य पूर्ति तस्मिन् मन्त्रे एवं पूर्वेमागतेन "निर्भक्त" इत्यादि शब्देनैव भवेत् । दूरस्थ पदान सन्निकटे आनेतव्यम्– इदं स्पष्टीकर्तुम् उवटेन "सं रेवतीर्जगेतीभिः पृच्यताम्[67] इत्युदाहरणं प्रदत्तम् । अत्र "सं" अस्मिन् दूरस्थ उपसर्गं वाक्यार्थे "पृच्यताम्" क्रियायाः सन्निकटे स्थापितव्यम्। अनेन प्रकारेण सम्पच्यताम् शब्दः निर्मितः भविष्यति।[68]

परन्तु यावत् उपसर्ग क्रियां च सन्निकट मानेतुम् प्रश्नोऽस्ति इयं कोऽपि व्याख्यागत वैशिष्ट्यम् नास्ति यतः व्याकरणस्य नियमानुसारं इदं अत्यन्तं[69] स्वाभाविकमस्ति। वस्तुत इदमानुपूर्व्य धर्मान्तर्गतेरेव स्थास्यतियतः तत्रापि इतस्ततः विकीर्ण दूरस्थ पदान् आवश्यकतानुसारं सन्निकटं आनयनं भवति ।

व्यस्थितानुपूर्वीः-

पदानामानुपूर्वीः यथोचितरूपेण भवेत् एतमुदाहरणद्वारा उवटेन स्पष्टीकृतम्–"मा नो मित्रो वरूणो अर्यमायुः। उ. अत्र मन्त्रस्योत्तरार्धः "यद्वाजिनो देवजातस्य" व्याख्यानपूर्वमेव कर्त्तव्यम् । मन्त्रस्यास्य भाष्ये उवटः वदति यत् उत्तरार्धे यत् शब्दस्य योग कारणात् अस्य व्याख्यानं पूर्वम् भविष्यति।[70] अस्यैव नियमस्य अनुसरणं कुर्वन् उवटेन स्वभाष्ये पदानां आनुपूर्वी संरक्षितम् । वाजसनेयि संहितायाः 1/22 मन्त्रे[71] आगते "वर्षिष्ठेऽधिनाके" इत्यस्य भाष्यंमकुर्वन उवटः "वर्षिष्ठे नाके अधि" अन्वयं कृत्वा भाष्यम् करोति ।[72]

व्यत्यय–

आचार्य उवटेन मन्त्राणां अर्थं स्पष्टीकर्त्तुम व्यत्ययस्य अत्यधिकः आश्रयः स्वीकृतः। भूमिकायां व्याख्याधर्मान् स्पष्टीकर्त्तुम् उवटः कथयतियत् लिंग धातु विभक्त्यामर्थं संगतिदृष्ट्या परिवर्त्तनीयं स्यात्-लिङ्ग धातुं विभक्तिं च योज्यं वाक्यानुलोमतः।[73] एतान् त्रिप्रकारकान्

व्ययत्ययान् उबेटेन उदाहरणानाम् माध्यमेन स्पष्टीकृतम् । किन्तु वाजसनेयि संहिताया भाष्ये उवटेन अन्य प्रकारकानां व्यत्यायानां अपि आश्रयः गृहीतः। वाजसनेयि संहितां धारेण व्यत्ययानां निम्न प्रकारेण विभागः कर्तुम् शक्यते।

लिंग-व्यत्ययः—लिंगस्य वाक्यानुसारं परिवर्त्तनम् करणीयम् यथा—पवित्रे स्थो वैष्णव्यौ"।[74] अस्मिन् मन्त्रे पवित्र शब्द नपुंसकलिङ्गेऽस्ति। वैष्णव्यौ शब्दस्तु पुल्लिंगेरस्ति। अत्र "वैष्णव्यौ" इत्यस्यैव सन्नति भविष्यति यतः पवित्रे लिंग आविष्टः अस्ति अर्थात् पवित्र शब्दस्यलिङ्गं निश्चितम् अस्ति।

वाजसनेयि संहितायां 2.5/23 मन्त्रे[75] अदिति माता पिता पुत्रत्वेनापि च स्तुतोऽस्ति। अस्य मंत्रस्यभाष्ये उबटेन अदितिर्मध्ये पितृत्व, पुत्रत्वम् अकथन सर्वनम स्त्रीलिंगे न अपितु पुल्लिंगे स्थापितम् इत्येव लिंग-व्यत्ययः वर्त्तते यस्य सङ्केतमुवटेन कृतमस्ति। (2)

धातु व्यत्ययः—धातुः धात्वर्थानां च सन्नति भवेत् यथा—"अग्रगुवो अग्रेपुवः"[76] अत्र अग्रेपुव पिबति (पा धातोः) इति रूपम् अस्ति अथवा पवति (पूञ्धातुः) इत्यस्य रूपमस्ति। सन्देहस्थितौ श्रुतिरेव प्रमाणम् ।[77] प्रकटरूपेण "अग्रेपूः" शब्दे पूधातु दृश्यते। अत्र धातु सिध्यर्थमुवटेन शतपथब्राह्मणात् श्रुतिरुद्धृता—"ता यत्प्रथमा सोमस्य राज्ञो भक्षयन्तीति।[78] अस्याश्रुत्या धारेण पानार्थकः 'पा' धातोः रूपम् अस्ति ।

विभक्ति-व्यत्ययः—विभक्ते सन्नमनम् करणीयम् । यथा—"कस्मै देवायहविषा विधेम्[79] अत्र "हविषा" तृतीयान्तः अस्ति किन्तु वाक्यसंयोगे अस्य द्वितीयायां सन्नमनम् भविष्यति।

उवटाचार्येण वाजसनेयि संहितायां अनेकधा चतुर्थ्यन्त शब्दानां अर्थं षष्ठीपरकं कृतमस्ति। उवटः स्पष्टरूपेण पाणिनिः अनुसरणं करोति।[80]

वाजसनेयि संहितायाः 25/14 मन्त्रे[81] समागते "आदित्यै' इन्द्राण्यै एतेषां चतुर्थ्यन्त शब्दानाम् अर्थम् उवटे षष्ठयर्थे कृतमस्ति—"पञ्चमी पक्षतिः आदित्याः । षष्ठी पक्षतिः इन्द्राण्याः"। उवट द्वारा कृतः व्यत्यय अत्र उचितः प्रतीयते यतः मन्त्रे मरुतादि देवानां नाम षष्ठयन्तो विद्यते। तथा च अत्र "पक्षति" इत्येतेन सह देवतायाः सम्बन्ध कारणात् षष्ठीरेव अपेक्षितः अस्ति ।

अन्यत्रापि अनेक स्थलेषु उवटेन षष्ठयर्थे चतुर्थीरिव प्रयुक्तः। वाजसनेयि संहितायाः 4/24 मन्त्रे[82] आगते सोमाय इति चतुर्थ्यन्त शब्दस्य अर्थ उवटः सोमस्य कृत्वा षष्ठ्यर्थे विधानं करोति। उवटेन वाजसनेयि संहितायाः 25/39 मन्त्राणां[83] भाष्ये "अर्वन्तम्" इति द्वितीयान्त शब्दस्य स्थाने चतुर्थ्यन्त "अर्वते अश्वाय ।। इति विभक्ति व्यत्ययः स्वीकृतम्।[84] अत्र उवट द्वारा कृत व्यत्यय उचितमेव प्रतिभाति यतः मन्त्रस्य पूर्वार्द्धे अश्वनिमित्तं चतुर्थी विभक्त्याप्रयोगः विहितः अतः उत्तरार्द्धेऽपि चतुर्थी परक अर्थमेव उचितः प्रतीयते।

वाजसनेयि संहितायाम् 5/7 मन्त्र[85] स्योत्तरार्द्धे समागतः "ऋत-वादिम्यः इत्यस्थाने उवटेन "सत्यवादिनाम्" इति विभक्ति व्यत्यय[86] अङ्गीकृत्तम् । अत्रापि षष्ठ्यर्थे चतुर्थी इति नियमः वर्त्तते।

अनेनैव प्रकारेण वाजसनेयि संहिताया 7/41[87] तमें मन्त्रे प्रयुक्तः "विश्वाय" इति चतुर्थ्यन्त शब्द स्थाने उबटेन षष्ठयन्त विश्वस्य इति विधानं कृतमस्ति।[7]

वाजसनेयि संहितायाः 8/23[88] तमें मन्त्रे आगतः सूर्याय शब्दस्यार्थः उवटः सूर्यस्य करोति।[89] इत्यत्रापि चतुर्थी विभक्तिं षष्ठ्यर्थे स प्रयुञ्जति ।

षष्ठी इत्यर्थे चतुर्थ्याः प्रयोगः न केवलं उवटेनैवकृतम् अपितु वैदिक साहित्ये यत्र तत्र एतादृशः प्रयोग वर्त्तते यत्र षष्ठयर्थे चतुर्थ्याः प्रयोगः दृश्यते। पारस्कर गृह्यसूत्रे "अघास्यै दक्षिणं हस्तं गृह्णाति साङ्गुष्ठम्"[90] इत्यत्र अस्याः स्थाने अस्यै इत्यस्य प्रयोगः दरीदृश्यते। अन्यत्रापिवैदिक वाङ्मये अनेके एतादृशाः प्रयोगाः वर्त्तन्ते अतः चतुर्थीमपि षष्ठ्यर्थे परिज्ञानं नास्ति व्यत्ययस्य श्रेण्या स्यात् । इदं प्रतीयते यत् इदं वेदस्य सर्वमान्यं सुप्रतिष्ठितं प्रयोगः आसीत् । वाजसनेयि संहितायां प्रयुक्ता एतादृश प्रयोगाः संहिताकालेऽपि प्रचलिता आसन् । डॉ. रामगोपाल महोदयेन एषां प्रवृत्तिः केवलं ब्राह्मणेष्वपि दर्शिता एतेन एतस्य क्षेत्र संकुचितः जायते।[91]

वाजसनेयि संहितायाम् 21/55 इति मन्त्रे[92] समागते इन्द्राय शब्दस्थाने उवटेन "इन्द्रे इन्द्रस्य वेति" इति द्वय व्यत्ययः मनुते। रेतस, अमृतम रूपम् जनित्रम् च यज्ञां इन्द्रनिमित्तं स्थापितम कुर्यात् ।[93] अस्मिन् प्रसंगे इन्द्राय इति चतुर्थी स्थाने इन्द्रे अर्थात् इन्द्रे स्थापितं कुर्यात् अथवा इन्द्रं स्थापितं कुर्यादिति व्यत्ययस्य आवश्यकता एव न प्रतीयते यतः चतुर्थी विभत्त्यापि अर्थं स्पष्टं भवति ।

वाजसनेयि संहितायाः 21/24 मन्त्रस्य[94] भाष्ये उवटेन "पञ्चदशे इत्यस्य स्थाने "पञ्चदशेन" इदं विभक्ति व्यत्ययं स्वीकरोति। पंचदशतमे स्तोमेत स्तुतः रुद्रदेवता इन्द्रे यशसहितं बलं वयं च स्थापितं कुर्यात् ।[95] अस्मिन् प्रसंगे सप्तम्यन्त पञ्चदशेनव अर्थस्यपुष्टिर्भवति अतः उवटेन कृतं व्यत्ययं सम्यक् न प्रतीयते ।

अनेनैव प्रकारेण वाजसनेयि संहितायाः 21/25[96],26[97], 27[98],28[99], तमें मन्त्रेषु उवटेन "सप्तदशे, एकविंशे, त्रिणवे तथा चत्रयस्त्रिंशे इत्यस्य स्थाने सप्तदशेन एक विंशेन त्रिणवेनत्रयस्त्रिंशेन इत्ययोः तृतीया विभक्तौ व्यत्यय; स्वीकृतौ । किन्तु एतेषुस्थलेषु व्यत्ययस्य आवश्यकतारेव न प्रतीयते।

(4) वचन व्यत्ययः वाजसनेयि संहिताया 25/31 मन्त्रे सर्वाताते अपि देवेष्वस्तु' अस्मिन् अंशेवचनव्यत्ययः स्वीकृतः। अत्र 'सर्वाणि तानि' इत्यस्य बहुवचनत्व कारणात् उवटेन "अस्तु" स्थाने 'सन्तु' इति बहुवचनम् स्वीकृतम्[100] एषः व्यत्यय सर्वथा उचितः वर्त्तते।

(5) उपसर्ग व्यत्ययः- वाजसनेयि संहितायाः एकादशे एकाशीतितमे[101] मन्त्रे संशितम् शब्द उवटेन उपसर्ग व्यत्ययः स्वीकृतम् । उबटेन अत्र "सम्" स्थाने नि उपसर्गं स्वीकृत्य इदं "निशितं" शंब्दं स्वीकरोति अत्रतेव "शो तनूकरणे" धातुः कथितम् अस्यार्थः तेनतीक्ष्णीकृतमिति. कृतमस्ति।[102]

किन्तु अत्र व्यत्ययः नास्ति उचितम् यतः संशितं निशितं इत्यनयोऽर्थे नास्ति भेदः। संशितं इत्यस्यापिऽर्थं तीक्ष्णीकृतम् निशितं इत्यस्यापितदेवार्थः। अतः अत्र उपसर्ग व्यत्ययस्य किमपि प्रयोजनमेव नास्ति ।

यद्यपि अन्यत्रापि अनेकस्थलेषु उवटेन व्यत्ययं स्वीकृतम् किन्तु तेषां आधिक्यकारणात् केचन एव उदाहरणरूपेण प्रस्तुताः। स्थालीपुलाकन्यायेन एतेषांमुदाहरणेन इदं स्पष्टं भवति यत् उवटेन अनावश्यकमपि व्यत्ययस्य आश्रयः गृहीतः ।

वैदिक प्रयोगानां लौकिकरूपे परिवर्त्तनम्

उवटस्य मान्यताऽस्ति यत् मन्त्रे ये "छान्दस्" वैदिक प्रयोगाः भवन्ति तेषां स्पष्टीकरणं लौकिक शब्दानां माध्यमेन भवेत् ।[103]

यद्यपि उवटेन अस्य कोऽपि उदाहरणं भूमिकायां न प्रदत्तम् वस्तुत इदमपि व्यत्ययस्येव एकः प्रकारोऽस्ति अतएव उबटेन एतस्य उदाहरणस्य आवश्यकतामपि न स्वीकृता। किन्तु वाजसनेयि संहितायाः भाष्ये सः वैदिक प्रयोगानां लौकिक रूपं कृत्वैव अर्थं करोति। यथा- वाजसनेयि संहितायाः 2/13 मन्त्रे[104] आगतः "देवासः" अस्य वैदिक प्रयोगस्य स्थाने देवाः लौकिक प्रयोगं कृत्वा उवटेन अर्थः स्पष्टीकृतः यत् सर्वेदेवाः एतेन यज्ञेन प्रसन्नाः भवन्तु।[105] सामान्यरूपेण उवटेन उपर्युक्त व्याख्याधर्मरूपेण भूमिकायां स्पष्टीकृतम् किन्तु तस्य भाष्यानां अध्ययनेन व्याख्या पद्धते अन्येऽपि संकेताः लभ्यन्ते।

अध्याहारः अनुषंगत्वञ्च-

वाजसनेयि संहितायाः प्रथमाऽध्याये प्रथम–[106]मन्त्र स्य भाष्ये उवटः कथयति यत् मन्त्रार्थे यदि आख्यात पदं न स्यात् तदा आख्यातस्य अध्याहारं अनुषंग वा कृत्वा वाक्यस्य पूर्त्तिः करणीया। अध्याहार अनुङ्गयोर्भेद मपि उवटेन स्पष्टीकृतम् । उवटस्यानुसारेण अध्याहारः लौकिकः भवति।

वाजसनेयि संहितायाः 1/11[107]मन्त्रस्य भाष्ये उवटेन भूताय त्वा नारातये" इत्यत्र आख्यातस्य अनुपस्थिति कारणात् "परिशेषयामि" आख्यातस्य अध्याहारं करोति।[108]

"इषे त्वोर्जेत्वा" इत्यस्नि् मन्त्रो आख्यातः नास्ति अत अत्र अन्यस्यां शाखायां पठितेन आख्यातेन वाक्यपूर्त्तिः कृतास्ति।[109] "छिनद्धि" अस्य आख्यातस्य अध्याहारो विधेयः । अनेननैव प्रकारेण "ऊर्जेत्वा इत्यनेन सह संनमयामि इति अध्याहार; कर्त्तव्यमीति। अत्र 'छिनद्मि" "संनमयामि" इत्यनयोः मन्त्रावयवात् पृथक् कारणाद् एषः अध्याहार एवोच्यते।

अनुषंगस्तु मन्त्रस्यावयवरेव भवति। वाक्य पूर्ति निमित्तं मन्त्रे समागतानां शब्दानामेव पुनर्ग्रहणं स्यात्। यथा–"अस्मादन्नात्[110] एषः मन्त्रांशः क्रियापद भाव कारणात अपूर्णोऽस्ति। अतः अत्र अस्मिन्नेव मन्त्रे पूर्वोक्तः "निर्भक्तः" इति शब्दं गृहीत्वैवऽस्याः पूर्तिः करणीयः। एतेनैव प्रकारेण "अस्यै प्रतिष्ठायां" अस्य वाक्यस्य अपूर्णता कारणाद् अत्रापि निर्भक्त; इति योजनीयः।[111]

व्युत्पत्ति-

उवटेन मन्त्रार्थस्य स्पष्टीकरणे व्युत्पत्तिमपि एका पद्धतिरूपेण स्वीकृता । वाजसनेयि संहिताया 1/1 मन्त्रस्य भाष्ये सः स्पष्टीकरोतियत् "शब्दार्थ सिद्धे सत्यपि अभिधानाभिधेयभावं क्रियया स्पष्टीकर्त्तुं व्युत्पत्तिर्भवति। उवटानुसारेण व्युत्पत्ति वस्तुतः मगधाधिपति सदृशं तस्मिन् अभिधेयेरेव स्थितः तिष्ठति। इदं स्पष्टीकृत्वा उवटः ब्रूते यत् येन प्रकारेण मगधाधिपतिः मगधदेशे अर्थात् तस्मिन् जनपदे आधिपत्यं भवति किन्तु अन्य देशोपरि कान्यकुब्ज इत्यादिनां उपरि तस्य स्वामित्वं न भवति। तेनैव प्रकारेण अत्रापि तस्य शब्द-विशेषस्य अभिधेये एव क्रियायाः प्रवृत्तिर्भवति सर्वत्र न[112] अर्थात् शब्दस्य वाच्यार्थमपि क्रियादिनां द्वारा तस्यार्थः स्पष्टी कर्त्तव्यः। व्युत्पत्तेः फलमपि उवटेन प्रतिपादितम् । तन्मते श्रुतौ व्युत्पत्ति कारणाद् जायमानं शब्दज्ञानम् अभ्युदयस्य कारणं भवति। उवटः प्रणीता (जल) शब्दस्य निर्वचन द्वारा फलं दर्शयितुं कथयति यत् यः जनः प्रणीता (जलस्य) प्रणीतात्वं निर्वचन प्रक्रियां जानाति सः प्रतिष्ठितो भवति।[113]

एतेनैवप्रकारेण पुरुष शब्दस्य व्युत्पत्तेः महत्त्वमपि उवटेन ब्राह्मणस्य[114] उद्धरण द्वारा स्पष्टीकृतम् यत् येन सर्व पापं विनष्टीकृतम् अतः सः पुरुषोऽस्ति। यः जनः इदं जानाति ज्वालयति अर्थात् पराजयति सः प्रथमं उत्कृष्टं भवितु इच्छति।[115] उदाहरणद्वयेन उवटः स्पष्टीकरोति यत् येन प्रकारेण स्थाल्याः एकं पक्वं तण्डुलं परिदृश्यते तथैव व्युत्पत्तिमपि उदाहरणरूपेण स्पष्टीकृता । अन्येषां अभिधेयानामपि एतेन प्रकारेण व्युत्पत्ति माध्यमेन स्पष्टीकरणं स्यात।[116]

एतदतिरिक्तं उवटेन स्वरादिनां अपि भाष्यार्थं उपयोगिता प्रतिपादित। अस्या पुष्टिकरणे तेन एका उक्तिमपि उद्धृता यत् "स्वरो वर्णऽक्षरंमात्रा तत्प्रयोगोऽर्थ एव च। मन्त्रं जिज्ञास मानेन वेदितव्यं पदे पदे।[117]

सामान्य रूपेण उपर्युक्ताः व्याख्या पद्धतिः उवटेन अङ्गीकृता तस्य भाष्यमपि एतस्यां शैल्यांमेव आधारितासन्ति । किन्तु तस्य भाष्ये इतोऽपि वैशिष्ट्यानि सन्ति।

भाष्यशैल्याः वैशिष्ट्यम्-

परम्परागत अर्थः–उवटेन स्वभाष्येषु ब्राह्मणानां श्रौतसूत्रानां च कर्मकाण्डाधारित परम्परागत अर्थानामुपरि एवं ध्यानम् प्रदत्तम् । वस्तुतः सः कर्मकाण्डीय परम्परायाः पोषकः आचार्यः दरीदृश्यते।

सप्रमाण पुष्टिः-

उवटेन स्वभाष्येषु सर्वत्र श. ब्रा. का. श्रौ. सूत्रम् निरुक्तम् पाणिनेः ज्योतिषशास्त्रानां उदाहरणं स्ववाक्यं विचारानां पोषणार्थं प्रदत्तमस्ति। किन्तु उवटः प्रायः एतेषां ग्रन्थानां ग्रन्थकारानाञ्च नामोल्लेखः न करोति अपितु सः सर्वत्र "इतिश्रुतिः[118] इति ज्योतिः शास्त्रोक्तेः[119] इत्येव कथयति। बहुत्र सः का. श्रौ. सूत्रे निरुक्तादि ग्रन्थेषु आगतानां सिद्धान्तानां सारमात्रं दत्त्वा तेषां ग्रन्थानां सङ्केतमपि न करोति। इत्यस्य कारणम् सम्भवतः इदं अस्ति यत् उवटस्य समये एताः श्रुतयः तावत् सर्वविदिताः आसन् यत् तेन तेषा मुद्धरण सङ्केतदानस्य आवश्यकतामेव न ज्ञातम् ।

संक्षिप्ताभाष्य शैलीः

उवटेन अनावश्यक भाष्य विस्तारं न कृतम् । यदि एकमेव मन्त्रः द्विवारं आगच्छति तदा सः तस्य पुनर्व्याख्यानं न करोति। एतेन उवट पुनरुक्ति दोषेण मुक्तः वर्त्तते एतेनैव प्रकारेण एक बारं व्याख्यात शब्दानामपि सः प्रायः पुनः अर्थम् न करोति, सरल मन्त्राणां भाष्यमपि तेन अनेक बारं "सुगम व्याख्यानम्" स्पष्टार्थः वा कथयित्वा परित्यक्तम्।[120] मन्त्रे आगतानां आख्यानानां[121] उवटेन संकेतमात्रं प्रदत्तम् येन भाष्यस्य अनावश्यकः विस्तारः न भवेत्।

उदार दृष्टिकोण :—

उवटः कर्मकाण्डी भाष्यकारो वर्त्तते अतः तस्य कर्मकाण्डपरकं अर्थावबोधनं अति स्वभाविको वर्त्तते किन्तु मन्त्रार्थं करणसमये सः अति उदार दृष्टिकोणं अनुसरति। सः मन्त्राणां दार्शनिकं आध्यात्मिक पक्षानामपि उपेक्षां न करोति। कर्मकाण्ड प्रसंगेऽपि तेन मन्त्राणां दार्शनिक पक्षानामपि यथासंभव व्याख्यानं कृतम् ।

स्वभाष्ये सः न केवलं शब्दार्थमेव अपितु स्व उदारदृष्टिकोणस्य परिचयं अपि प्रददाति। यत्र तत्र मन्त्रेषु समागतानाम् अलङ्कारादि नामपि परिचयं उदारतापूर्वकं प्रददाति। सः एतदतिरिच्य तेन पशूनां मनोवृत्तिनां प्राकृतिक तत्त्वानां रात्र्यादिनां स्वभावस्यापि संकेतम् यत्र तत्र प्रदत्तम् ।

प्रातिशाख्यानामाधारेण उवट भाष्यस्य वैशिष्ट्यानि

उवटेन स्वभाष्यस्य अनावश्यकः विस्तारः न कृतः । सः सूत्रम् सूत्र शैल्यामेव स्पष्टीकरोति। तेन वाजसनेयि प्रातिशाख्यस्य "प्रयतः शुचिरुच्यते[122] इति सूत्रस्य अर्थः सरल भाषया कृतमस्ति यत् प्रयतः इत्यस्य अर्थः पवित्रमितिरस्ति। केन प्रकारेण पवित्रो भूत्वा अध्ययनं कुर्यात् एतस्य स्पष्टीकरणं उवटेन कृतम् यत् पादशौच आचमनादि द्वारा पवित्रो भूत्वा अध्ययनं कुर्यात् ।[123]

अत्र प्रत्येकः शब्दः तावत् स्पष्टः वर्त्तते यत् व्याख्येय किमपि अवशिष्टः न तिष्ठति।

आलोचनात्मक शैली :-

उवटेन स्वभाष्ये आलोचनात्मक शैलीम् अंगीकृतम् यथा ऋग्वेद प्रातिशाख्यस्य 1/62[124] ऋते नतोपाचरितक्रमस्वरान्'' इत्यस्य भाष्ये तेन कस्यापि पूर्ववर्ती आचार्यस्योदाहरणं दत्वा प्रतिपादयति यत् तेन णत्व विधानार्थं पितृयाणम्[125] इति उदाहरणं प्रदत्तम् । तदनुसारं ''अप्रत्याम्नाये पदवच्च पद्यान्''[126] इति सूत्रेण अस्मिन् समस्तपदे यत् पदवद्भावः प्राप्यते पुनश्च णत्वं न भवति तस्य णत्वाभावस्य निषेधः प्रस्तुत शैली सूत्रे ''ऋते नतोपाचरति क्रमस्वरान्'' द्वारा कृतास्ति। अर्थात् तदनुसारं पितृ यानम् चेति द्वयानां पदानां पदवद्भावस्य निषेधं कृत्वा इत्येतान् एकपदं मत्वा समान पद कारणात ''णत्वं'' भवति। परन्तु उवटानुसारेण इदं उदाहरणं उचितं नास्ति। यतः प्रस्तुत सूत्रद्वारा केवलं तत्रैव मूर्धन्य भावस्य निषेधः भविष्यति यत्र पदेष्वपि समानरूपेण किमपि कार्यं विहितं स्यात् । अस्योदाहरण निमित्तं स्वयं सूत्रकारस्य पद्य सम्बन्धी एवं विशेष सूत्रम णत्वस्य विषये विद्यमानं अस्ति।[127]

उवटस्य विवेचनेन इदं स्पष्टं वर्त्तते यत् तस्य पार्श्वे प्रातिशाख्यानां समस्तं रूपं स्फुटम् आसीत। एतदर्थं तेन प्रत्येक सूत्राणां विशेष कार्यं महत्त्वस्योपरि विशिष्टमवधानं दत्तमस्ति।

सप्रमाण पुष्टिः—

आचार्य उवटेन प्रातिशाख्ये समागतान सूत्रान् उदाहरणादि द्वारा स्पष्टीकृतम् । यत्र तत्र स्व मतस्य पुष्ट्यै तेन अन्येषाम् आचार्यानां मतम् अपि उद्धृतम् । किन्तु तेषाम् आचार्यानां नामादि प्रायः स उद्धृतं न करोति। एंतदर्थं सःप्रायः ''तथा चोक्तम्'' इत्यादि प्रयोगं करोति। किन्तु यत्र कुत्रापि सः नामोल्लेखपूर्वकं अपि उद्धरणं ददाति। यथा-तथा चोक्तं याज्ञवल्क्येन।[128]

सूत्रकार प्रतिपादित मतानां स्थापनम्-उवटेन सूत्रकाराणां सिद्धान्तं प्रातिपाद्य सूत्रान् स्पष्टीकरोति। एतदर्थंसः पूर्वपक्षादिनां प्रश्नानां उत्तर प्रत्युत्तर द्वारा सूत्रकारस्य सिद्धान्तान् स्पष्टीकरोति। यथा ऋग्वेद प्रातिशाख्ये 1/3[129] सूत्रस्य भाष्ये उवटः कथयतियत् ये समानाक्षर संध्यक्षर संज्ञकाः वर्णाः सन्ति ते स्वरसंज्ञकाः ज्ञातव्याः।[130]

सूत्रकारस्य अस्य कथनस्योपरि पूर्वपक्षेन आक्षेपं कृतमस्ति यत् वर्णमालाया उपदेशं विनैव ''आदौ अष्ट (वर्णाः) समानाक्षरा; सन्ति'' इदं कथं कथितम् ? यतः उपदिष्ट स्येव (वस्तुः) ''आदौ'' इति प्रकारेण उल्लेखः उचितोऽस्ति। अनुपाछिष्टस्य (वस्तु) नास्ति। एतेन प्रकारेण पश्चाद्वर्त्ती चत्वारः संध्यक्षराः सन्ति, इति उल्लेखः नास्ति उचितम् ।[131]

अस्य उत्तरे सूत्रकारस्य समर्थनम् अकुर्वन् उवटः कथयति यत् ''नैष दोषः। उपदिष्टो वर्णसमाम्नायो लौकिको विद्यते। तत्र यावन्तो वर्णा अस्यां शाखायामुपयोक्ष्यन्ते तावतां संज्ञां कर्तुं तमेव वर्णसमाम्नायमुररी कृत्याह-''अष्टौ समानाक्षराण्यादितः'' तथा तामेवानुपूर्वीमङ्गीकृत्य-''चत्वारि संध्यक्षराणि' इत्युत्तर शब्दमाह।

लौकिक वर्णमालाया; प्रसंगे पूर्वपेक्षेन पुनः शंका कृता यत् ननु यदि लौकिकोऽत्र वर्णसमाम्नायो गृह्यते एवं तर्हि तयानुपूर्व्या भवितव्यम् । तत्र ऊकारात परौ ऋकारौ समामनन्ति- उ, ऊ, ऋ ॠ इति। ऐकारात्पूर्व मेकारमौकारातपूर्वमोकारम्-ए ऐ ओ औ इति। सकारात्परं हकारं समामनन्ति-श, ष, स ह इति।

उपर्युक्त प्रश्नानां समाधानं कुर्वता उवटाचार्यः वदति एतत् सत्यमस्ति यत् लौकिक वर्णमालायाः ग्रहणं लौकिक क्रमेणैव कर्त्तव्यम् । आचार्यस्य प्रवृत्या (लौकिक वर्णमालायाः) क्रमस्य अन्यथा अनुमानं करणीयम् । इत्येव तथ्यं उवटः अन्यत् सूत्रम दत्वा स्पष्टी करोति यत् सत्यम् । आचार्य प्रवृत्त्यां क्रमोऽन्यथानुमीयते। तद्यथा–"ऋकारादयो दशनामिन स्वराः (ऋ. प्रा. 1/65) इति सम्पद्यन्ते। तथा "संध्येष्वकारोऽर्धमिकार उत्तरं युजोरुकारः (ऋ. प्रा 13/39) इति। यदि ए, ओ, ऐ, औ एवं पाठो भवति तदानीं युजोरुत्तरमर्धमुकारः संपद्यते। तथा–यदि शकारात पूर्वोहः पठ्यते तदानीम्–"दुस्पृष्टं तु प्राग्धकाराच्चतुर्णाम् (ऋ. प्रा 13/10) अयं पाठक्रम उपपद्यत इति। सोऽयमाचार्य प्रवृत्त्या पाठक्रमोऽनुमीयमानो लौकिकवर्ण समाम्नायस्य द्विधा पाठं गमयति। अतोऽयं लौकिको वर्णसमाम्नायो गृह्यते। तथा तयानुपूर्व्यातत्र दुरुक्तमिति। उभे अप्येते आनुपूर्व्यौ लौकिकस्य वर्णसम्माम्नायस्य द्रष्टव्ये।

एतेनैव प्रकारेण अन्यत्रापि अनेक स्थलेषु उवटेन सूत्राणां स्पष्टीकरणार्थं सः अस्यैव प्रश्नोत्तर शैल्याः अनुसरणं कृत्वा सूत्रकारस्य मतं परिपुष्णाति।[132]

सूत्रस्थ समेषां पदानां उपयोगिता-

उवटेन सूत्रस्थ समेषां पदानामुपयोगिता स्वीकृता तथा च प्रत्येक पदस्य स्पष्टीकरणं प्रदत्तमस्ति। प्रत्येक पदानां पृथक्-पृथक् स्पष्टीकरणस्य पश्चात् उवटः पूर्ण सूत्रार्थं प्रददाति। ऋग्वेद प्रातिशाख्यस्य 1/1 सूत्रस्य[133] भाष्ये उवटः कथयति यत् अष्टौ इति संख्या। समानाक्षराणि इति संज्ञा। आदितः इति पञ्चमी "पञ्चम्या स्तसिल (पा. अ. 5/3/17) इति वैयाकरणाः पठन्ति। अथ कोऽर्थः? आदित आरभ्य वर्णसमाम्नायस्य (अष्टौ) अष्टाक्षराणि (समानाक्षराणि) समानाक्षर संज्ञकानि भवन्ति। यथा–अ, आ, ऋ, ॠ, इ, ई, उ, ऊ ।

अध्यायानां परस्पर संम्बन्ध-

उवटः प्रातिशाख्यानां भाष्ये प्रायः प्रत्येक पटलस्य अध्यायानां पूर्वे संक्षेपेण पूर्व अध्यायेषुवर्णितानां विषयाणां उल्लेखं कृत्वा वर्त्तमान वर्ण्य विषयं प्रति सङ्केतयति यथा–ऋक् प्रातिशाख्यस्य तृतीयाध्यायस्य "स्वर पटलस्य' प्रथम[134] सूत्रोपरिभाष्यं प्रारंभमकुर्वन उवटः पूर्ववर्ती द्वयानां पटलानां विषयाः संक्षेपेण वर्णयति यत् प्रथम पटले संज्ञा परिभाषा अनुक्रम्य द्वितीयेन संहितागतलोपागमवर्णविकारानुक्त्वा अथेदानीं स्वरसंहितामाह।[135]

एतेनैव प्रकारेण वाजसनेयि प्रातिशाख्यस्य 3/1 सूत्रस्य[136] भाष्यारंभात् पूर्वम् उवटः पूर्व विवेचितानां द्वयानां अध्यायानां विषयान् सङ्केतयति यत्-"स्वर संस्कारयो छन्दसि नियमः

इति प्रतिज्ञातम्, तत्र प्रथमाध्याये स्वर संस्कारयोरेवाङ्गभूताः संज्ञाः परिभाषा उक्ताः, द्वितीये स्वरः । अधुना क्रम प्राप्तः संस्कारोऽभिधीयते लोपागम-वर्ण विकार प्रकृति भावलक्षणः[137]

नूतन विषयाणां प्रतिपादनम्—उवटेन प्रातिशाख्यानां भाष्ये अनेके महत्वपूर्ण विषायानां प्रतिपादनं स्वविवेकेन कृत्तः यथा-प्रातिशाख्यस्य प्रयोजनम्, वर्णसमाम्नाय सम्बन्धी विचाराऽदयः ।

संज्ञा-प्रयोजनम्—उवटेन प्रातिशाख्ये समागतानां संज्ञानां प्रयोजनमपि स्पष्टीकृतम् यथा-ऋक् प्रातिशाख्यस्य 1/65 सूत्रे[138] नामि संज्ञायाः विधानं वर्त्तते। अस्य भाष्ये उवटः नामि संज्ञायाः प्रयोजनं स्पष्टी कर्त्तुम एकं सूत्रम् उद्धृतं करोति–

अन्तः पादं नाम्युपधः सकारः।[139]

स्पष्टीकरणम्—उवटेन न केवलं सूत्रस्थ पदानां अर्थमात्रं कृतम अस्ति अपितु सः सूत्रे वर्णितानां विषयानऽपि स्पष्टीकरोति उवट द्वारा स्पष्टीकृतः विषयानां निम्नलिखित विभागाः कर्त्तुम् शक्यन्ते।

पारिभाषिक शब्दावल्या; स्पष्टीकरणम्—उवटेन सूत्रे समागतान् पारिभाषिक शब्दावलीं स्पष्टी कर्त्तुम प्रयत्नम् कृतमस्ति।

ताथाभाव्य स्वरः—वाजसनेयि प्रातिशाख्यस्य 1/120 सूत्रे[140] कथितमस्ति यत् उदात्तादि उदात्तान्त अवग्रहः "ताथाभाव्य संज्ञकाः स्वराः भवन्ति। इदं स्वरितानां मध्ये पठितोऽस्ति। किन्तु सूत्रेण इदं स्पष्टं नास्ति यत् ताथाभाव्य स्वरः किम् भवति? उवटः इदं स्पष्टी करोति यत्–"उदात्तादिरुदात्तान्तो नीचावग्रहस्ताथाभाव्यसंज्ञः स्वरो भवति।...अयं तु स्वरितानां मध्ये पठ्यते। नत्विह माध्यन्दिनानां स्वरित उपलभ्यते। उदात्तानुदात्तौ तु पृथग्भूतावुपलभ्येते, स्वरितश्चोदात्तानुदात्तयोरेकीभावे सति तस्मिंश्च तिर्यग्गमनं गात्राणां भवति। न च तदिह किञ्चिदुपलभ्यते। अतो माध्यान्दिनानां पदकाले ताथाभाव्य संज्ञकः कम्पोभवति। तथा चोक्तमौज्जिहायनकैर्माध्यन्दिनमतानुसारिभिः–

"अवग्रहो यदा नीच उच्चयोर्मध्यतः क्वचित्।
ताथाभाव्यो भवेत्कम्परस्तनूनप्त्रे निदर्शनम् ॥"[141]

पद्यम्—एतेननैव प्रकारेण सूत्रकारेण ऋक् प्रातिशाख्यस्य 1/62 तमे सूत्रे "अप्रत्याम्नाये पदवच्च पद्यान' इति सूत्रे समागत "पद्य" इति पारिभाषिक शब्दस्य स्पष्टीकरणं न कृतम् किन्तु उवटेन 2/12 सूत्रस्य[2] न तु यत्र तानि पद्याः" भाष्ये अस्यार्थः सावग्रहम् करोति।

ब्रह्मराशिः—वाजसनेयि प्रातिशाख्यस्य 8/25 तमें सूत्रे पञ्चषष्टि वर्णाः ब्रह्मराशिरात्मवाच[142] इत्युच्यन्ते। एतस्यं स्पष्टीकरणे-उवटेन कथितं यत्–"य एते पञ्चषष्टिवर्णास्ते समस्ता एवं त्रयीलक्षणो ब्रह्मराशिः। एत एव कदाचिदानुपूर्व्यां व्यवस्थिताः सन्तः ऋग्यजुस्सामाख्या भवन्तीत्यर्थः।

निर्वचनम्—सूत्राणामर्थं स्पष्टी कर्त्तुम उवटेन अनेकत्र निर्वचन शैल्याः आश्रयः गृहीतः। यथा—

अभ्रम्—वाजसनेयी प्रातिशाख्यस्य 5/34 सूत्रे[143] पाङ्त्रानुदद्रोऽब्भ्राय संशयात्'' इति सूत्रे अवग्रहरहित शब्दानां प्रसंगे अन्य शब्दैः सह अभ्र शब्दमपि परिगणितोऽस्ति।[144] एतानि पदानि पूर्वोत्तर पदसंशयात्र व गृह्यन्ते। अस्मिन्न प्रसंगे उवटः अभ्रशब्दस्य द्वय भिन्नम् निर्वचनं दत्त्वा अस्य संशयस्य स्थितिं स्पष्टीकरोति यत्—''आपो बिभर्ति धारयतीत्यभ्रः। अप् शब्दः पूर्वपदं बिभिर्त्तेरुत्तेरपदम् । यद्वा अभ्रवभ्रमभ्रचर गत्यार्थाः इत्यभ्रतेरेवाभ्रम।।'' अर्थात् य; जलं धारयति तद् अभ्रमस्ति। अप् (आपः) शब्दं पूर्वपदमस्ति भृ इत्यनेन उत्तरपदं निर्मितं वर्त्तते। अभ्र, वभ्र, मभ्र चर इत्यादयः धातवः गत्यर्थकाः सन्ति। अभ्रेनैव 'अभ्रः'' शब्दः निर्मितः वर्त्तते। मेघः इस्तस्ततः गच्छति चलन्ति संभवतः एतस्मात् कारणात् गत्यर्थक अभ्र धातुना अस्य निर्वचनम् प्रदत्तमस्ति।

अश्वत्थः—वाजसनेयि प्रातिशाख्ये अश्वात् स्थे तकारं[145] संज्ञायाम्'' इत्यस्मित सूत्रे अश्वत्थ शब्दस्य संरचनाविषये कथितमस्ति यत् अश्वस्य पश्चात् स्थाधातु यदि आगच्छेत् तर्हि तस्य ''स'' इत्यस्य ''त'' भवति। स्पष्टरूपेण अत्र सूत्रकार; अश्वत्थ'' शब्दस्य निर्वचनं सङ्केतयति। उवटेन अस्य निर्वचनं ''अश्वः अस्मिन् तिष्ठति'' इति कथयित्वा स्पष्टी कृतम् । उवटस्य मते—''अश्वः अशनव्यापारोऽग्निः वर्त्तते ।[146]

नामिन—ऋग्वेद प्रातिशाख्ये 1/63 सूत्रे नामि संज्ञाया विधानं वर्त्तन्ते तत्र ''ऋकारादयो दश नामिनः स्वराः उच्यन्ते। अत्र उवटः नामिन् शब्दम् निर्वचन द्वारा स्पष्टीकरोति यत्र ''नमयन्ति दन्त्यं सन्तं मूर्धन्यं कुर्वन्तीति नामिनः।[147] अनेन लक्षणया वयं अर्थं परिवर्त्तयितुं शक्नुमः; यतः नामिन् दन्त्य वर्णान् मूर्धन्य वर्णेषु परिवर्तितं करोतीति। अत्र नम् धातोः निर्वचनम् वर्त्तते ।

व्यत्ययः—उवटेन प्रातिशाख्येऽपि व्यत्ययस्य आश्रयः गृहीतम् अस्ति। यथा वाजसनेयि प्रातिशाख्यस्य 1/44 सूत्रे ''सूत्रे ''सन्ध्यक्षरं परम्[148] इत्यत्र अष्टौ इत्यस्थाने उवटः व्यत्ययेन षष्ठी बहुवचनम् मनुते। अत्र अष्टौ इत्यनेन अग्रिम शब्द; स्वराणाम् षष्ठी बहुवचनान्त कारणात् व्यत्ययः उचितमेव।[149]

शाखा-ज्ञानम्—वाजसनेयि प्रातिशाख्य ''संस्कृतं संस्कृतिर्भास पचन्या पुंश्चलमित्यनुनासिकोपधत्वात[150] सूत्र भाष्ये उवटः वाजसनेयी काण्व द्वयानां शाखानां भेदं स्पष्टीकरोति। प्रस्तुतः सूत्रभाष्यं कुर्वता उवटाचार्यः कथयति यत् सूत्रोक्त संस्कृत संस्कृतिः माँसपचन्या पुँश्चलूम् एतेषां चतुर्णां पदानां उपधायाः 'अनुनासिकत्वम् कथितमस्ति तथा च पक्षे अनुस्वारः भवति।

अत्र उवटेन स्पष्टी कृतम् यत् ''एतानि पदानि अनुनासिकोपधत्वान्नवगृह्यन्ते। अत्र च ''शञ्चे ,षकारादुकारोदयात'' इत्यादिभिः सूत्रै रुपधानुनुनासिकत्वमुक्तम् पक्षे चानुस्वारः। अतो

वाजसनेयिनामुपधानुनासिकत्वान्नावग्रह काण्वानां तु वक्ष्यमाण सूत्रेण।[151] अत्र वाजसनेयी इत्येन उवटस्याभिप्रायः माध्यन्दिनङ्क शाखारेववर्त्तते यतः अग्रिम वाक्ये काण्वस्य पृथक ग्रहणम् अभवत् अनन्तस्तु स्वभाष्ये स्पष्टतया माध्यन्दिन शाखायाः उल्लेखं करोति यत– "अन्ते माध्यन्दिनानां उपधानुनासिकत्वान्नावगृह्यते। अवग्रहस्य प्रयोग उभयत्र स्थितौ न भवति यथा–"अनुस्वारागमत्वादित्येके इति सूत्रेण।[152]

संज्ञाः–वाजसनेयि प्रातिशाख्यस्य द्वितीयचतुर्थाः सोष्माणः[153] इति सूत्रस्य भाष्ये सोष्म संज्ञा प्रसंगे उवटः कथयति यत येषां संज्ञानां शास्त्रे व्यवहारः नास्ति तान् पूर्व आचार्यानां संज्ञा वेदितव्या। शिष्य संव्यवहारार्थाः शिष्या आभिः संव्यवहरेयुरिति पूर्वाचार्य संज्ञानुकथन मस्मिनं शास्त्रे मङ्गलार्थं च पूर्वा-चार्यशास्त्रकीर्त्यपरिणाशार्थ वा।[154]

अस्येव सूत्रस्य एका अन्या व्याख्याऽपि उवटेन कृता-यद्वा यथा एते वर्णा नित्या एवमेता अपि संज्ञा नित्या एव। एवं च कृत्वा सर्वशास्त्रेष्वेता एव संज्ञा उपलभ्यन्ते–द्वितीय चतुर्थाः सोष्माणः, तथा ककारादीनां स्पर्श संज्ञा, तथा यकारादीनामन्तस्थ संज्ञा। आभिः संज्ञाभिर्व्यवहरतां धर्मों भवति।[155]

अर्थात् उवटः एतेषां संज्ञानां कथनम् मंगलार्थं नित्यं धर्मयुक्तं च स्वीकरोति।

यजुर्वेदि सप्त स्वराः–यजुर्वेदीय प्रातिशाख्ये सप्त स्वराणां उल्लेखः वर्त्तते।[156] किन्तु यजुर्वेदस्य प्रसंगे किमर्थम् एतेषां सप्तस्वराणां उल्लेखः कृतः उवटेन एतस्य स्पष्टीकरणं प्रदत्तम् यत अग्नि चयने अध्वर्युः सामगानं विहितमस्ति। एतस्य स्पष्टीकरणं उवटः शतपथ ब्राह्मणस्य एका श्रुति दत्वा स्पष्टीकरोति यत्–"सामसुसप्त स्वरानाहुः षडज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादान् । नु यजुर्वेद लक्षणप्रक्रमे एवमुदात्तानुदात्त संय्योगे स्वरितोत्पत्तौ कः सामलक्षण प्रसङ्ग? उच्यते-अग्नौ यजुर्वेदे अध्वर्योः सामगानं विहितम्-नान्योऽध्वर्योर्गायेदिष्टका वा एता विहितचितो हस्याद्यदन्योऽध्वर्योर्गायेत' इति शातपथे सञ्चिति काण्डे।[157] अतोऽध्वर्युकर्तृकमिति कृत्वा कश्चिल्लक्षणांशः कृत; सामसु। अपरे त्वाहुः जात्याभिनिहितक्षैप्रश्लिष्टतैरोव्यञ्जन-तैरोविराम-पादवृत्ताः सप्त स्वरा अत्रावधार्यन्ते।[158]

ओङ्कारस्य महत्त्वम्–उवटने स्वाध्याये ओङ्कारस्य महत्त्वम् अङ्गीकृतम् । वाजसनेयि प्रातिशाख्ये कथितमस्ति यत् "ओङ्कारः स्वाध्यायादौ।[159] किन्तु अत्र किमर्थ मोंङ्कार प्रोयक्तव्यम् अस्मिन् विषये किमपि नास्ति कथितम् एतस्य स्पष्टीकरणार्थं उवट मनोः श्लोकं उद्धृतं करोति यत्–"ब्राह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ।

क्षरत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यते ।।[160]

वाजसनेयि प्रातिशाख्ये "अथ" शब्दं अपि ओङ्कार सदृशं मांगलिकं कथितमस्ति यथा–ओङ्काराथकारौ इति।[161] ओङ्कारोच्चारणं स्वाध्यायादौ प्रतिज्ञातमेव तत्तुल्यफलोऽथ–

शब्दोऽपीति। किन्तु अस्य कारणं सूत्रकारेण न स्पष्टीकृतम् । उवटः स्मृतिवाक्य द्वारा एतद् स्पष्टीकरोति यत्–"**ओङ्कारश्चाथ कारश्च द्वावेतौ ब्रह्मणः पुरा ।**

कण्ठं भित्त्वा विनिर्यातौ तेनेमौ मङ्गलावुभौ ॥"

ओङ्कारस्य उच्चारण प्रकारः–ऋक् प्रातिशाख्ये कथितमस्ति यत् "स ओइमिति प्रस्वरति त्रिमात्रः, प्रस्वारस्थाने स भवत्युदात्तः। चतुर्मात्रोवार्धपूर्वानुदात्तः षण्मात्रो वा भवति द्विस्वरः सन् ।।[162] प्रस्तुत सूत्रे कथितमस्ति यत् सः ओऽम् स्वस्थाने उच्चारितः भवति। किन्तु स्थानस्य अर्थः सूत्रेण स्पष्टं न भवति। उवटः स्थानं स्पष्टीकरोति–"स गुरुः सूत्रेण स्पष्टं न भवति। उवटः स्थानं स्पष्टीकरोति–"स गुरुः ओइमिति प्रस्वरति शब्दं करोति। त्रिमात्; प्रस्वारः-स ओङ्कार शब्द स्त्रिमात्रः, स्थाने भवति। उदात्तः च। किंमिदं स्थानमिति? उपांशुध्वानंनिमदोपब्दिमन्मन्द्रमध्ययताराणिस्थानानि। निषादे पञ्चमे मन्द्रमध्यमतारेषु स्थानेषु (एकस्मिन्) स्थाने प्रयोज्यः स्यात् । तेनैव प्रकारेण प्रणवं कुर्यात् । त्रान्येतान्युक्तानि भवन्ति।[163] इमे त्रय; प्रणवाः । तेषामाद्यो बहुभिः परिगृहीतः, न मध्यमः । किमिति न ज्ञायते? अस्माभिस्तूत्तमः पठ्यते।

पद-देवता–वाजसनेयि प्रातिशाख्ये "अथ पददेवतामिति सूत्रे पददेवतायाः प्रसंगोऽस्ति। किन्तु अत्र इदमोल्लेखः न वर्त्तते यत् कस्य पदस्य कः देवता अस्ति इति सूत्रे नास्ति स्पष्टम्। किन्तु उवटेन इदं स्पष्टीकृतम् यत्–

"सर्वं तु सौम्यमाख्यातं नाम वायव्य मिष्यते ।

आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृतः ॥"[164]

उवटस्य मतेन–एवं ह्युपासिताः सन्तोऽर्थानभिज्ञस्यापि पुरुषस्य फलप्रदा भवन्ति।। यो वा अविदितार्षेयछन्दोदैवत ब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणु वर्द्दतिगर्त्तं वापद्यते प्रमीयते पापीयान् भवतीत्येवमादिदोषेण सम्बध्यते।[165]

वर्णज्ञानस्य महत्त्वम्-वाजसनेयि प्रातिशाख्यस्य[166] उपदिष्टा वर्णाः इति सूत्रस्य भाष्यम् अकुर्वन उवटः वर्ण ज्ञानं आवश्यकं मनुते। स्वमतस्यपुष्टिकरणे सः एका उक्तिं प्रददातियत्–

"स्वरो वर्णोऽक्षरं मात्रा तत्प्रयोगार्थ एव च ।

मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे ॥ इति ॥[167]

अत्र स्वरादिनां सह वर्णज्ञानोपरि बलं प्रदत्तमस्ति । यद्यपि उवटेन स्वभाष्ये सर्वत्र सामान्य नियमानां अनुपालनं कृतमस्ति। परन्तु तस्यापि एका दृष्टिर्वर्त्तते। तदनुसारंतस्य भाष्यस्य वैशिष्टयमपि वर्त्तते। उवटस्य सर्वोत्कृष्टा विशेषता तस्य संक्षिप्त भाष्यम् प्रतीयतेति दिक् ।

संदर्भ ग्रन्थः

1. श. प. ब्रा. 14-5-5-33.
2. वराहपुराणएप्रसिद्धा आख्यायिका ।
3. जावाल संहिता अध्याय-1
4. आदेशादय राज्ञस्तस्य श्री धर्मचन्द्रस्य
   मन्त्रार्थदीपिकेयं क्रियते शत्रुघ्नशर्म्मण· सम्यक् ।मंत्रार्थदीपिकायाः।।
   मंगलाचारणे श्लोकः-9
5. काश्मीर देशस्थ वज्रट सुतोवटकृत शुक्लयजुः संहिताभाष्ये । गुणविष्णुकृत सामवेदीय मन्त्रार्थे। ब्राह्मणसर्वस्व ग्रन्थः प्रसिद्धः । भद्रदेवकृत व्याख्यायां च।
6. उवटे मन्त्रव्याख्या गुणविष्णौ ब्राह्मणीय सर्वस्वे ।
   वेदविलासिन्यामपि कौशलमीक्ष्यं तथापि में सद्भिः ॥ श्लोक-10
7. वा. प्रा. उ. भा. 4/165.
8. यथायस्पिण्डादीनां मा श्लेषस्तथैतेषां व्यञ्जनानामिति। वा.प्रा. उ. भा 4.165
9. पाइअ सद्दमहण्णवो, पृ. 229 ।
10. वैदिक वाङ्मय का इतिहास 1976 संस्करण पृष्ठ-217.
11. ,, ,, पं. भगवदत्त प्रथमभाग खण्ड द्वितीय पृ. 87.
12. आनन्दपुर गुजरात में है।
13. पी.एच.डी. शोधप्रबंध : आगरा वि.वि. पृ.589.
14. क्रिटिकल स्टडीज ऑन कात्यायनाज शुक्ल यजुर्वेद प्रातिशाख्य-वी वेंकट राम शर्मा पृ. 123।
15. दी कोलम्बिया लिपिकॉट गजेटियर ऑफ दी वर्ल्ड-पृ. 66 ।
16. दी सर्च ऑफ मैन्युस्क्रिप्टस इन दी बाम्बे प्रेजिडेन्सी 1882-83 पृ. 3 ।
17. ए जॉग्रोफिकल डिक्शनरी ऑफ एन्शियेण्ट एण्ड मिडीवियल इंडिया पृ. 6.
18. आलिना का शिलालेख ई. 649 से 651 ।
19. गजेटियर ऑफ दी बाम्बे प्रैडिजेन्सी-1896 पृ. 6.
20. आनन्दपुरं गुर्जरदेशे प्रसिद्धम् ।
21. वा. स. चालीसवें अध्याय के अन्त में ।
22. वा. स. उ. 20/90 ।
23. क्रिटिकल स्टडीज ऑन कात्यायनाज शुक्ल यजुर्वेद प्रातिशाख्यम् - वेंकटरामशर्मा पृ. 23।
24. वैदिकवाङ्मय का इतिहास पं भगवददत्त भाग प्रथम खण्ड द्वितीय पृष्ठ-87 ई. सं. 1931.
25. वही ,, ,, ,, ,,

26. वही ,, ,, ,, ,,
27. वही ,, ,, ,, ,,
28. वही ,, ,, ,, पृ. 88
29. काव्यप्रकाश स्व. आचार्य विश्वेश्वरः पृ. 63.
30. वही ,, ,, ,, ,, ,,
31. वही ,, ,, ,, ,, ,,
32. यद्यपि काश्मीरदेशीयस्य जैयटसगोत्रस्य वज्रटाख्यस्य दत्तक पुत्रोऽयमितिकल्पनायां जैयटपुत्रस्यापि औवटस्य वज्रटपुत्रत्वमुपपद्यते तथापि भोजसमकालिकमनुप्रपन्तमवयतो ज्येष्ठ भ्रातुर्मम्मटस्य भोजराजादर्वात न त्वे स्थिते तत्कनिष्ठभ्रातुरुवलटस्य सुतरां भोजराजादर्वाक्त नत्वमिति विद्वद्धि र्विभावनीयम् ।
33. काश्मीरेतिहासः पृ. 214 काव्यप्रकाश झलकीकर, प्रस्तावना ।
34. उवट Wrote his वाजसनेयि वाजसनेयि संहिता भाष्य was Reiging (भोज राज्यं प्रशासति) There is therefore Nothing improbable in मम्मट Being bratter of उवट .
हिस्ट्री ऑफ संस्कृत पोयटिक्स पी.वी. काणे पृष्ठ-273.
35. All that this anonymans Verse may be taken to establish is that itsallusion to King Bhoja indicates
36. भोजराजाश्रयत्वेनास्यावन्तिवासोऽसन्दिग्ध एव ।
37. वैदिक वाङ्मय का इतिहास पं भगवद्दत्त, भाग प्रथम खण्ड द्वितीय पृ. 88 1931 ।
38. ऋग्वेद प्रातिशाख्य-डॉ. वीरेन्द्र कुमार वर्मा पृ. 5 ।
39. वर्गद्वयवृत्ति श्लोक-1 Ithat Mammata was probably not easlierthan Bhoj.
हिस्ट्री ऑफ पोयटिक्स; एस. के. डे. पृष्ठ-147.
40. आनन्दपुरवास्तव्य जैटटारव्यस्य सूनुना। उवटेन कृतं भाष्यं पदवाक्यैः सुनिश्चितैः वाजसनेयि संहिता-20 वें अध्याय के अन्त में ।
41. भोजराजाश्रयत्वेनास्यावन्तिवासोऽसन्दिग्ध एव ।
42. वैदिक वाङ्मय का इतिहास पं भगवद्दत्त, भाग प्रथम खण्ड द्वितीय पृ. 88 1931 ।
43. ऋग्वेद प्रातिशाख्य-डॉ. वीरेन्द्र कुमार वर्मा पृ. 5 ।
44. वर्गद्वयवृत्ति श्लोक-1 ।
45. निरुक्तम् 1/17.
46. ऋग्वेद प्रातिशाख्य-डॉ. वीरेन्द्र कु. वर्मा भूमिका पृ. 15.
47. ऋग्वेद प्रातिशाख्य-डा. वीरेन्द्र कुमार वर्मा भूमिका पृ. 15.

48. वही ,, ,,
49. वही ,, ,,
50. शुक्लयजुर्वेद पर महीधर, उवट और स्वामी दयानन्द जी के भाष्यों का समीक्षात्मक एवं तुलनात्मक अध्ययन, पृ. 589 ।
51. वैदिक साहित्य और संस्कृति, बलदेव उपाध्याय पृ. 30.
52. शुक्लयजुर्वेद पर महीधर उवट एवं स्वामी दयानन्द के भाष्यों का समीक्षात्मक एवं तुलनात्मक अध्ययन पृ. 289 ।
53. वही,
54. वही,
55. मिथिला का कैटलॉग ।
56. आचार्य सायण और माधव-बलदेव उपाध्याय पृ. 114.
57. सा नो वेदो अमात्यम् । ऋ. 7/15/3.
58. ऋ. 7/15/3.
59. रक्षोहणं बलग्रहने वैष्णवीमिदमहंतं बलगमुर्त्किरामि यं मे निष्ट्यो यममात्यौ...किरामि ।
60. वैदिक वाङ्मनय का इतिहास पं भगवदत्त भाग प्रथम खण्ड द्वितीय पृ. 70 सन् 1931 ।
61. गुरुतस्तर्कतश्चैव तथा शातपथश्रुतेः ।
ऋषीन्वक्ष्यामि मन्त्राणां देवताश्छन्दसं च यत् ॥ श्लोक-3
62. ऋचो यजूंषि सामानि तथार्थः पदवाक्ययोः ।
श्रुतंयश्चात्र याः प्रोक्ता योऽर्थवादश्च कर्मणः ॥ श्लोक-4
63. रत्नकुमारी पब्लिकेशन्स के छपे श. ब्रा. में "त्वाष्ट्रान" स्थान पर नाष्ट्रान् पाठभेद मिलता है।
64. छन्दोपिज्ञेयमित्यनेनैव दर्शयति येनैवमाह। दक्षिणतोऽसरान रक्षा सि त्वष्ट्रान्यपहन्ति त्रिष्टुब्भिर्व्रजो वै त्रिष्टुप् (श. ब्रा. 9/2/3/6) न ह्यच्छन्दोविद्देव तामाग्रेयौ सम्पदं वेदेति। पृ. -1-2.
65. ऋचो यजूंषि चात्र विद्यन्ते तानिच ज्ञेयानिति। पृ. 2 ।.
66. बृहद्देवता 2/100.
67. ,, 2/101.
68. यथार्थ विभक्ती : संनमयेत् (निरु. 2/1)
69. वा.सं., 25/46.
70. का. श्रौ. मू 3/8/1/13
71. वा.सं.-2/25.
72. वा. सं.-1/21.

73. छन्दसि परेऽपि। व्यवहिताश्च। पा. अ. 1/4/81,82.
74. वा. सं.-25/24.
75. तृतीयः पादः प्रथमं व्याख्यायते यच्छब्दयोगात वा.सं., उ. भा. 25/25.
76. देवस्यत्वा सविता श्रपयतु वर्षिष्ठेऽधिनाके। वा. सं.-1/22.
77. देवः सविता त्वांश्रपयतु। वर्षिष्ठे उत्कृष्टे नाके स्वर्गे अधि उपरिस्थतम् । वा.सं., उ. भा. 1/22.
78. बृहद्देवता 2/101, बृहद्देवता में ''लिंगधातुविभक्तिं च संनमेत्तत्र तत्र च'' का पाठ मिलता है।
79. वा. सं 1/12.
80. अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवाऽअदिति पञ्चजनाऽअदितिर्जातमदितिर्जनित्वम् ॥ वा.सं. 25/23
81. सर्वात्मकत्वेनादितिं मन्त्रदृक्स्तौति। अदिति...स च पुत्रः स इति छान्दसो लिङ्ग व्यत्ययः ।
82. वा.सं. 1/12.
83. अत्र अग्रेपुव इति संदेहः किमत्र पिबते रूपं उत पवतेः । तत्र श्रुतितो निर्णयः।
84. श. ब्रा. 1/1/3/7.
85. वा. सं. 13/4.
86. पा. अ. 2/3/62 परवार्तिक-षष्ठ्यर्थे चतुर्थी वक्तव्या ।
87. अग्नेः पक्षतिर्वायोर्निपेक्षतिरिनद्रस्य तृतीया। सौमेस्य चतुर्थ्यदित्यै पञ्चमीन्द्राष्यै षष्ठी मरुतार्थ सप्तमी बृहस्य तैरष्टम्यर्यम्णो नवमी धातुर्दशमीन्द्रेस्यैकादशीवरुणस्य द्वादशी यमस्ये त्रयोदशी। वा सं. 25/4.
88. एष तै गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुमो भाग्र इति मे सोमाय ब्रूतादेष ते जागतो भाग इति मे सोमोय ब्रूताच्छान्दोनामाना साम्राज्यं गच्छेति में सोमोय ब्रूतादास्माकोऽसि शुक्रस्ते ग्रह्यौ विचितेस्त्वा विर्चिन्वन्त ॥ वा. सं 4/24
89. यदश्वोय वासे उपस्तृणन्त्येधीवासंया हिरेण्याव्यस्मै संदानमेर्वन्तं पड्वीशं प्रियादेवेएवायामयन्ति। वा. स.-25/39.
90. यदश्वाय । यत् अश्वाय संज्ञप्यमानायवासः...अर्वन्तम् अर्वते इति विभक्ति व्यत्ययः। अश्वायेति समानाधिकरण्यात् ।
91. एष्टाराय प्रेषे भगोय ऋतमृेतवादिभ्यो नमो द्यावापृथिवीभ्योम् । वा.स.-5/7
92. आ इष्टा राय...ऋतमृतवादिभ्यः सत्यमेतच्चिन्तितमस्माकं भूयात्सत्यवादिनामिति विभक्ति व्यत्ययः। षष्ठयर्थे चतुर्थी । (वा. सं. उ. भा. 5/7)।
93. उदुत्यम् जातवेंदसे देवं वेहन्ति केतवेः। दृशे विश्वोय सूर्य स्वाहा । वासं -7/41.

94. उदुत्यम् ... दृशे दर्शनाय । विश्वाय षष्ठयर्थे चतुर्थी । विश्वस्य जगतः ।
95. मार्हिर्भूर्मा पृदार्कुः। उरुहि राजा वरुणश्चकार सूर्याय पन्थामन्येतव डे वा. स. 8.23.
96. एके तावद् उरुं...सूर्याय षष्ठ्यर्थे चतुर्थी । सूर्यस्य पन्थानम् । व.सं उ. मा. 8/23.
97. पा. गृ. सू. 1/6/3
98. वैदिक व्याकरण द्वितीय भाग पृ. 831 (ज) ।
99. देव इन्दरो नराशसस्त्रिवरूथः सरेस्वत्याश्विभ्योमीयते रथेः । रेतो न रुपममृतं जनित्रमिन्द्राय त्वष्टा दधेदिन्द्रियाणिं वसुवनै वसुधेयेस्य व्यन्तु यजे। वा.सं 21/55.
100. स यज्ञः रेतोन न रेतश्च अमृतं च रूपं च जनित्रं जन्म च। इन्द्राय इन्द्रे इन्द्रस्य वेति विभक्तिव्यत्ययः...दधातु इन्द्रियाणि च ।
101. ग्रीष्मेणे ऋतुनो देवा रुद्रा पेञ्चदशे स्तुताः ।
बृहता यशंसा बलेहविरिन्द्रे वर्यो दधुः ॥ वा. सं 21/24
102. पञ्चदशेनेति विभक्तिव्यत्ययः । पञ्चदशेन स्तोमेन स्तुताः सन्तः बृहतापृष्ठेन च सह। यशसा सह बलं हविः इन्द्रे वयश्च दधुः ।
103. वर्षाभिर्ऋतुनदित्याः स्तोमे सप्तदशे स्तुता; '। वैरूपेण विशौजसाहविरिन्द्रे वयौ दधुः । वा. सं. 21/25.
104. शारदेने ऋतुनो देवा एकविश ऋभवेः स्तुताः। वैराजेनश्रिया श्रिये हविरिन्द्रेवयौदधुः वा.सं. 21/26.
105. हेमन्तेन ऋतुनो देवास्त्रिणवे मरुतेः स्तुताः । वलैन् शक्वरी सहौ हविरिन्द्रेवयो दधुः ॥ वा सं. 21/17.
106. शैशिरेण ऋतुना देवास्त्रयस्त्रिशेऽमृतोः स्तुताः। सत्येन खेतीः क्षत्रहविरिन्द्रवयौ दधुः । व. सं. 2/28 ।
107. यद्वजिह्नोदामे संवादमर्वतों या शीर्षण्या खाना रज्जुस्य । यद्वा धास्य प्रभृतमास्ये तृणसर्वाताते अपि देवेएवस्तु ॥ वा.सं 25/31.
108. सर्वाणि तानि ते तव हे यजमान! अपि देवेषु अपि प्रजापतये अस्तु। सन्त्वितिप्राप्ते वचनव्यत्ययः। वा. सं उ. भा 25/31.
109. सशितं मे ब्रह्म सवशितं वीर्यं बलम् । सशितं क्षत्रं जिष्णु यस्यास्मि पुरोहितः ॥ वा. सं -11/18.
110. संशितं मे ब्रह्म ''शोतनूकरणे' उपसर्ग व्यत्ययः । निशितं तीक्ष्णीकृतं मेमम ब्रह्म निशितं च वीर्यं वीरकर्म बलम् । निशितं च क्षत्रं जिष्णु जयनशीलम् । यस्य अहम् अस्मि भवामि पुरोहितः । वा. सं उ मा. 11/81.
111. यद्यत्स्याच्छान्दसं वाक्यं कुर्यात्तत्तु लौकिकम् । वा.सं. उ. मा. भूमिका पृ. 3.
112. मनो जूतिर्जुष्तामाज्यस्य वृहस्पतिर्यज्ञमिमं तेनोत्वरिष्टं यज्ञ समिमं दधातु । विश्ववेदेवास इह मादयन्तामोऽप्रतिष्ठ॥ वा.सं. - 2/13

113. किं च मनो...किं च विश्वेदेवासः देवा एव देवासः। "आज्जसेरसुक" सर्वे देवा इह कर्मणि मादन्यातम् ।...हर्ष कुर्वन्तु ।...तिष्ठ। वा. सं उ भा. 2/13.

114. इषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठेतमाय कर्मण आप्योयध्वमध्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत् माघॅंसो ध्रुवा अस्मिन् गोपतौ स्यात् बह्वीर्यजमानस्य पशून्पाहि । वा. सं. - 1/1.

115. भूतायत्वा नारातये स्वरभिविख्येषं दृहन्तां दुर्याः पृथिव्याम् । वा. सं उ. मा. 1/11 ।

116. भूतायत्वेति शेषाभिमर्शनम् । भूताय भवनाय । त्वा त्वां परिशेषयामीति शेषः। नारातयेन अदानाय । उप्तं रोपितं सत् ब्रीह्यादि पुनरेव वहु भविष्यतीति परिशेषयानिन कृपणतायै ।

117. इह त्वन्यशाखापरिपठितेनाख्यातेन सूत्रकारेण वा.सं उ भा. 1/11 वाक्यपरिपूर्तिः कृता छिनद्मीति चोभयोः साकाङ्क्षत्वात्सन्नमयामीति वोत्तर इति। वा. सं उ. मा. 1/1.

118. दिवि विष्णुव्यक्रस्तु जागतेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वष्यं द्विएमोऽन्तरिक्षे विष्णुर्व्यक्र स्तत्रैष्टुभेन छन्दसा ततो निर्भक्तो याऽस्मान्द्वेष्टि यं च वयं द्विष्मः पृथिव्यां विष्णुव्यक्रस्त गायत्रेण छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मोस्मादन्नादस्यै प्रतिष्ठाया अगन्म स्वः सं.ज्योतिषाभूम । वा. सं 2/25.

119. अनुषङ्गस्तु मन्त्रावयव एव यथा...अस्मादन्नान्निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मः । "अस्यै प्रातिष्ठायां निर्भक्त" इत्यादि विष्णुक्रम मन्त्रेषु परिपठितमिहाभिसम्बन्ध्यते। अपरिपूर्ण त्वाद्वाक्यस्य।

वा. सं उ. भा.-2/25

120. सिद्धेहि शब्दार्थ संबन्धे पश्चादमिधानामिधेय भावं क्रियाद्वारकं प्रकाशयितुं व्युत्पत्तिः क्रियते। सा चा क्रियमाणा तस्मिन्नेवाभिधेयेऽव तिष्ठते मगधापति वत। यथा मगधाधिपतेर्मागधेषु जनपदेएवाधिपत्य न कान्यकुब्जेएवेवमि।

121. व्युत्पत्तिद्वारेण च शब्दानां परिज्ञानमभ्युदयहेतुरिति श्रुतिर्दर्शयति। तत्प्रणीतानां प्रणीतात्वं प्रति ह तिष्ठति य एवमेत्प्रणीतानां प्रणीतात्वं वेदेति प्रणीता शब्दस्य निर्वचनपरिज्ञानद्वारेण फलं दर्शयति। उ. मा. भूमिकायां 1/1।

122. श. ब्रा. 14/9/2/2.

123. तथा पुरुषशब्दव्युत्पत्तिं प्रकृत्याह । "स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान् पाप्मन औषत्तस्मात्पुरुष ओषतिहवै सतं योऽस्मात्पूर्वोबभूषति य एवं वेद।

124. एवं तत्र तत्र । एतच्च स्थालीपुलाकन्यायेन वा. सं उ. भा. 1/1 सर्वेष्यभिधेयेषु द्रष्टव्यम् । वा. सं उ. भा भूमिकायां ।

125. वा सं. उ. भा-1/1.
126. वा. सं. 1/2, 19, 2/8,9 इत्यादयः ।
127. वहीं-3/29, 15/43 इत्यादयः ।
128. वा. सं.-29/59 39/11 इत्यादयः ।
129. वा. सं.-1/16 मंत्रस्य भाष्ये उवटेन ''ध्वनेः यज्ञपात्रेषु प्रवेशः इति कपायाः संकेत मात्रः प्रदत्तः–''मनोर्हवा ऋषभ आस (श. ब्रा. 1/1/4/14) ।
130. वा. प्रातिशाख्य-1/20.
131. पादशौचाचमतादिन शुचिरधीयीतेत्यर्थः ।
132. ऋते नतोपाचरितक्रमस्वरान् । वा. प्रा. 1/62.
133. ऋग्वेद 8/14/2.
134. पद्यं पारिभाषिकः शब्दः वर्त्तते। सावग्रह पदं पद्यमित्युच्यते। ऋ. प्रा. 1/61.
135. णत्वे तूदाहरणं नास्ति। उपाध्यायस्तु-पितृयाणम्'' इत्युदाहरति। पूर्वपद्यस्थान्निमि त्तादुत्तपरद्यस्थस्य नकारस्य पदवत्पद्यानिति पदभावाद्भिन्नपदत्वान् नतिर्नप्राप्नोति, तत ''ऋते नत'' इत्यनेन प्राप्यत इत्यभिप्रायेण। एतच्चासत यत्र हि सामान्येन पदस्य कार्यं विधीयते, तच्च पदवत्पद्यान् इत्यनेन पद्येएवपि प्राप्यते। तत्प्राप्तं सद् 'ऋते नत्''–इत्यनेन पुनर्निषिध्यते-योऽस्यापवाद सूत्रस्य विषयः। अत्र तु स्वयमेव सूत्रकारोऽवोचत्-ऋकाररेफषकारा नकारं समानपदेऽवगृह्ये नमन्ति। अन्तः पदस्थम् (ढ. प्रा. 5/40) इति। अत तदसदुदाहरणम् ।
136. वा. प्रा 1/147 ।
137. वा. प्रा. 4/165. एते स्वरा.
138. य एते समाजाक्षरं संध्यक्षर संज्ञा वर्णास्ते एते द्वादश (स्वराः) स्वरसंज्ञा. वेदितव्याः । (ढ. प्रा. उ भा 1/3)
139. ननु कथं वर्णसमाम्नायमनुपदिश्यैव–''अष्टौ समानाक्षराण्यादितः'' (ऋ. प्रा. 1/1) इति । उपदिष्टस्य हि व्यपदेश एवमुपपद्यते ''आदितः'' इति नानुपदिष्टस्य। तथा चत्वारि संध्यक्षराण्युत्तराणि (ऋ. प्रा. 1/2) इत्युत्तरव्यापदेशो नैव घटत इति । ऋ. प्रा उ. भा. 1/3.
140. ऋ. प्रा. 1/5.
141. अष्टौ समानाक्षराण्यादितः । ऋ. प्रा 1/1.
142. उदात्तपानुदात्तश्च स्वरितश्च त्रयः स्वराः । आयामविश्रम्भाक्षपैस्त उच्यन्ते। ऋ. प्रा 3/1.
143. ऋ. प्रा उ. भा 3/1.
144. संहितायाम् । वा प्रा 3/1.
145. वा. प्रा., उ भा. 3/1.
146. ऋकारोदयो दश नमिनः स्वराः । ऋ. प्रा 1/65.

147. ऋ. प्रा 5/1.
148. उदाघन्तो न्यवग्रहस्ताथाभाव्यः । वा. प्रा 1/120.
149. वा. प्रा. 1/120.
150. ऋ. प्रा 2/12
151. वा. प्रा., उ. भा. 8/25.
152. वा. प्रा. 5/34.
153. वा. प्रा उ भा. 5/34.
154. अश्वात् स्थे तकारं संज्ञायाम् । वा. प्रा. 4/107.
155. वा. प्रा. उ भा 4/107.
156. ऋ. प्रा उ. भा 1/65.
157. वा. प्रा. 1/44.
158. वा. प्रा. उ. भा. 1/44.
159. वा. प्रा. उ. भा 5/43.
160. वा. प्रा 5/44.
161. वा. प्रा. 5/44
162. वा. प्रा. 1/54.
163. वा. प्रा. 1/54.
164. ,, उ. भा. 1/54
165. सप्ता वा. प्रा.-1/127.
166. श. ब्रा. 9/1/2/43.
167. वा. प्रा. उ. भा 1/127.

द्वितीयोऽध्यायः

स्वस्तिवाचनम्

कस्यापि संस्कार कर्मणः आरंभे पूर्वं संस्कारकर्त्ता आचार्यः यजमानश्च परिशुद्धः सन् नवीन वस्त्रं धारयित्वा तिलकम् संध्यावन्दनादि कर्मणा निवृत्तो भूत्वा शुद्धासने पूर्वाभिमुखं उपविश्य आचमनादिकं कृत्वा स्वस्तिवाचनं कुर्यात्–

"स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः-पूषा विश्ववेदाः ।

स्वस्ति नस्तार्क्ष्योऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥1॥[1]

श.भा.–इन्द्रः नः स्वस्ति कल्याणं दधातु, पूषापि। किम्भूतः इन्द्रः? वृद्धश्रवाः बहुधनः । श्रवः शब्दो धनवचनः कीर्तिवचनो वा । महद्यशा वा । वृद्धश्रावी वा। यूयं किम्भूताः? विश्ववेदाः सर्वधनाः सर्वयज्ञा वा। तार्क्ष्यो गरुडः नः स्वस्ति दधातु। तार्क्ष्यः किंभूतः? अरिष्टनेमिः अनुपहिंसितासुः अनुपहत-चक्राधारः । बृहस्पतिश्च नः स्वस्ति दधातु।।

उ. भा.–स्वस्ति नः स्वस्ति स्वस्त्ययनम् न; अस्माकम् इन्द्रः दधातु स्थापयतु। कथंभूतः । वृद्धश्रवाः प्रभूतधनः । महाशब्दो महाकीर्तिर्वा स्वस्ति नोऽस्माकं पूषा ददातु। कथंभूतः । विश्ववेदाः सर्वज्ञो वा। स्वस्ति न तार्क्ष्यो दधातु। कथंभूतः । अरिष्टनेमिः अनुपहिंसितासुः स्वस्ति नः अस्माकं बृहस्पतिश्च दध्नातु ।।

पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।[2]

अग्निजिह्वा मनवः सूर चक्षसो विश्वे नो देवाऽअवसाऽऽगमन्निह ॥2॥

श.भा.–इत्यम्भूताः मरुतो देवाः अवसा अन्नेन हविर्लक्षणेनाहूताः सन्तः इह यज्ञे नः अस्मान् आगमन् - आगच्छन्तु। किंभूताः मरुतः? पृषदश्वाः पृषतो हरिता अश्वाः येषां ते। पुन किंभूताः? शुभं यावानः शुभं कर्तुं जनान् ये यान्ति ते शुभंयावानः। यातेर्वनिप । पुनः किंभूताः? विदथेषु यज्ञेषु जग्मयः गमनशीलाः। ये अग्निजिह्वा हुतभोक्तारश्चतुर्दश मनवस्ते च इहागमन् । ये च सूरचक्षसः आदित्यदर्शनाः विश्वेदेवास्ते च इहागमन् ।1

उ. भा.–पृषदश्वा मरुतः । पृषन्तः शबला अश्वा येषां ते पृषदश्वाः । पृश्निमातरः । पृश्निः द्यौर्माता येषां त एवमुच्यन्ते । शुभंयावानः शुभं कर्तुं जनान्प्रति ये यान्ति ते शुभं यावानः। "आतोमनिन्क्वनिपवनिपश्च" इति वनिप् । विदथेषु यज्ञेषु जग्मयः गमनशीलाः। "आदृगमहन्"–इति किः। य इत्थंभूताः मरुतस्ते अवसा अन्नेन हविर्लक्षणेन आहूताः सन्त

आगमन् आगच्छन्तु इहेत्यनुषङ्गः। ये च अग्निजिह्वा अग्निमुखाहुतादा इत्यर्थः। मनवः चतुर्दश ते च अवसा गमन्निह। ये च सूरचक्षसः आदित्यदर्शनाः विश्वेदेवाः ते च नः अस्माकम् अवसागमन्निह यज्ञे।।

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।[3]

स्थिरैरङ्गैस्तुष्टुवासस्तनूभिर्व्यशेमहि देवहितं यदायुः ।।3।।

श. भाष्य–हे देवाः! कर्णेभिः कर्णाभ्यां भद्रम् अनुकूलंवयं शृणुयाम। अक्षभिरक्षिभ्यां भद्रं पश्येम। देवाः किंभूताः? यजत्राः यजन्तं त्रायन्त इति। किं च स्थिरैरङ्गैर्दृढैः शरीरावयवैः तुष्टुवांस स्तुवन्तो वयम् अर्थाद्भवन्तम् । देवहितं देवैर्निहितं स्थापितं यद्वा देवानां हितं देव परिचरणयोग्यं यदायुजीर्विंतिं शतवर्षान्त मित्यर्थः। तत्तनूभिः शरीरैर्भार्यापुत्रादिभिः सह वाव्यशेमहि व्याश्नुवीमहि ।।

उ. भा.–भद्रं कर्णेभिः। भद्रमनुकूलं कर्णेभिः कर्णाभ्यां शृणुयाम हे देवाः। भद्रं पश्येम अक्षभिः अक्षिभ्यां । हे यजत्राः यजनीयः । किंच। स्थिरैरङ्गैः अशिथिलैः अङ्गैः। तुष्टुवांसः देवान्स्तुतवन्तः। तनूभिः भार्यापुत्र पौत्रादिकाभिस्तनूमिः सहिताः व्यशेमहि व्यश्नुवीमहि। देवहितं देवैर्यत्स्थापितं मनुष्याणामायुः तद्यश्नुवीमहि ।।

शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।[4]

पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ।।4।।

श. भा.–हे देवाः। शरदः शतमित वर्षशतमपि अर्थात् आयु अन्तिश्रन्तिके स्वल्पकालमेवेत्यभिप्रायः । यत एवमतो ब्रूमः। नः अस्माकम् आयुर्मध्या मध्ये शतवर्षाभ्यन्तरे मां रीरिषत् मा हिंसिष्ट, किं च गन्तोः गन्तृ "माभवत्वित्यध्याहार्यम् । आकालिक एव मा गच्छत्वित्यर्थः । यत्रायत्र । शरदां शतन्नोऽस्माकं तनूनां जरसं जरां चक्रा कृतवन्तः जरानिमित्तां शक्तिमपि कृतवन्तः। अर्थात् भवन्त एव । किं च यत्र शरदः शते नः पुत्राः पितरो भवन्ति। पुत्राः अग्नयस्ते यजमानजनिता भवन्ति हितकारिणश्च भवन्ति। अथ वा पुत्रा एव पितृणामौर्द्ध्वदेहिकं कुर्वाणाः पितरो भवन्ति। पोषकत्वात् पितर इव भवन्ति। तथा च यस्याममवस्थायामेव-मक्षमता भवति सा मय्येव माऽस्त्वित्यभिप्रायः। तदुक्तं "सञ्चिन्त्य सञ्चित्यतमुग्रदण्डं मृत्युर्मनुष्टयस्य विचक्षणस्य । वर्षासु सिक्ता इव चर्म दण्डाः सर्वे प्रयत्नाः शिथिली भवन्ति" इति ।।4।।

उ. भा.–शतमित्। शतमपि शरदः अन्ति अन्तिके समीपे भवथ हे देवाः । आकल्पकालमित्यभिप्रायः । ऋषिभिरुदितमेतत् । यत्र यस्मिन् शरदांशते नः अस्माकं यूयं चक्र कृतवन्तः । जरसां जरां तनूनां जरा निमित्तां शक्तिमित्यभिप्रायः । किंच। पुत्रासो यत्र पितरो भवन्ति पुत्रा अग्नयः यत्र शरदां शते। यजमानस्य पितरो जनितारो भवन्ति। तदुक्तम्- "तत्र वै प्रजापतिः प्रजाः ससृज" इत्युपक्रम्य "तस्माज्जनयित्वा बिभृही"ति। यत्र पितरो भवन्ति। एतदप्युक्तमेव। "स यत्रम्रियते यत्रैनमग्नावभ्यादधाति तदेषोऽग्नेरधिजायते स एष, पुत्रः

सन्पिता भवति अथवा पुत्र एव पितृणामौर्ध्वदेहिकं कुर्वाणाः पितरो यत्र संपद्यन्ते तदपि शरदांशतमन्तिक एव इति। यत एवमतो ब्रूमः। मा नो मध्या रीरिषतायुर्गन्तो मारीरिषत् मा हिंसीष्ट नोऽस्माकं मध्या मध्ये अकाल एव आयुः गन्तो; गन्तृ गमनशीलम्। उक्तं च–"संचिन्त्य संचिन्त्य तमुग्रदण्डं मृत्यु मनुष्यस्य विचक्षणस्य। वर्षासु सिक्ता इव चर्मबन्धाः सर्वे प्रयत्ना शिथिली भवन्ति" इति।।

अदितिद्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।[5]

विश्वेदेवाऽअदितिः पञ्चजना अदितिर्ज्जातमदितिर्ज्जनित्वम् ॥5॥

श.भा.–द्यौः स्वर्गः अदितिः अस्तु। न विद्यते दितिः खण्डनं यस्याः सा अदितिः, अविघ्नकारिणी भवत्वित्यर्थः । एवं सर्वत्रान्वयः । पञ्चजनाः कुबेरः । किं बहुना जातमुत्पन्नम्प्राणिजातं, जनित्वं जनिष्यमाणं सर्वमदितिरेव। यद्वाऽदितिर्मन्त्रेण नोच्यते द्यौरित्यादीनि सर्वाणि जनित्वान्तानि अदितिः अदितीनि अदीनानि महाभाग्ययुक्तानि सन्तु ।

उ. भा.–सर्वात्मकत्वेनादितिं मन्त्रदृक्स्तौति। अदितिश्च द्यौः अदितिश्च अन्तरिक्षम् अदितिश्च माता स च पिता स च पुत्रः स इति छान्दसो लिङ्ग व्यत्ययः । विश्वे च देवाः पञ्चजनाः मनुष्याश्च अदितिः। किं बहुनोक्तेन अदितिरेव जातं भूतम् । अदितिरेव जनित्वं जनिष्यमाणम्। अथवा नैवादितिरनेनोच्यते किं पुनः एतान्येव द्यौः प्रभृतीनि अदीनानि महाभाग्ययुक्तानीति।

आपो ऽअद्यान्वचारिषꣳरसेन समसृक्ष्महि। पयस्वानग्नऽ आगमं[6]।

तं मास ꣳ सृजव्वर्चसा प्रजया च धनेन च ॥6॥

श. भा.–हे अग्ने! यत् याः अपः कर्म अहम् अद्य अन्वंचारिषम् अनुचरितवानस्मि, अवभृथादावित्यर्थः यज्जलस्य रसेन वयं समसृक्ष्महि संसृष्टाः स्म। यच्च पयस्वान् पयोयुक्तः सन् अत्राहमागमम् आगतवानस्मि। अतस्त्वम् मा मां वर्चसा तेजसा संसृज संयुक्तं कुरु। प्रजया पुत्रादिना धनेन च संसृज।।

उ.भा.–आहवनीयमुपतिष्ठते। आपो अद्य पंक्तिराग्नेयी। योऽहम् आपः अद्यास्मिन्नहनि अन्वचारिषम् । अनुचरितवानस्मि अनेनावभृथकर्मणा। यश्चाहम् अब्जेन रसेन समसृक्ष्महि संसृष्टवानस्मि। यश्चाहं पयस्वान् उंदकवान्सन् । हे अग्ने, आगमम् आगतवानस्मि। तं मामागतवन्तं सन्तम् संसृज वर्चसा प्रजया च धनेन च।।2।।

द्यौः शान्तिरन्तरिक्ष ꣳशान्तिः-पृथिवी शान्तिरापः शान्तिरोष[7]धयः शान्तिः-वनस्तपतयः शान्ति विश्वेदेवाः शान्तिब्रह्म शान्तिः सर्व ꣳशान्तिः शान्तिरेव शान्तिः सामा शान्तिरधि॥7॥

श. भा.–द्यौरित्यादिषु सर्वत्र विभक्तिव्यत्ययः । तथा च या दिवि शान्तिः या अन्तरिक्षे शान्तिः सा शान्तिः मा मां प्रति एधि भवतु।।7।।

उ. भा.—द्यौः शान्तिः । या द्युलोकरूपा शान्तिः या चान्तरिक्षरूपा शान्तिः। या च पृथिवी। आपः ओषधयः वनस्पतयः विश्वेदेवाः ब्रह्म त्रयी लक्षणं परं वा। सर्वशान्तिः या च शान्तिरेव शान्तिः स्वरूपत एव शान्तिः। सा। मा मां शान्तिः एधि। अस्त्विति पुरुषव्यत्ययः। त्वत्प्रसादादित्यपेक्षा।।

नान्दीश्राद्धः

नान्दीश्राद्धः संस्कर्त्तुः पिता कुर्यात् तद्भावे ज्येष्ठ भ्राता स्वयं वा कुर्यात् । पितुः प्रतिनिधिरूपेण कुलवृद्धः पुरोहितः उपाध्यायमपि एतद् कर्ममाचरितुं शक्नोति। यदि अनेके संस्काराः एकस्मिन्नैव समये स्यात् तर्हि एकवारमेव नान्दीश्राद्धं कुर्यात् । यदि कोऽपि पितरः जीवितः स्यात् तर्हितां विहाय अन्येषां दिवंगत पितृणां नान्दी श्राद्धं कुर्यात्। नान्दी श्राद्धारंभात् पूर्वं पूर्वाभिमुखो सव्योभूत्वा आचमनं कृत्वा निम्नलिखितेन मन्त्रेण प्रथमं विघ्नविनायकं गणेशं विष्णुं च प्रणम्य मन्त्रं इमम् पठेत्–

"ॐ यं ब्रह्म् वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथाऽन्ये ।
विश्वोदगतेः कारणमीश्वरं वा तस्मै नमो विघ्न विनाशनाय ।।
अभीप्सितार्थ सिद्धयर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ।।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।

तदनन्तरं स्वसम्मुखे पूर्वदिशायां चत्वारः वेदीं कुर्यात् येषां गणना दक्षिणतः प्रारंभो भूत्वा उत्तरदिशायां समाप्तः भवेत्, तदुपरि अर्कस्य ढाकस्य वा एकं-एकं पत्रं क्रमशः स्थापयेत् । तदनन्तरं पूर्वदिशायां कुशोपरि ब्रह्मणः स्थापनां कृत्वा "एतन्ते" इति मंत्रेण प्रतिष्ठापनं कृत्वा हस्तेन यवः गृहीत्वा पितरान् निमन्त्रयेत् । तत्रापि प्रथमं विश्वेदेवायाः ब्रह्मणं एतेन संकल्पेन अभिमन्त्रयेत्-"अद्येह नान्दी श्राद्धे अमुकगोत्रास्मन्मात्रदित्रय पित्रादित्रयामुक गोत्रास्मन्मातामहादित्रयश्राद्धसम्बन्धिनां सत्यवसु संज्ञकानां विश्वेषां देवानां कृत्ये भवन्तो मया निमन्त्रिताः । निमन्त्रिताः स्म इति प्रतिवचः। कुलस्य वृद्धि निमित्तं नान्दीश्राद्धः भवति। तत्पश्चात् यवां गृहीत्वा मात्रादि कुलत्रयान् पूवर्जान् निमन्त्रयेत्–"अद्येह अमुक गोत्राणामस्मन्मातृपितामही प्रपितामहीनामुकदेवीनां नान्दीमुखीनामद्यकर्त्तव्येऽमुककर्मांग नान्दीश्राद्धे भवन्तो मया निमन्त्रिताः। निमन्त्रिताः स्म इति प्रतिवचः।" तत्पश्चात् पुनश्च यवां गृहीत्वा पितर त्रयानां निमंत्रण् दद्यात्–"अद्येह अणुक गोत्राणामस्मत्पितृपितामह प्रपितामहानामकुमुक देवानां नान्दीमुखानामघकर्त्तव्योऽमुक कर्माङ्गनान्दीश्राद्धे भवन्तो मया निमंत्रिताः। निमन्त्रिताः स्मः ।।" पुनश्च यवां गृहीत्वा मातामहादि पितरत्रयान् निमन्त्रयेत्–"अद्येह अमुकगोत्राणआमस्ममन्मातामहप्रमातामह वृद्ध प्रमातामहानाममुक देवानां सप्तनीकानां नान्दीमुखानामद्यकर्त्तव्ये नान्दीमुखश्राद्धे भवन्तो मया निमंत्रिताः । निमन्त्रिता स्मः ।

एवम्प्रकारेण पितरान् निमंत्रणं दत्वा ब्राह्मणान् अधोलिखितान् नियमान श्रावयेत् तथा च तान् पालनं कर्त्तुं ब्रूयात्–

"अक्रोधनैः शौच परैः सततं ब्रह्मचारिभिः ।
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ।
सर्वायास विनिर्मुक्तैः कामक्रोध विवर्जितैः ।
भवितव्यं भवद् भिर्नोऽद्यतने श्राद्धकर्मणि ॥"

तदनन्तर "आगतं वः" इति पृष्ट्वा "स्वागतम्" इति उत्तरं दत्वां पादप्रक्षालनं कृत्वा चरणोपरियवकुशगंधादियुक्त पदार्थान् क्रमेण समन्त्रकं दद्यात्–"अद्येह अमुक गोत्र नान्दी मुखास्मत्मातामहादित्रय श्राद्ध सम्बन्धिनः सत्यवसुसंज्ञका विश्वेदेवाः एष पादार्घो वो नमो वृद्धिः श्रियै।" पुनश्च मात्रादित्रयान् अर्घ्यम् दघात्–"अमुकग्रोत्रा अस्मन्मातृपितामह प्रतितामह्यः अमुकदेव्यः नान्दीमुख्यः एषः पादार्घो वो नमो वृद्धि? श्रियै।? तदुपरान्तं पूर्ववत् पित्रादि त्रयान् अर्घं यच्छेत्–"अद्येह अमुकगोत्रा अस्मन्मातामह प्रमातामह वृद्ध प्रमातामहा अमुकदेवाः सपत्नीका नान्दीमुखा एष पादार्घो वो नो वृद्धि श्रियै।।"

तदनन्तरं स्वदक्षिणभागे कर्मपात्रस्थापननिमित्तं अधोलिखित मन्त्रेण भूमिस्पर्शं कुर्यात्–

"ॐ भूरसि भूमिरस्य दितिरसि विश्वधाया विश्वस्य भुवनस्य
धर्त्री पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीः ॥"

पुनश्चैव तस्मिन्नेव स्थाने चंदनेन शंख चक्रादि दूर्वादलेन आसनं निर्माय पात्रे स्थापयेत्। तदनन्तरं पात्रे निम्नमन्त्रेण पवित्रीं दद्यात्–"पवित्रे स्थो वैष्णव्यौ। तत्पश्चात् अधोलिखित मंत्रेण कर्मपात्रं जलेन परिपूरयेत्–

"ॐ शन्नो देवीरभिष्टये आपो भवन्तु पीतये ।
शंयोरभिस्त्रवन्तु नः ॥"

तदनन्तरं कर्मपात्रे यवादिधान्यम् दद्यात्–

"ॐ यवोऽसि यवयास्मद् द्वेषो यवयारातीः ॥"

"ॐ यवोऽसि सोमदेवत्यो गोसवो देवनिर्मितः ।
प्रत्नमद्भिः पृक्तः पृष्ट्या नान्दीमुखान् पितॄँल्लो कान्प्रीणाहि न स्वाहा।"

तदुपरान्तं तूष्णी पात्रे गंगाजलाक्षतपुष्पादीन् त्यजेत् तथा च पात्रस्य जलं स्वस्य नान्दीमुख श्राद्ध समाग्रिन प्राणायामं कृत्वा अभिसिञ्चेत् । तदनन्तरं बाह्यान्तः शुद्धयर्थं विष्णुं स्मरेत्–**"ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।**
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥"

तदुपरान्तं विष्णोः स्मरणं कृत्वा अधोलिखित मन्त्रं त्रिवारं पठेत्–

"ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नम स्वाहायै स्वधायै नित्यमेव्र नमोनमः ॥"

तत्पश्चात् प्रणम्य निम्न श्लोकान् पठेत्–

"सप्तव्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ ।
चक्रवाकाः शरद द्वीपे हंसाः सरसि मानसे ॥
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणाः वेदपारगाः ।
प्रास्थिता दीर्घमध्वानं यूयं किमवसीदथ ॥
श्राद्धकाले गयां ध्यात्वा ध्यात्वा देवं गदाधरम् ।
मनसा च पितृन् ध्यात्वा नान्दीश्राद्धं समारभे ॥"

तदनन्तरं दक्षिण भागे कटयां नीवी (यव दूर्वात्रयं च) निम्न मंत्रेण स्थापयेत्–"ॐ सोमस्य नीविरसि विष्णो शर्म्मासि शर्म्म यजमानस्य योनिरसि सुसस्याः कृषीस्कृधि॥" तदुपरान्तंयजमान हस्ते दूर्वां स्वीकृत्य अधोलिखितमंत्रान् पठित्वा दिगबन्धनं कुर्यात्–

"अग्निष्वाताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् इति मन्त्रेण पूर्वस्यां दिशि। तथा बर्हिषदः पान्तु याम्यां ये पितरस्तथा–इति मंत्रेण दक्षिण दिशायाम् । प्रतीचीमाज्यपास्तद्वदुदीची मपि सोमपाः-इति मंत्रेण पश्चिम तथा उत्तर दिशायाम् । विदिशश्च गणाः सर्वे रक्षन्तूर्ध्व मधोपिवा–दिशानांमध्ये ऊपरि अधश्च । "रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः । सर्वतश्चधिपस्तेषां यमो रक्षां करोतु मे। इति मन्त्रेण सर्व दिक्षसु। यवा रक्षन्तु दितिजात् दर्भा रक्षन्तु राक्षसात् । पंक्ति वै श्रोत्रियो रक्षेद्-ऽतिथि सर्वरक्षकः।"

तदनन्तरं गायत्री मंत्रेण कर्मपात्रस्य जलम् अभिमन्त्रयेत् । आमान्नादिकानां प्रोक्षणं कृत्वा निम्नलिखित संकल्पं पठित्वा प्रतिज्ञां कुर्यात्–

"अद्येहेत्यादि देशकालौ संकीर्त्य अमुक गोत्राणां अस्मन्मातृपितामही प्रतितामहीनां अमुकदेवीनां वसुरुद्रादित्य स्वरूपाणां नान्दीमुखीनां तथामुकगोत्राणां अस्मत्पितृपिता-महप्रपितामहानां अमुकदेवानां वसुरुद्रादित्यस्वरूपाणां नान्दी मुखानां तथा अमुक गोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुक देवानां सपत्नीकानां वसुरुद्रादित्य स्वरूपाणां नान्दीमुखानां प्रीतये अमुक कर्म निमित्तकं सत्यवसुसंज्ञकं विश्वेदेवपूर्वकं संक्षिप्त संकल्पविधिनानान्दीमुख श्राद्धमहं करिष्ये॥"

यजमानस्य प्रतिज्ञा संकल्पान्तरं ब्राह्मणः "ॐ कुरुष्व" इति वाक्यं वदेत् । तत्पश्चात् दूर्वात्रयम् हस्ते गृहीत्वा दक्षिणोत्तर उत्तरोत्तर क्रमेण वृद्धिवेदी उपरिस्थापितं प्रथम ब्राह्मणं

मात्रादित्रयाणां, पित्रादित्रायानां मातामहादित्रयानां च श्राद्ध सम्बन्धिनं सत्यवसु विश्वेदेव निर्मित्तं निम्न संकल्पं कृत्वा प्रथम आसनं दद्यात्–

"अद्येह नान्दीमुखामुकगोत्रास्मन्मात्रादि त्रय तथा पित्रादित्रय तथाऽमुकगोत्रास्मन्मातामहादित्रय श्राद्ध सम्बन्धिनां सत्यवसु संज्ञाकानां विश्वेषां देवानामिदं मानसं वो नमोवृद्ध श्रियै।।" तदनन्तरं द्वितीय ब्राह्मणम् निम्न संकल्पेन मात्रादीनां निमित्तं द्वितीय आसनं यच्छेत्–"अमुक गोत्राणां अस्मन्मातृपिता-मही प्रपितामहीनां अमुकदेवीनां वसुरुद्रादित्य स्वरूपाणां नान्दीमुखीनां इदमासनं वो नमो वृद्धिः 2 श्रियै।।" तदनन्तरं संकल्पं कृत्वा तृतीय ब्राह्मणम् पित्रादि निमित्तं आसनं दद्यात् "अमुक गोत्राणां अस्मत्पितृपितामह प्रपितामहीनां अमुक देवानां वसुरुद्रादित्य स्वरूपाणां नान्दीमुखानां इदमासनं वो नमोवृद्धि श्रिये।।" तदनन्तरं चतुर्थं ब्राह्मणमपि पूर्वोक्तरीत्या मातामहाद्यर्थं चतुर्थं आसनं दद्यात्–

"अमुक गोत्राणां अस्मन्मातामहप्रमातामह वृद्धप्रमातामहानां अमुक देवानां सपत्नीकानां वसुरुद्रादित्य स्वरूपाणां नान्दीमुखानां इदमासनं वो नो वृद्धिः श्रियै।।"

तदुपरान्तं क्रमानुसारं निम्म मन्त्रेण गन्ध पुष्पाक्षत धूप दीप वस्त्र नैवेद्यादि भूषणेन पूजनं कुर्यात्–"ॐ सप्त ऋषयः प्रतिहिता शरीरे सप्त रक्षन्ति सदमप्रमादं । सप्तापः स्वपतोलोकमीयुः तत्र जागृतो अस्वप्नजौ सत्रसदौच देवौ ।। ॐ सत्यवसु संज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नमः । ॐ मातृपितामही प्रतिमामहीभ्यो नमः । ॐ पितृपितामहप्रपितामहेभ्यो नमः । ॐ मातामह प्रमातामहवृद्धप्रमातामहेभ्यो नमः।।" ततः परं कुलस्य वृद्धयर्थं लक्ष्मीप्राप्ति निमित्तं पितरानां गन्धाक्षतपुष्पान् नमस्कारादिपूर्वकं निम्नलिखित संकल्पेन पूजनं कुर्यात्–

"अद्येह अमुक गोत्रास्मन्मात्रादित्रय तथा पित्रादित्रय तथाऽमुक् गोत्रास्मन्मातामहादित्रय श्राद्ध संबन्धिनः सत्यवसुसंज्ञक विश्वेदेवा अर्चन विधौ इमानि गन्धाक्षतपुष्पधूपदीप नैवेद्यभूषणादीनि यथाविभागं वो नमो वृद्धिः श्रियै।।"

विश्वेदेवस्य पूजनात् परं पितृणां गंधाक्षतपुष्पादिना संकल्प्य पूजनम् सश्रद्धं कुर्यात्– "अद्येहामुकगोत्रास्मान् मातृपितामही प्रपितामह्यः अमुकदेव्यः नांदीमुख्यः तथाऽमुकगोत्रा अस्मत्पितृपितामह प्रपितामहा अमुकदेवा वसुरुद्रादित्यस्वरूपा नान्दीमुखाः तथाऽमुक गोत्रा अस्मन्मातामह प्रमातामहवृद्धप्रमातामहा अमुकदेवाः सपत्नीका वसुरुद्रादित्य स्वरूपानन्दीमुखार्चन विधिः पूरिपूर्णोऽस्तु।।" तदनन्तरं यजमानः "पूरिपूर्णोऽस्तु" वदेत्, ब्राह्मणः अस्तु "परिपूर्णः इति वदेत् ।

तत्पश्चात् गन्धादि अर्पणं आचमनं कृत्वा यजमान आमात्रं चतुर्धा विभज्य प्रत्येकं भागं आसनस्य अग्रे संकल्पं कृत्वा स्थापयेत्–"प्रथम विश्वेदेवार्थ निमित्तं आमात्र संकल्पः यथा– "अद्येह अमुक गोत्रास्मन्मात्रादि त्रय तथा पित्रादित्रय तथाऽमुकगोत्रास्मन्मातामहादित्रय श्राद्ध

संबन्धिभ्यच सत्यवसु संज्ञकेभ्यो विश्वेभ्यो देवेभ्य इदमामात्रं दधिधृतजल सहितं यथांशेन वो नमो वृद्धिः वृद्धि श्रियै।।" मात्राद्यर्थं अमाननं संकल्प कुर्यात्–

"अद्येहामुकगोत्राभ्य अस्मन्मातृपितामही प्रपितामहीभ्योऽमुकदेवीभ्यो वसुरुद्रादित्यस्वरूपाभ्यो नान्दीमुखीभ्य इदमामात्रं दधिधृत जलसहितं यथाविभागं वो नमो वृद्धिः श्रियै।।" पित्राद्यर्थम् आमात्र संकल्प कुर्यात्–"अद्येहामुकगोत्रेभ्योऽस्मत्पितृपितामह प्रपितामहेभ्योऽमुक देवेभ्योवसुरुद्रादित्य स्वरूपेभ्यो नान्दीमुखेभ्य इदमामात्रं दधिधृतजलसहितं यथाविभागं वो नमो वृद्धिः श्रियै।" मातामहाद्यर्थं आमात्र सङ्कल्पं कुर्यात्–"अद्येहामुकगोत्रेभ्योऽस्मन्मातामहप्रमातामहवृद्धप्रमाता- महेभ्योऽमुकदेवेभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्यो नान्दीमुखेभ्य इदमामात्रं दधिघृतजलसहितं यथाविभागं वो नमो वृद्धिः श्रियै।" तदनन्तरं निम्न मंत्रेण अत्रं पूजयेत् "ॐ सप्त ऋषयः प्रतिहिता शरीरे सप्त रक्षन्ति सदमप्रमादं । सप्तापः स्वपतोलोकमीयुस्तत्रजागृतो अस्वप्नजौ सत्रसदौ च देवौ ।। यथेमावाचं कल्याणीमावदानि जनेभ्यो ब्रह्मराजन्याभ्याꣳशूद्राय चार्य्याय च स्वाय चारणाय च प्रियो देवानां दक्षिणायैदातुरिह भूयासमयं मे काम समृद्धयताम् ।।" तत्श्चात् दधि द्राक्षा आमलाद्विनामभावेदेय द्रव्यानां जलेन प्रोक्षणं, गंधाक्षत पुष्पादिना पूजनं कृत्वा यजमानः संकल्पं कुर्यात्–"अद्येहेत्यादि अमुक गोत्राणां अस्मन्मातृपितामही प्रपितामहीनां अमुकदेवीनां वसुरुद्रा दित्य स्वरूपाणां नान्दीमुखीनां तथामुकगोत्राणां अस्मत्पितृपितामहप्रपितामहानां अमुकदेवानां वसुरुद्रादित्य स्वरूपाणां नान्दी मुखानां तथा अमुकगोत्राणां अस्मन्मातामहप्रमातामहवृद्ध प्रमातामहानां अमुक देवानां सपत्नीकानां वसुरुद्रादित्य स्वरूपाणां नान्दीमुखानां प्रीतयेऽमुककर्म निमित्तक सत्यवसुसंज्ञक विश्वेदेव पूर्वक नान्दीमुख श्राद्धकर्मणः साङ्गफल प्राप्तये साद्गुण्यार्थं च मातृणां पितृणां मातामहानां विश्वेषां देवानां च प्रीतये इयं दधिद्राक्षामलक निष्क्रयिणी दक्षिणा यथाविभागं वो नमो वृद्धिः श्रियै ।।'

तदन्नतरं कर्मकर्त्ता तिलकं कृत्वा त्रिवारं इमं मन्त्रं पठेत्–

"ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमोनमः ॥"

तत्पश्चात् "सप्तव्याधा दशार्णेषु" मंत्रस्योच्चारणकुर्वन् निम्नलिखित वाक्यानाम् उच्चारणं कृत्वा विसर्जनं कुर्यात् "अमुककर्म निमित्तक नान्दीमुख श्राद्धं विसर्ज्जये।।"

विसर्जनोपरान्तं ब्राह्मण; यजमानं-अस्तु परिपूर्णम् इति उक्त्वा आशीर्वादं दद्यात् तत्पश्चात् यजमानः नीवी विसर्जनम्, कर्मपात्रभ्रमणम्, विसर्जनम् आचमनञ्च कृत्वा "यस्य स्मृत्यां च नामोक्तया तपोयज्ञक्रियादिषु। न्यूनं सपूर्णतां याति सद्यो वन्देतमच्युतम् । ॐ अच्युतायनमः।।3।।

इति श्लोकं पठित्वा ब्राह्मणान् सत्कारपूर्वकं आमात्रं दक्षिणाद्रव्यञ्च दत्वा कृत्यम् संपादयेत्।

।। इति नान्दीश्राद्धः।।

पुण्याहवाचनम्

"पुण्याहवाचनम्" शब्दस्य अर्थः भवति–"ब्राह्मकल्पः पवित्र प्रथम दिवसस्य उपदेशः यत् वेदपाठी ब्राह्मणाः यजमानं श्रावयन्ति येन तस्य वंशे ऋद्धिः सिद्धिः, वृद्धिः कल्याणं, श्रीः शान्ति-प्राप्तिश्च भवति। अस्मिन् दिवसे परमात्मना स्थूल सूक्ष्म प्रकृत्याः समष्टिरूपस्य सृष्टिं कृत्वा हिरण्यगर्भ, विराट इत्यादिनाम्ना सन् स्वेदज, अण्डज, उद्भिज जरायुजसृष्टिनां पालनपोषणं कृतवान् ।

पुण्याहवाचनं कर्तुम सर्वप्रथमं चतुरान् ब्राह्मणान् उत्तरवृद्ध्यापूर्व दिशायां उपावेश्य अर्घस्थापनं कृत्वा पुण्याहवाचन निमित्तं वरण संकल्पं कुर्यात्–"अद्येहेत्यादि देश कालौ संकीर्त्य अुक गोत्रोऽमुकराशिरमुकशर्माऽहं अमुककर्म्मणिसर्वाभ्युदय प्राप्तये ब्राह्मण द्वारा पुण्याहं वाचयिष्ये तदङ्गतया चतुर्णां ब्राह्मणानां पूजनं वरणं च करिष्ये।।" तदनन्तरं निम्नलिखित मन्त्रेण ब्राह्मणान् अर्घ्यं दद्यात्–

"भूमिदेवाग्र जन्मासि त्वं विप्र पुरुषोत्तम ।
प्रत्यक्षो यज्ञपुरुषोह्यर्घोऽयं प्रतिगृह्यताम् ।।"

पुनश्च गन्धाक्षतपुष्पेण अधोलिखित मन्त्रेण ब्राह्मणान् पूजयेत् –

"गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।"

"नमोऽस्त्वनन्ताय सहस्त्रमूर्तये सहस्त्रपादाक्षि शिरोरुबाहवे ।
सहस्त्रनाम्नि पुरुषाय शाश्वते सहस्त्रकोटियुगधारिणे नमः ।।"

ब्राह्मणपूजनान्तरं गंधाक्षत् पुष्पपूगीफलम् द्रव्यादीन स्वकृत्य तिलकं कृत्वा यजमानः ब्राह्मणं वरण सामग्रीं दत्वा पठेत्–

"एभिर्गन्धाक्षतपूगीफलद्रव्यैः अमुककर्मणि सर्वाभ्युदय प्राप्तये पुण्याहवाचनार्थं ब्राह्मणं त्वामहं वृणे ।।" तत्पश्चात् वरण सामग्रीं गृहीत्वा आचार्यः "वृतोऽस्मि" इति ब्रूयात् । एतेनैव क्रमेण वरणोपरान्तं चतुर्णां ब्राह्मणानां समक्षे अञ्जलि बद्धो भूत्वा यजमानः अधोलिखित मन्त्रान् पठेत्–

"ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमत; सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विव ।।"
ॐ बृहस्पते अति यदर्य्यो अर्हादद्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋत प्रजा तदस्मासु द्रविणं धेहि चित्रम् ।।

तत्पश्चात् यजमान इमं मन्त्रं पठेत–

"ब्रह्मं पुण्यमहर्य्यच्च सृष्ट्युत्पादन कारकम् ।
वेदवृक्षोदभवं नित्यं तत्पुण्याहं ब्रुवन्तु नः ।।"

मंत्र पठनात् परं यजमानः अधोलिखितं वाक्यं त्रिवारं पठेत्–

"भो ब्राह्मणाः मम गृहे पुण्याहं भवन्तो ब्रुवन्तु-3।।"

तदन्तरं ब्राह्मणाः मन्त्रोऽयं पठन्तु–

"ॐ पुण्याहम् ॐ पुण्याहम् ॐ पुण्याहम्।"

"ॐ पुनन्तु मा देवजना पुनन्तु मनसा धियः।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि माम्॥"

तत्पश्चात् यजमानः वदेत्–

"स्वस्तिर्या अविनाशाख्या लोक कल्याण सिद्धिदा।
विनायकप्रिया नित्यं तां च स्वस्ति ब्रवन्तु नः॥"

इत्युक्त्वा यजमान इमं वाक्यं वदेत्–

"मम गृहे स्वस्ति भवन्तो ब्रुवन्तु-3 ।। ब्राह्मणः ततः परं वदन्तु यत्–

"ॐ स्वस्ति न इन्द्रो वृद्धवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्ताक्षर्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥"

ततः यजमानः वदेत्–

"सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृता।
सम्पूर्णा सुप्रभावा च ताञ्च ऋद्धिं ब्रवन्तु नः॥" पुनश्च वदेत् "भो ब्राह्मणाः। ममगृहे ऋद्धिं भवन्तो ब्रुवन्तु-3।।

उत्तरे ब्राह्मणाः मन्त्रमिमं पठेयुः–"ॐ ऋद्धयतां ॐ ऋद्धयतां।।"

"ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम्।
दिवं पृथिव्या अध्यारुहामाविदामदेवान्त्स्वज्जर्योतिः॥"

यजमान पुनर्वदेत्–"वैधृतौ च व्यतीपाते संक्रान्तौ राहुपर्वणि।
यादृग्वृद्धिमवाप्नोति तां च वृद्धिं ब्रुवन्तु नः॥"

"भो ब्राह्मणाः। मम गृहे वृद्धिं भवन्तो ब्रुवन्तु-3।। ब्राह्मणा; वदन्तु- "ॐ वृद्धयतां, ॐ वृद्धयतां, ॐ वृद्धयताम्। "ॐ ज्यैष्ठयच्चम आधिपत्यं च मे मन्युश्चमे भामश्चमेऽमश्चमेरम्भश्च मेजेमा च मे महिमा च मे वरिमा चमे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धञ्च में वृद्धिश्चमे यज्ञेन कल्पन्ताम्॥" पुनश्च यजमान वदेत्–

"पृथिव्यामुद्धृता यान्तु यत्कल्याण पुरा कृतम्।
ऋषिभिः सर्वगन्धर्वैस्तत् कल्याणं ब्रुवन्तु नः॥"

ब्राह्मणाः वदन्तु–"ॐ कल्याणं ॐ कल्याणं, ॐ कल्याणम्।" "ॐ यथेमांवाचं कल्याणीमावदानि जनेभ्यः ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च प्रियो देवानां

दक्षिणायै दातुरिह भूयासमयं मे काम समृद्धयतामुपमाऽदो नमतु।। यजमानः पुन र्ब्रूयात्–

"सरित्पतेश्च या कन्या या श्री विष्णुगृहे स्थिता ।
सर्वसौख्यवती लक्ष्मीस्तां श्रियं च ब्रुवन्तु नः ॥"

भो ब्राह्मणाः । मम गृहे श्रीरस्तु इति भवन्तो ब्रुवन्तु-3।। ब्राह्मणाः ब्रुवन्तु–"ॐ श्रीस्तु, ॐ श्रीरस्तु, ॐ श्रीरस्तु ।

"ॐ मनसः काममाकूतिं वाचः सत्यमशी महि ।
पशूनारूपमन्नस्य रसो यशः श्री; श्रयताम् ॥" पुनः यजमानः

"शंखासुरं विपत्तौ च यथा शान्तिर्धरातले ।
यथा च देवदेवानां तां च शान्तिं ब्रुवन्तु न ॥

भो ब्राह्मणाः। मम गृहे शान्तिं भवन्तो ब्रुवन्तु-3।।" ब्राह्मणाः ब्रुवन्तु-
ॐ शान्तिः ॐ शान्तिः ॐ शान्तिः।

"ॐ द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिः ओषधयः शान्तिः वनस्पतयः शान्तिः विश्वेदेवाः शान्तिः ब्रह्म शान्तिः सर्वꣳशान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥"

"ॐ विश्वानिदेव सवितर्दुरितानि परासुव यद् भद्रं तन्न आसुव ॥"

तदुपरान्तं ब्राह्मणाः यजमानस्य ललाटे तिलकं कृत्वा पुष्पाक्षतान् स्वीकृत्य अधोलिखित मन्त्रान् पठित्वा आशीर्वाद् दद्यात्–

"मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥
भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु ।
रक्षन्तु त्वां सदा देवाः सम्पदः सन्तु सर्वदा ॥
सपत्ना दुर्ग्रहाः पापा दुष्टसत्वाद्युपद्रवाः ।
तमालपत्रमालोक्य निष्प्रभावा भवन्तु ते ॥"

।। इति पुण्याहवाचनम् ।।

अथ कलशस्थापनम्

ततः शान्तिकलशस्थापनम्–नित्यक्रियः प्राणायामं कृत्वा यजमान स्वपुरतः रक्ततण्डुलैरष्टदलं विधाय भूमौ सप्तधान्यादिकं संस्थापनं कृत्वा कलशस्थापनं कुर्यात् । "ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां । पिपृतान्नो भरीमभिः।"[8] इति मन्त्रेण भूमिस्पर्शः।

"ॐ ओषधयः समवदन्त सोमेन सह राज्ञा ।

यस्मै कृणोति ब्राह्मणस्य राजन् पारयामसि॥[9]

इति मंत्रेण यवं धान्यं वा प्रक्षिपेत्ः ।

"ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः ।

पुनरुर्जा निवर्त्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती" पुनर्मा विशाताद्रयि।[10] इति मन्त्रेण कुम्भ संस्थापनं । "ॐवरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्ज्जनी स्थोवरुणस्य ऋत सदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद॥।[11] इति मन्त्रेण कलशं जलेन प्रपूरयेत् । पुनश्च कलशोपरि ब्रह्मणः स्थापनं कुर्यात्–"ॐ आब्रह्मन ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योतिव्याधी महारथो जायताम् । दोग्ध्रीधेनुर्वोढ़ाऽनड् वानाशुः सप्तिः पुरन्धिर्योषा जिष्णु रथेष्ठाः। सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्ज्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पतां॥[12]

ब्रह्मस्थापनानन्तरं कलशे सर्वप्रथमं गन्धं दद्यात्–

"ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।

ईश्वरीं सर्वभूतानां तामिहोपह्वय श्रियम् ॥

तत्पश्चात् कलशे दूर्वां क्षिपेत्–

"ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषस्परि ।

एवानो दूर्वे प्रतनु सहस्त्रेण शतेन च॥[13]

तत् सर्वोषधिः हरिद्रा वा दद्यात्–

"ॐ या ओषधीः पूर्वा जाता देवेभ्य स्त्रियुगं पुरा ।

मनैनु बभ्रूणामहॅंशतं धामानि सप्त च ॥"[14]

ततः पूगीफलं कलशे दद्यात्–

"ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।

बृहस्पति प्रसूतास्तानो मुञ्चन्त्वॅंहसः ॥[15]

ततः दुग्धं दधिं धृतं च दद्यात्–

"ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे

पयोधाः । पयस्वती प्रदिशः सन्तु मह्यम् ॥"[16]

"ॐ दधिक्राब्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।

सुरभि नो मुखा करत्प्रण आयूॅंषि तारिषत् ॥[17]

ॐ घृतवती भुवनानामभि श्रियोर्वी पृथ्वीमधुदुघे सुपेशसा ।[18]

द्यावापृथिवी वरुणस्य धर्म्मणा विष्कभिते अजरे भूमरेतसा ॥

ततः पञ्चपल्लवं दद्यात्–

"ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ॥[19]

गोभाज इत्किलासथ यत्सनवथ पुरुषम् ॥"

ततः सप्तमृतिकाऽनेन मंत्रेण दद्यात्–

"ॐ स्योना पृथिवी नो भवानृक्षरा निवेशिनी ।[20]

यच्छा नः शर्म्म सप्रथाः ।। ततः पञ्चरत्नं जले दद्यात्–

"ॐ परिवाजपति कविरग्निर्हव्यान्यक्रमीत् ।[21]

दधद्रत्नानि दाशुषे ॥" कलशे सुर्वणं द्रव्यमवादद्यात्–"ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक असीत् । सदाधार पृथिवीं द्यामुते मां कस्मै देवाय हविषा विधेम।" तदनन्तरं कलशोपरि वस्त्रं दद्यात्–

"ॐ यदश्वायवास उपस्तृणन्त्यधीवासंया हिरण्यान्यस्मै ।
संदानमर्वन्तं षडवीशं प्रिया देवेष्वायामयन्ति ॥"[22]

धान्य ततः पूर्ण पात्रं स्थापितं कुर्यात्–

"ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत ।
वस्नेव विक्रीणावहा इषमूर्ज्जꣳशतक्रतो ॥"[23]

तदुपरान्तं कलशे वरुणस्य आवाहनं कुर्यात्–

"ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणे बोध्युरुशꣳ समान आयुः प्रमोषीः ॥[24]

ततपश्चात् कलशस्य अभिमंत्रणम् दक्षिण हस्तस्य अनामिकया स्पर्शं कृत्वा कुर्यात्–

"ॐ कलशस्य मुखे विष्णु कण्ठे रुद्रः समाश्रितः । मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्थिताः। कुक्षोतु सागराः सर्वे सप्तद्वीपा वसुन्धरा। ऋग्वेदोऽथ यजुर्वेद; सामवेदो ह्यथर्वणः । अङ्गैस्तु सहिताः सर्वे कलशं तु समाश्रिताः ॥ अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ।

"सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः । इति।[25]

तत षोडशोपचारैः–दशोपचारैर्वा संपूज्य-प्रार्थयेत्–

देवदानव संवादे मथ्यमाने महोदधौ ।
उत्पन्नोसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥
त्वतोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥

शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादिदं कर्म कर्तुमीहे जलोदभवे ।
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥[26]

कलशस्य प्रार्थनान्तरं अंग देवतानाम् आवाहनं "एतन्ते देवमीति[27] मन्त्रेण प्रतिष्ठां कृत्वा अधोलिखित वाक्येन सुप्रतिष्ठां कुर्यात्–"ॐ भूर्भुवः स्वः कलशे आवाहिताः ब्रह्मविष्णु वरुणसहिताः आदित्यादि नवग्रहाः विनायकादि पंचलोकपालसहिताः इन्द्रादिदश दिक्पालाः साङ्गाः सपरिवाराः सायुधाः सवाहनाः सुप्रतिष्ठिताः वरदाः भवन्तु।

तदनन्तरं यजमान कलशप्रतिष्ठा कर्मणः दक्षिणां दद्यात् ।

।। इति कलशस्थापनम् ।।

अथ नवग्रह पूजनम्

आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवायाति भुवनानि पश्यन् ॥1॥

(रक्त अक्षतं पुष्पं) सूर्यः 23

शत्रुघ्न भाष्य–सविता आदित्यः आयात्यागच्छति। किम्भूतः सविता? देवः स्तुतिदीप्तिक्रीडादियुक्तः । केनायाति? रथेन । किम्भूतेन ? हिरण्ययेन हिरण्मयेन सौवर्णेन। किंकुर्वन् ? भुवनानि भुवनवर्त्तिलोकान् पुण्य पापकर्तृन् पश्यन् साक्षिवन्निरीक्षमाणं इत्यर्थः न केवलमेव किं तु अमृतं देवं मर्त्यं मनुष्यं च निवेशयन् । "स्वे स्वे व्यापारे" इति शेष;। मनुष्याहि सूर्योदये यागादिभिर्देवान् प्रीणयन्ति। पुनः किम्भूतः सविता? आवर्त्तमानः। पुनः पुनस्तमेव देशमागच्छन् । केन सह? रजसा रात्रिकालेन । प्रायो रात्रौ रजोगुण बाहुल्येन रजः शब्देन रात्रिरुच्यते (निघं-1/7/12)। किम्भूतेन रजसा? कृष्णेन मलिनेन । प्रायो रात्रिकाले पुण्यकर्मणामनुत्पादनात् रात्रेः कृष्णत्वमुक्तम् । अयंवाक्यार्थः। यः सविता देवो मनुष्यव्यापारस्य स्थापकः यश्च पुण्यपापसाक्षी तस्यार्घादिकमुचितमिति। अत्र आयातीति व्यवहिते नाड़ा सम्बन्धः, आवर्त्तमान इत्यत्र च "छन्दसि परेऽपि" व्यवहिताश्चे 1/4/81-82) ति पाणिनीयसूत्रात् । हिरण्यय इति हिरण्यमार्थे निपात; (पा. 6/4/147) ।।1।।

उवट भा.–आ कृष्णेन । आवर्तमानः पुन पुनर्भ्रमणं कुर्वन् । कृष्णेन रजसा रात्रिलक्षणेन सह निवेशयन् स्वेषु स्वेषु प्रदेशेषु स्थापयन् अमृतं देवादिकम् मर्त्यं च मनुष्यादिकं च। हिरण्ययेन हरिण्यमयेन सविता रथेन। आदेवो याति आयाति देवः दानादिगुणयुक्तः भुवनानि भूतजातानि पश्यन् कानि कानि साधु कुर्वन्ति कानि कानि वा असाध्विति स्वरूपानुवादः।

इमं देवाऽअसपत्न ँ् सुवध्वं महते क्षत्राय महते ज्यैष्ठयाय महते जानराज्यायेन्द्रस्येन्द्रियाय । इममुष्य पुत्रममुष्यै पुत्रमस्यै व्विशऽएषऽवोमी राजा सोमोऽस्माकं ब्राह्मणानाꣳराजा ॥2॥

(श्वेताक्षत पुष्पं) चन्द्रमा (9.40)

श.भा.–हे देवाः! इमं राजानम् असपत्नं शत्रुरहितं सुवध्वजनयत्महते क्षत्राय (रक्षणाय)। महते ज्यैष्ठयाय ज्येष्ठत्वाय। महते जानराज्याय जनसम्बन्धि राज्याय । इन्द्रस्य इन्द्रियस्य वीर्याय सुवध्वमिति सर्वत्रान्वेति। इमं कम् ? अमुष्य पुत्रम् अर्थात् यजमानस्य पितुः । अमुष्यै अर्थात् अमुष्याश्च यजमान मातुः पुत्रम् इमं यजमानमित्यर्थः । असपत्नत्वादिकरणे हेतुमाह-वः युष्माकं विशः जनपदजाते एष राजा अस्तु। अस्माकं ब्राह्मणानाम् पुनः अमी असौ सोमो राजा। यद्वाहे कुरवः वः युषकमेष कौरव्यो राजाऽस्तु। तस्माद् भवदर्थ प्रार्थना क्रियते न तु स्वार्थमित्यभिप्रायः।

उ.भा.– इमं देवा असपत्नं सुवध्वम् । इमं राजानं हे देवाः, असपत्नं सुवध्वम् । महते क्षत्राय महते ज्यैष्ठयाय ज्येष्ठभागया महते च जनानां राज्याय। इन्द्रस्य च इन्द्रियाय वीर्याय। सुवध्वमिति प्रत्येकं संबन्धः। इमं आमुष्यपुत्रम् । अमुष्येति यजमानस्यं पितुः षष्ठयन्तं नाम गृह्यते। अमुष्यैपुत्रम् । अमुष्यै इति यजमानस्य मातृर्नाममग्रहः स आदित्येन मिथुनं संभवत् इत्यादि श्रुतिः। इममुष्य पुत्रमित्यादि स्तृतीयपादः सोमपरत्वेन व्याख्येयः। अस्यै विशे जनपदनामग्राहः। एषवः अमीराजा। एव वः कौखोराजा सोमः अस्तु। अस्माकं ब्राह्मणानां राजा।।

अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम् ।
अपाꣳरेताꣳसि जिन्वति ॥3॥[28]

(रक्त पुष्पं अक्षतं) मंगलः वर्णः श्वेतः

श. भा.—अग्निः स्तूयते-योऽयमग्निः दिवः मूर्द्धा आदित्यात्मना द्युलोकस्य मूर्धा भवति। अयमेव ककुत् महान् ककुद इति महन्नामसु पठितम् । अन्तलोपे कृते एतद्रूपम् । अयमेव महानात्मा जगत इत्यर्थः। अयमेवाग्निः पृथिव्याः पति ईश्वरः। तापपाकप्रकाशादिभिः सर्वाः प्रजाः अनुगृहणमातीत्यभिप्रायः, किंचायमेव अपां रेतांसि जिन्वति। रेतः कारणमुच्यते या एता आपः द्युलोकात्पतन्ति तासाम् अपां कारणानि जिन्वति जिन्वतिः प्रीतिकर्मा। पुष्णातीत्यर्थः। आहुतिपरिणामेन सो वृष्टिञ्जनयति इति दर्शितम् । यद्वा अयमिति कुज उच्यते कुजोऽपि दिवामूद्धेत्यर्थः। तेन कुज प्रकाशकत्वमस्य सम्भवति।

उ. भा.—अग्निर्मूर्धा । परापररूपेण व्यवस्थितोऽस्यामृच्यग्निः स्तूयते। अभिनयेन दर्शयति । योग्यं "अग्निर्मूर्धादिवः" अहनि आदित्यात्मा द्युलोकस्य मूर्धा भवति। अयमेव ककुत् । ककुदिति महन्नामसु पठ्यते । तस्य कृतान्तलोपस्यैतद्रूपम् । अयमेव महानात्मा जगतः कारणमित्यर्थः। अयमेव पृथिव्याः पतिः। तापपाकप्रकाशादिभिरयमग्निः सर्वाः प्रजा

अनुगृह्णातीत्यमभिप्रायः । किंच अयमेव अपां रेतांसि जिन्वति। या एता द्युलोकोत्पतन्ति तासामपां रेतांसि। रेतः कारणमुच्यते। तानि कारणानि जिन्वति। जिन्वतिः प्रीतिकर्म। तर्पयति परिपुष्यतीति यावत। आहुतिः परिणममाना वृष्टिं जनयतीत्येतद्दर्शयति । तथा च श्रुतिरग्निहोत्रं प्रकृत्य भवति " ते वा एते आहुती हुते उत्क्रामतः" इत्यारभ्य 'यस्ततः पुत्रो जायते स लोकः" इत्येवमन्ता आहुति परिणामवादिनी ।

उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सᳬसृजेथामयं च ।
अस्मिन्त्यसधस्थे अध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत ॥4॥[29]

ईशानकोणे हरितः धनुषः बुधः

श.भा.—हे अग्ने । उद्बुध्यस्व उद्बुद्धोभव। सुप्रकाशो भव। एनं यजमानं प्रति जागृहि त्वं जागरणशीलश्च भव। ततश्चेष्टापूर्ते संसृजेथाम् । अर्थात् यजमानेन सह। अयं च अयंयजमानोऽपि इष्टापूर्ताभ्यां संसृष्टो भवत्विति शेषः। इष्टं यागादि, पूर्तं तडागादि। यद्वा अयं बुधः तथा च अयं बुधोऽप्युदबुद्धो भवत्वित्यर्थः। तेन बुधः प्रकाशकतास्य मन्त्रस्य भवति। ततः अस्मिन् सधस्थे सहस्थाने देवैः समानस्थाने आदित्य लोके। विश्वेदेवा यजमानश्च सीदत सीदतु तथा च यजमानस्य विश्वेदेवैः सामानलोकता प्रार्थ्यते। आदित्यलोके किंभूते? अध्युत्तरस्मिन् सर्वोत्कृष्टे।

उ. भाष्य—उद्बुध्यस्व प्रतिबुद्धो भव। हे अग्ने, प्रतिजागृहि च त्वम् । ततः इष्टापूर्ते च संसृजेथाम् त्वत्प्रासादाद्यजमानेन सह। अयं च यजमानः इष्टापूर्ताभ्यां संसृष्टो भवतु। ततः संसृष्टेष्टापूर्तो व्यपगतकल्मषः सन् । अस्मिन्सधस्थे सहस्थाने देवैः। पुनरपि विशिनष्टि। अध्युत्तरस्मिन् सर्वोत्कृष्टे आदित्यलोके। विश्वेदेवा यजमानश्च सीदतु। विश्वैर्देवैर्यजमानस्य समानलोकता प्रार्थ्यते।

बृहस्पतेऽअति यदर्योऽअर्हाद्द्युमाद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवसऽऋत प्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥5॥[30]

(पीतः पुष्पाक्षतेन) बृहस्पतिः वर्णःपीतः

श. भा.— हे बृहस्पते । हे ऋतप्रजात ! ऋतात् सत्यात् प्रजापतेः सकाशात् प्रजातं प्रकृष्टं जातं जन्म यस्य इति ऋतप्रजातः तत्सम्बोधने रूपम् । अस्मासु द्रविणं धनं धेहि आधेहि धारय । यजमानेषु स्थापय देहीत्यर्थः। द्रविणं किं भूतं चित्रं नानाविदम् । तत्किं यत् धनम् अति अतिशयेन। अर्य्यः ईश्वरः अर्थात् पूजयेत् । यच्च द्युमत् द्युतिमत् विभाति शोभते। यत् जनेषु क्रतुमत् यज्ञवत् अभीष्टजनकत्वेन विभाति। यच्च शवसः शवसा बलेन दीदयत् दीप्यते यस्य रक्षितारो भवन्तीत्यभिप्रायः।

उ. भा.— बृहस्पते अति। बृहस्पतिसवेऽनया त्रिष्टुभा बृहस्पतिदेवतया ग्रहो गृह्यते। गृत्समदस्यार्षम् बृहस्पतेर्वा। हे बृहस्पते अतिशयेन यत् द्रविणं धनम् । अर्य ईश्वरः। अर्यशब्दः

स्वामिन्यन्तोदात्तः वैश्ये आद्युदात्तः। अर्हात् पूजयेत् । यज्ज द्युमद्विभाति द्युमत् द्युतिमत् विभाति भासते। क्रतुमज्जनेषु यच्च क्रतुमत् यज्ञवत् जनेषु विभाती त्यनुवर्तते। यत् दीदयत् शवसा यच्च दीप्यते शवसा बलेन। रक्षितारोऽपि यस्य सन्तीत्यभिप्रायः। हेऋतप्रजात ऋचात्सत्याद् विनाशिनः प्रजायत इति ऋतप्रजातः तत्संबुद्धौ हे ऋत प्रजात्, तत् द्रविणम् अस्मासु धेहि स्थापय। चित्रं नाना रूपम् । उपयाम गृहीतोसि बृहस्पतये त्वा। एष ते योनिर्ऽबृहस्पतये त्वा। स्थापनमन्त्रः।

अन्नात्परिस्रुतो रसम्ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः ।
ऋतेन सत्त्यमिन्द्रियं विपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥6॥[31]

(श्वेताक्षतपुष्पेण) शुक्रः

श. भाष्य—प्रजापतिः प्रथमशरीरी। अन्नात् अन्नस्य हविर्लक्षणस्य रसं परिश्रुतः। स्वधायाश्च रसं ब्रह्मणा त्रयीलक्षणेन व्यपिबत् विविच्यवि पीतवान् । पयः सोमं च व्यपिबत् वशीचकार। क्षत्रं चव्य पिबत् । अत्र पानं वशीकरणम् । सर्वमेतत् सत्यम्। अनेन च ऋतेनतत्सत्यं सञ्जातं यत्सोमम् इन्द्रियं वीर्यं सञ्जातं किंभूत वीर्यं सञ्जातं? यत्सोमम् इन्द्रियं वीर्यं सञ्जातं, किं भूतं वीर्यम् ? विपानं लोहितात् विविक्तम्, शुक्रं रेतो भिन्नम्, अन्नातसम्भूतमित्यर्थः । अथ इदं पय इन्द्रस्य इन्द्रियम् अमृतं मधु च भवतु।

उ.भा.—अन्नात्परिस्रुतः अन्नाद्हविर्लक्षणात् संपरिस्रुतश्च रसं ब्रह्मणा त्रयीलक्षणेन व्यपिबत् । क्षत्रं च व्यपिबत्। क्षत्रस्य पानं वशीकरण् पयः सोमम् प्रजापतिः प्रथम शरीरी। सत्यमेतत् ऋतेन सत्यमिति समानम् ।

शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये। शँय्योरभिस्रवन्तु नः॥7॥[32]

(कृष्णाक्षत पुष्पै) शनिः रक्तवर्णः

श.भा.—आपः नोऽस्माकं "पितृणामिति" शेषः शं भवन्तु कल्याण्यो भवन्तु। किम्भूताः? देवीः देव्यः। स्तुतिक्रीड़ादियोग्याः किर्मथम् ? अभिष्ट्ये—उपचयार्थं पीतये पानार्थं च । किं च नः पितृणां शंयो कल्याणयोगाय अभिस्रवन्तु अभिमुखं स्रवन्तु। शोयोरिति शं शब्दात् मत्वार्थीयो युस्प्रत्ययः। चतुर्थ्यर्थे षष्ठी। अभिष्ट्य इति "स्त्यैष्ट्यै शब्द संघातयोः" (चा. प.) अभिपूर्वः "स्त्यः पूर्वस्ये (पा. 6/1/23) ति योग विभागात्सम्प्रसारणं, तादर्थ्ये चतुर्थी ।

उ. भा.—शं नो देवी; । अब्देवत्या गायत्री। सुखरूपा अस्माकम् देवीः देव्यः अभिष्टये अभिषेकाय अभीष्टाय वा। आपः भवन्तु पीतये पानाय च। शं योः शमनाय रोगाणां पृथक्करणाय भयानां वा। अभिस्रवन्तु नः अस्माकम् ।

कयानश्चित्रऽआभुवदूती सदावृधः सखा ।
कया शचिष्ठया वृता ॥8॥[33]

(कृष्ण अक्षतैः पुष्पैः राहुः पीतः)

श.भा.—चित्रः चायनीयः इन्द्रः। कया ऊती ऊत्या केन पुनखनेन् तर्पणे। नः अस्माकं सदावृधः सदाकालंवर्धयिता। भुवत् भूयात् । कया च आवृताकर्मणा (परिपाटया) नः अस्माकं सखा सहायश्च आभुवत् आभिमुख्येन भवेत् । यद्वावर्त्तत इति वृत् तया वृता वर्त्तमानया, किंभूतया? शचिष्ठया "शची"ति कर्मनाम। (निघं. 2/5) अतिशयेन शची "शचिष्ठा" तया अतिशयेन कर्मवत्या। कीदृश इन्द्रः? चित्रः विचित्रः पूज्यो वा ।

उ. भा.—कयात्वम् । गायत्री। ऐन्द्री अनिरुक्ता । हे इन्द्र, कया ऊत्या केन वा गमनेन त्वम् नः अस्मान् अभिप्रमन्दसे अभिमोदयति हर्षयसि । हे वृषन् सेक्तः कया च ऊत्या केन वा गमनेन स्तोतृभ्यः दातुं धनानि आभर आहरसि । लऽर्थे लोट् । तत्कथय। येन तथानुतिष्ठामः ।

केतुः कृण्वन्नकेतवे पेशो मर्याऽअपेशसे। समुषद्भिरजायथाः॥9॥[34]

धूसरः केतुः रक्तवर्णः

श. भा.—हे केतो ! अकेतवे न विद्यते केतु ज्ञानं यस्य सोऽकेतुः तस्मै अज्ञानाय। केतुं ज्ञानं (निघ्. 3/9/2) कृण्वन् कुर्वन् । उषन्ति हविर्दहन्ति ते उषन्तोऽग्निहोत्रकर्त्तारो यजमानाः । अपेशसे अरूपाय अधनाय वा। मर्याः मर्याय मनुष्याय । पेशः रूपं (निघ्. 3/7/10) हिरण्यं वा (निघ 1/26) किङ्कुर्वन् ? कृष्ण्वन् । तैस्त्वं प्रार्थितः एवजायथा उत्पन्नोऽसि।

उ. भा.—उत्तरमश्वारदक्षिणो योद्धारः युद्धोपकरणानि च स्तूयन्ते प्रागाग्नेय इति श्रुते. केतुं कृण्वन् । आग्नेयी गायत्री अनिरुक्ता । केतुं प्रज्ञानं कृण्वन्कुर्वन् । अकेतवे न विद्यते केतुः प्रज्ञानं यस्य तस्मै अकेतवे। पेशः सुवर्ण रूप्यं वा। मयः मर्यायेति विभक्ति व्यत्ययः। मर्याय मनुष्याय अपेशसे न विद्यते पेशः यस्य तस्मै अविद्यमान सुवर्माय अविद्यमानसुंवर्णाय- अविद्यमान रूप्याय वा पेशः कुर्वन् । समुषद्भिरजायथा हे अग्ने, उषद्भि। "उषदाहें" अग्निहोत्रादीनि कुर्वद्भिः। जायमानः सन् जन्मना जातेर्वा वसतेर्वा कृतसंप्रसारणस्यैतद्रूपम्। उषद्भिः अग्निं प्रति निवसद्भिः जायमानः सन् समजायथा उत्पद्यसे।

पञ्चोपचार पूजनम्

देवपूजनस्य विविध प्रकारेषु पञ्चोपचार पूजनस्य महत्वपूर्णं स्थानं वर्त्तते। आचारचन्द्रोदये पञ्चोपचार पूजन सन्दर्भे उक्तमस्ति यत्—

"सपर्या विविधा प्रोक्ता तासामेकां समाश्रयेत् ।

गन्धादिकान्ता नैवेद्या पूजा पञ्चोपचारिकी ॥"[35]

अर्थात् सपर्या पूजनं गन्ध समर्पणं, पुष्पं, धूपं दीपं नैवेद्यम् समर्पण् इति पञ्चोपचार पूजनमुच्यते । कृत्यप्रदीपे पञ्चोपचार पूजनस्य विधानम उच्यते यत्—"गन्धादितो नैवेद्यान्ता अत्र

च इदमनु लेपनम्,. ॐ विष्णवे नमः इति त्रि पुष्पांणि। एष धूप एष दीपः ॐ विष्णवे नमः। इदं नैवेद्यम् ॐ विष्णवे नमः ।

अर्थात् सर्वप्रथम गन्ध समर्पणम्, तदनन्तरं इदमनुलेपनं कथयित्वा चंदनम् ॐ विष्णवे नमः इत्यनेन त्रि पुष्पाणि। तदुपरान्तं धूपदीप समर्पणम् अन्ते नैवेद्यसमर्पण् इत्येवं पञ्चोपचार पूजनम् कथ्यते इति ।

षोड्शोपचार पूजनम्

देवपूजनकर्मणि षोड्शोपचारस्य विधानं सर्वोत्कृष्टं कथ्यते। आचारचन्द्रोदये उक्तमस्ति–

"आसनं स्वागतं चार्घ्यं पाद्यमाचमनं तथा ।
मधुपर्काचमन स्नान वसनाभरणानि च ।
गन्ध .पुष्पधूपदीपनैवेद्यं चन्दनन्तथा ।।"[36]

आसनं स्वागतम् अर्घ्यं पाद्यम्, आचमनं मधुपर्काचमनम् स्नानं वस्त्राभूषण प्रदानं गन्ध पुष्प धूप दीप नैवेद्यास्तथा चन्दनसमर्पणमिति षोडशोचार पूजनस्य प्रधानाङ्गमित्युच्यते। कृत्यप्रदीपानुसारेण–

"आसनं स्वागतं चार्घं पाद्यमाचमनीयकम् ।
मधुपर्काचमनं स्नानं वसनाभरणानि च ।
गन्धपुष्पौ धूपदीपौ नैवेद्यचन्दनन्तथा ।[37]

षोडशोचारपूजनस्य महत्वविषये स्मृतिकौस्तुभ नामके ग्रन्थे उल्लिखितमस्तियत् सर्वप्रथम इच्छित देवतायाः ध्यानस्तास्योपरान्तं षोडशवस्तूनां सहाय्येन षोड्शोपचारपूजनम् करणीयमिति।

अथ रक्षाविधानम्

यवकुशदूर्वा सर्पषः गन्धाक्षतदधि सहितं गोमयं ताम्रपात्रे संस्थाप्य तस्मिन्नेव पात्रे रक्षासूत्रं स्थापयेत् । रक्षासूत्रं स्वदक्षिण हस्ते स्पर्शं कृत्वामंत्र पठेतदिति–

"ॐ गणाधिपं नमस्कृत्य नमस्कृत्य पितामहम् ।
विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम् ।।
स्थानक्षेत्रं नमस्कृत्य दिननाथ निशाकरम ।
धरणीगर्भसंभूतं शशिपुत्र बृहस्पतिम् ।।
दैत्याचार्यं नमस्कृत्य सूर्यपुत्र महाग्रहम् ।
राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः ।।
शक्राद्याः देवताः सर्वा नमस्कृत्य मुनीस्तथा ।
गर्गं मुनिं नमस्कृत्य नारदं मुनिसत्तमम् ।।

वशिष्ठमुनिशार्दूलं विश्वामित्रं महामुनिम् ।
व्यासं कविं नमस्कृत्य सर्वशास्त्र विशारदम् ।।
विद्याधिका ये मुनय आचार्याश्च तपोधनाः ।
सर्वे ते मम यज्ञस्य रक्षां कुर्वन्तु विघ्नतः ।।
प्राचीं रक्षतु गोविन्दः आग्नेयीं गरुड़ध्वजः ।
यामीं रक्षतु वाराहो नारसिंहस्तु नैर्ऋतीम् ।।
केशवो वारुणीं रक्षेद् वायवीं मधुसूदनः ।
उदीचीं श्रीधरो रक्षेदैशानीं तु गदाधरः ।।
ऊर्ध्वं गोवर्धनधरो ह्यधस्ताद्धरणीधरः ।
एवं दश दिशो रक्षेद् वासुदेवो जनार्दनः ।।
यज्ञाग्रे रक्षताच्छंखः पृष्ठे पद्मं तथोत्तमम् ।
वामपार्श्वे गदा रक्षेद् दक्षिणे तु सुदर्शनः ।।
उपेन्द्रः पातु ब्रह्मणामाचार्यं पातु वामनः ।
अच्युतः पातु ऋग्वेदं यजुर्वेदमधोक्षजः ।।
कृष्णो रक्षतु सामानि ह्यथर्वं माधवस्तथा ।
उपविष्टाश्च ये विप्रास्तेऽनिरुद्धेन रक्षिताः ।।
यजमानं सपत्नीकं पुण्डरीक विलोचनः ।
रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्षताद्धरि ।।[38]

रक्षाविधानान्तरं जौ कुशादीनां अथवा केवलं सर्षपः रक्षासूत्रेबन्धनं कृत्वा वैदिकमन्त्रेण अभिमन्त्रयेत् । अभिमन्त्रण-मन्त्राः ।

"ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्।।[39]

ॐ गणानां त्वा गणपतिꣳहवामहे प्रियाणान्त्वा प्रियपतिꣳहवामहे निधीनान्त्वा निधिपतिꣳहवामहे वसो मम आहमजानिगर्भधमात्वमजासि गर्भधम्।।[40]

ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स तः पर्षदति दुर्गाणिविश्वा नावेव सिंधु दुरितात्यग्निः ।।[41]

ॐ सप्त ऋषयः प्रतिहिता शरीरे सप्त रक्षन्ति सद्मप्रमादम् सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ ।

ॐ न तद्रक्षाꣳसि न पिशाचामिस्तरमन्ति देवानामोजः प्रथमजꣳह्येतत् । यो बिभर्त्ति दाक्षायणꣳ हिरण्यꣳ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः।।

ॐ यदा बध्नन्दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः। य तन्सऽआवध्नामि शतशारदायायुष्मान् जरदष्टिर्यथाऽऽसतम् ।।

ॐरक्षोहणं बलगहनं वैष्णवीमिदमहन्तं बलगमुत्किरामि यम्मे निष्टयोमम-त्योनिचखानेदमहन्तं बलगमुत्किरामि यम्मे सजातो यमसजातो निचरवानोत्कृत्यां किरामि।।

ॐ स्वराऽसि सपत्नहा सत्रराऽस्याभिमतिहा।
जनराऽसि रक्षोहा सर्वराऽस्य मित्रहा ॥

रक्षोहणो वो वलहनः प्रोक्षामि वैष्णवान् रक्षोहणो वो वलगहनोऽवनयामि वैष्णवान् रक्षोहणो वै वलगहनोऽस्तृणामि वैष्णवान् रक्षोहणौ वां बलगहना उपदधामि वैष्णवी रक्षोहणौ वां बलगहनौ पर्यूहामि वैष्णवी वैष्णवमसि वैष्णवाः स्थ ।

मा न : शꣳसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य । रक्षाणो ब्रह्मणस्पते ।।

प्रत्युष्टꣳरक्षः प्रत्युष्टा अरातयो निष्टप्तꣳरक्षो निष्टप्ताऽ अरातयः। ऊर्वन्तरिक्षमन्तवेमि।। रक्षोहा विश्वचर्षणिरभियो नियमतोहते । द्रोणो सदस्थमासदत्।।

एतैः मन्त्रैः अभिमन्त्रणं कृत्वा कर्मण अन्ते सर्षपपोटलिं यजमानस्य दक्षिण हस्ते बध्नीयात् । बंधनकाले मन्त्रं पठेत् यथा–

येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वामभिबध्नामि रक्षे मा चल मा चल ॥

त्वंय्यविष्ठदाशुषो नॄंः पाहि श्रृणुधी गिरः रक्षातोकंमुतमना। रक्षा सुरक्षा भूयात्। इतिरक्षाविधानम् ।

अथ कुशकण्डिका

अथातो गृह्यस्थालीपाकानां कर्म । अर्थात् यस्य कर्मणः अन्ते चरुपाकं भवति सः कुशकण्डिका इत्युच्यते। यतः कारिकाकारः वदति "कुशंडी चरुपाकान्ता इति।।[42]

परिसमुह्योपलिप्योल्लिख्योदधृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य्य प्रणीय परिस्तीर्थ्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणी संस्कृत्यार्थ वत्प्रोक्ष्य निरूप्याज्यमाधिश्रित्य पर्य्यग्नि कुर्य्यात्।[43] स्रुवं प्रतप्य संभृज्याभ्युक्ष्य पुन प्रतप्य निदध्यात् ।[44] आजय्मुदवास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्ववद्घपयमनान् कुशानादाय समिधोऽभ्याधाय पर्य्युक्ष्य जुहुयात् । एष एवं विधिर्यत्र क्वचिद्होमः।

यजमान संस्कारार्थं हवन निमित्तं प्रथमं शुद्ध भूमौ सप्तविंशति अगुलीयकं एक हस्त परिमिता वा वृहद् वेदीं कुर्यात् । तदनन्तरं पञ्चभूः संस्कारं कुर्यात्। तत्र प्रथमं परिसमूहनम् अर्थात् कुण्डंवेदींवा त्रिः कुशैः शोधयेत् । उपलेपनम् - गौ गोमयेन उपलेपनम् कुर्यात्। उल्लेखनम् - खड्गसदृश हस्तपरिमितं स्फ्य स्रुवेण वा वेद्याः परिमाण सदृशं रेखात्रयम्।

उद्धरणम्- रेखाक्रमणे रेखाया; मृत्तिकायाः अनामिकया अगुष्ठेन च ईशानकोणे क्षेपणम् ।

अभ्युक्षणम्–वेद्याः उपरि कमण्डलुजलक्षेपणम् इति पञ्चभूसंस्कार; उच्यते। तदनन्तरम् अग्नि उपसामाधाय । इमं मन्त्रं पठेत्–

"ॐ अग्निं दूतं पुरदधे हव्यवाहमुपब्रुबे देवाँ।। आसादयादिह ।।

अग्निस्थापनात् परं यजमान आचार्यः ब्रह्मणः पूजनपूर्वकं वरणस्य संकल्पः कुर्यात्–

"अद्येहामुकोहं अमुककर्मनिमित्तकहोमकर्मणि आचार्य ब्रह्मणोः पूजनपूर्वकं वरणं करिष्ये।

वरणान्तरम् आचार्यः निम्न मन्त्रेण अर्घं दत्वा गन्धविलेपनं कुर्यात्–

"भूमिदेवाग्रजन्मासि त्वं देव पुरुषोत्तम ।
प्रत्यक्षे यज्ञपुरुष : अर्घोयं प्रतिगृह्यताम् ।।
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।

आचार्यः एतेन मन्त्रेण गन्धाक्षतै; पूजनं कृत्वा वरणस्य संकल्पं कुर्यात्–

"एभिर्गन्धाक्षत पुष्पपूगीफलद्रव्य यज्ञोपवीतपुष्पमालावासोऽलङ्करणादिभिः करिष्यमाणामुकहोमकर्मणि आचार्यकर्म कर्त्तुम् आचार्य्यत्वेन त्वामहं वृणे ।।" तदा आचार्यः "वृतोऽस्मि" इति उक्त्वा वरणसामग्रीं स्वीकुर्यात् । एतेनैव प्रकारेण ब्रह्मणः वरणमपि कुर्यात् तदर्थम् संकल्पं कुर्यात्–

"अमुकहोमकर्मणि कृतांकृतावेक्षणाय ।
ब्रह्मकर्म कर्त्तुं ब्रह्मत्वेन त्वामहं वृणे ।।"

ब्रह्मा अपि "वृतोऽस्मि" इति उक्त्वा वरण सामग्रीं स्वीकरोति। तदनन्तरं यजमानः यथाक्रमं आचार्यः ब्रह्मणः प्रार्थनां करोति–

"आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ।
तथात्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ।।
यथा चतुर्मुखो ब्रह्मा सर्ववेदधरो विभुः ।
तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ।।
अस्य यज्ञस्य निष्पत्यै भवन्तोऽभ्यर्थिता मया ।
सुप्रसन्नैर्हि कर्तव्यं शान्तिकं विधिपूर्वकम् ।।

यजमानः आचार्यं प्रति वदेत्–

"अस्मिन्नकर्मणि त्वं मे आचार्यो भव ।। तदा आचार्यः प्रतिवदेत् - अहं भवानि । तदनन्तरम् - 'त्वं मे ब्रह्माभव । अहं भवानि। इति यजमानः ब्रह्मा च कथयेत् –"दक्षिणतो

ब्रह्मासनमास्तीर्य । तदनन्तरं प्रणीय परिस्तीर्य शतपथे उक्तम् यत्–''सहैषै यज्ञ उवाच नग्नताया वै विभेमीति, का तेऽनग्नतेत्यमित एव मा परिस्तृणीयुरिति तस्मादेतदग्निममितः परिस्तृणन्ति'' इति। अर्थवादासाद्य पवित्रे कृत्वा प्रोक्षणी संस्कृत्य, अर्थवत्प्रोक्ष्य, निरूप्याज्यम्- अधिश्रित्य-पर्यग्निं कुर्यात् । स्रुवं प्रतप्य, संमृज्य, अक्ष्युक्ष्य, पुनः प्रतप्य निदध्यात् । आज्यद्वास्य उत्पूय, अवेक्ष्य, प्रोक्षणीश्च पूर्ववत् । उपयमनान् कुशानादाय, समिधोऽभ्यादाय। इमं मन्त्रं पठेत्–

"ॐ समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् ।
अस्मिन् हव्या जुहोतन ॥
सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन ।
अग्नये जातवेदसे ॥
तन्त्वा समिद्भिरङ्गिरो घृतेन वर्द्धयामसि ।
बृहच्छोचा यविष्ठया ॥
ॐ उपत्वाग्नेर्हविष्मती घृताचीर्य तु हर्यत् ।
जुषस्व समिधो मम 4 स्वाहा ॥

पर्युंक्ष्य जुहुयात् ।

तदनन्तरं संकल्पपूर्वकं द्रव्यदेवतायाः अभिध्यानं कुर्यात् –

"अद्येहामुकोहं अमुकहोमकर्मणा यक्ष्ये तत्र प्रजापतिं इन्द्रं अग्निं, सोमं, अग्निं, वायुं सूर्यं, अग्नीवरुणौ, अग्नीवरुणौ, अग्निं, वरुणं सवितारं विष्णु विश्वान्मरुतः स्वर्कान्, वरुणमदितिं, प्रजापतिं, अग्नि स्विष्टकृतं चाज्येनाहं यक्ष्ये। एतद्धोमद्रव्यं तत्तदेवताभ्यो मया परित्यक्तं ॐ तत्सद्यथादैवतमस्तु न मम ।

तदनन्तरं एतन्ते इति मन्त्रेण अग्नेः प्रतिष्ठां कृत्वा ध्यानं कुर्यात् । अग्निः ध्यानम्–

''तदेवाग्निस्तदादित्य स्तद्वायुंस्तदु चन्द्रमाः ।
तदेव शुक्रं तद ब्रह्म ता आपः स प्रजापतिः ॥
सर्वे निमेषा जज्ञिरे विद्युत पुरुषादधि ।
नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ॥

न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः । हिरण्यगर्भ इत्येष मा मा हिंꣳ सीदित्येषायस्मान्नं जात इत्येषः ॥

एषोहि देवः प्रदिशोऽनु सर्वाः पूर्वोह जातः स उ गर्भे अन्तः। स एव जातः स जनिष्यमाण; प्रत्यङ्ङनास्तिष्ठति सर्वतोमुखः ॥

ॐ चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षेसप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरीति महोदेवो मर्त्यां ꣳआविवेश ॥''

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं सर्वतो मुखम् ॥
सर्वतः पाणिपादश्च सर्वतोक्षिशिरोमुखम् ।
विश्वरूपो महानग्निः प्रणीतः सर्वकर्मसु ॥

एतेन प्रकारेण अग्नेः ध्यानं कुर्यात्–

"ॐ अमुकाग्नये नमः ।।" अधोलिखित मन्त्रेण अग्नेः आवाहनं कुर्यात्–

"ॐ वैश्वानरो न ऊतय आप्रायातु परावतः । अग्निर्नः सुष्टुतीरुप।।"

अग्नेः आवाहनानन्तरं पाद्यात् नीराजनपर्यन्तं अधोलिखित मन्त्रेण पूजनं कुर्यात्–

"ॐ अग्ने नय सुपथाराये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराण मेनो भूयिष्ठान्ते नम उक्तिं विधेम ॥ अमुकाग्ने नमः ।

तत पश्चात् निम्नलिखित नाममन्त्रेण वेद्यां खचित रेखानां पूजनं कुर्यात्–

प्रथम रेखायाम्–"ॐ ब्रह्मणे नमः ।

मध्य रेखायाम् –ॐ विष्णवे नमः ।

पृष्ठ रेखायाम्–ॐ रुद्राय नमः ।।

ततः अग्नेः जिह्वायाः पूजनम् क्रमशः कुर्यात्–

ॐ कराल्यै नमः । ॐ धूमिन्यै नमः । ॐ श्वेतायै नमः । ॐ लोहितायै नमः । ॐ महालोहितायै नमः । ॐ सुवर्णायैनमः । ॐ पद्मरागायै नमः ।

तदनन्तरं आघार आहुति द्वयं दद्यात्–

"ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम ।
ॐ इन्द्राय स्वाहा, इदमिन्द्राय न मम ॥

आज्याभागद्वयस्य आहुतिं दद्यात्–

"ॐ अग्नये स्वाहा, इदमग्नये न मम ।
ॐ सोमाय स्वाहा, इदं सोमाय न मम ।

तदनन्तरं व्याहृतित्रयानाम् आहुतिः, सर्वप्रायश्चित्त आहुतिं दत्वा एकं प्राजापत्य आहुतिं दद्यात् । एकं स्विष्टकृत आहुतिं दद्यात् । तदनन्तरं अंगानाम आप्यायनम् पुनश्च त्र्यायुष अनन्तरं होमांगरूपतयाः दक्षिणाया संकल्पम् कुर्यात् । तदन्तरं निम्न मन्त्रेण अग्नेः विसर्जनं कृत्वा अभिषेकं तिलकं रक्षाबन्धनं घृतच्छायायाम् मन्त्रपाठं कृत्वा कृत्यम् समापयेत्।।

।। इति कुशकण्डिकाः।।

संदर्भ - ग्रन्थ

1. शु. य. सं.-
2. शु. य. स. 25/20.
3. शु. य. सं.-25/21
4. शु. य. सं.-25/22
5. शु. य. सं.-25/23
6. शु. य. सं.-20/22
7. शु. य. सं. 26/17.
8. शु. य. सं.-8/32.
9. शु. य. सं.-12/96.
10. शु. य. सं. 8/42.
11. शु. य. सं. 8/36.
12. शु. य. सं. 22/22.
13. शु. य. सं.-13/20.
14. शु. य. सं. 12/75.
15. शु. य. सं. 12/89.
16. शु. य. सं. 18/36.
17. शु. य. सं. 23/32.
18. शु. यं सं.–34/45
19. शु यं. सं 12/70
20. शु. यं. सं. 36/13
21. शु. यं. सं. 11/25
22. शु. यं. सं. 25/10
23. शु. यं. सं. 25/39
24. शु. यं. सं.-3/49.
25. शु.यं. सं.18/49.
26. पौराणिक मन्त्राः
27. श्रुति परम्परया
28. शु.यं.सं. 2/12
29. शु. यं. सं. 34/31
30. शु. यं. सं. 3/15
31. शु.यं.सं. 15/54
32. शु.यं.सं. 26/3
33. शु.यं.सं. 1/9/75

34. शु.यं.सं. 36/12
35. शु.यं.सं. 36/4
36. शु.यं.सं. 29/37
37. आचार चन्द्रोदयः
38. तत्रैव
39. कृत्यप्रदीपः
40. सनातन संस्कार विधिः
41. शु.य. संहितायाम्
42. शु.य. संहितायाम्
43. ऋग्वेदः
44. पा. गृ. सूत्र कां 1 कं. 1.

तृतीयोऽध्यायः

संस्कारशब्दार्थ तत्प्रयोजन निरूपणम्

सम् पूर्वकात् कृ धातो भूषणार्थे सुट प्रत्यये कृते संस्कृति शब्दः निष्पद्यते। यस्यायमर्थः लौकिक पारलौकिक धार्मिकाध्यात्मिकार्थिक राजनैतिक अभ्युदयेन संबद्धानि मनबुद्धिरहंकारादिभिः चेष्टितानि संस्कार सम्पन्नानि कर्माणि संस्कृति पदेन व्यवहर्तव्यानि भवन्ति। संस्कार शब्दाथः मलापनयनेन गुणानामाधानं अवगम्यते। अर्थात् अन्तर्बाह्य स्थितानि यानि कानिचित् अनपेक्षितानि हानिकराणि तत्वानि सन्निहितानि भवन्ति तेषामपसारणपूर्वकं अतिशयेनेष्ट तत्त्वस्य संस्थापनमेव संस्कारा;। संसारेऽस्मिन् सर्वेषां राष्ट्राणां कृते संस्कारस्य सर्वोपरि उपयोगिता वर्तते। संस्कार विहीने सति राष्ट्रे विप्लवाः जायेरन् । राष्ट्राणि च विनश्येरन् । तस्मात् संस्कारेण सह राष्ट्रस्य आसाधारण सम्बन्धो वर्त्तते। संस्कृति संरक्षणाय अपि संस्काराणाम् आवश्यकता महद् वर्त्तते। संस्काराः मुख्य रूपेण षोड्श वर्तन्ते। एतैरेव संस्कारै संस्कृताः सन्तः मानवाः संस्कृतिवन्तो भवन्ति। यतः चरकणोक्तम् "संस्कारो हि गुणान्तराधान मुच्यते" इति । मानव जन्मनि पितरो असाधारणं कारण भवतः । तयो वंशानुक्रमेण ये सुरक्षिताः संस्कारा भवन्ति तेन शिशावारक्षिता; सम्मिलित रूपेण भवन्ति। अपरश्च बालकस्य जन्जन्मान्तरागता संस्कारा; समायान्ति। उभयोः संस्कारयोः महान् संघर्षः शिशोर्मनसि जायते। तत् कुसंस्कारोन्मूलनाय सुसंस्कार संवर्द्धनाय च गर्भाधानप्रभृति एकादश संस्काराः उपनयान्ताः अष्टवर्षं यावत् नैरन्तर्येण भवन्ति। एभिः संस्कारैः गर्भदोषा दूरीक्रियन्ते । तदर्थमुक्तं मनुना–

"गाभैर्होमेर्जातकर्म चौड़ मौञ्जी निबन्धनैः ।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते ।।

अर्थात् गार्भिका; संस्कारा जातकर्मादि संस्कारैः चूड़ाकरणोपनयनादिभिश्च विनष्टा जायन्ते।

शिशुः शुद्ध शरीर सन् "स्वस्थे शरीरे एवं स्वस्थं मनः समुत्पद्यते" इति वचनं परिपुष्टं जायते। षोडश संस्काराणां सामाजिक स्वस्थतायै ऋषिभिः अविष्काराः कृताः।

गर्भाधान संस्कारः

तत्र प्रथमः संस्कारः गर्भाधान नामधेयः। संस्कारोऽयं क्षेत्रपरिष्कारायं गर्भदोषापनयनाय च विभिन्न प्रकारकैः क्षेत्र संस्कारोपयोगि श्वेतपुष्प्या; वषट्कारिकायाः मूलं उपपेषणं पिष्ट्वा

पत्न्याः नासिकायामासेचनं कुर्वन् कूर्मपित्तचोपस्थे आधाय अनामिकया मन्थनं अनेकेषां रोगकृमीणां गर्भ विघातकानां विनाशाय भवति। अनेन संस्कारेण विनाधीता गर्भाः सदोषद्रुता शिशुरोग सहिताः प्रायशो भवन्ति। किन्तु अनेन संस्कारेण संस्कृतो गर्भः संस्कार सम्पन्नं निरुपद्रवं गर्भं कृत्वा बलवन्तं स्वस्थं शिशुं उत्पादयति। एतेन हि सुसंस्कृताः शिशवः समुत्पद्येरन् तदर्थं पत्नी मध्यमं पिण्डं समन्त्रकं प्राश्नाति–'आधत्त पितरो गर्भं कुमारं पुष्करस्त्रजम्। यथेह पुरुषो सत्''। मन्त्रोऽयमुदात्तभावान् अभिव्यनक्ति। गर्भाधानसंस्कारस्य परिभाषा सुश्रुतेन संहितायाम् उक्तमस्ति यत्–''शुक्रशोणितं गर्भाशयस्थमात्मप्रकृति विकार संमूर्च्छि गर्भ इत्युच्यते, गर्भस्य आधानं यस्मिन्नयेन वा कर्मणा तद्गर्भाधानम्।[1]

व्यास स्मृतौऽपिकथितमस्ति यत् –

षोडशर्त निशास्त्रीणां तस्मिन्युग्मासु संविशेत्।
ब्रह्मचार्येव पर्वाण्याद्याश्चतस्त्रश्च वर्जयेत्॥
रजोदर्शनतो दोषात् सर्वमेव परित्यजेत्।
सर्वैरलक्षित शीघ्रं लज्जितान्तर्गृहे वसेत्॥
एकांवरावृता दीना स्नानालंकारवर्जिता।
मौनिन्यधोमुखी चक्षुः पाणिपदभिरचंचला॥
अश्नीयात्केवलं भक्तं नक्तं मृण्मयभाजने।
स्वपेद् भूमावप्रमात्ता क्षेपदेवमहस्त्रयम्॥
स्नायीत च त्रिरात्रान्ते सचैलमुदित रवौ॥
विलोक्य भर्तुर्वदनं शुद्धा भवति धर्मतः।
कृत शौचा पुनः कर्म पूर्ववच्च समाचरेत्॥[2]

मनुनापि उक्तम् यत् —

''ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदा॥
पर्व वर्जं व्रजेच्चैनां तदव्रतो रतिकाम्यया॥[3]

अर्थात् स्त्रियामनुरक्तः ऋतुकालाभिगामी पुरुषः

सर्वदा अमावस्या पूर्णिमा, चतुर्दशी, अष्टमी तिथिम् परित्यज्य गर्भाधानं कुर्यात्। सुश्रुतेनाप्युक्तम् यत्–

''आहाराचारचेष्टाभिर्यादृशीभिः समन्वितौ।
स्त्री पुंसौ समुपेयातां तयो पुत्रोऽपि तादृशः॥[4]

अर्थात् यादृशः आहार चेष्ट भियुक्तं

स्त्री पुरुषाः संगमं कुर्वन्ति तादृशः गुणयुक्तः तेषां पुत्रोऽपि जायते। गर्भस्य लक्षणम्

सुश्रुतेन उक्तम्–

"तत्र सद्योगृहीत गर्भाया लिङ्गानि,
श्रमोग्लानिः पिपासा सक्थिसदनम्।
शुक्रशोणितयोरंवधः स्फुरणं च योनेः।[5]

पूर्णगर्भाधारण लक्षणं सुश्रतेनभाषितम् यत्–

"आर्तवादर्शनमास्य संस्रवणमनन्नाभिलाषः छर्दिररोच-कोऽम्लकामता च विशेषेण, श्रद्धा प्रणयनौः चोच्चावचेषु भावेषु गुरुगात्रत्वम्, चक्षुषो ग्लानिः स्तनयो स्तन्यमोष्ठ स्तनमण्डलयोश्च कार्ष्ण्यमत्यर्थम् श्वयथुः पादयोः रीषल्लोमराज्या योन्याश्च चाटालत्त्वमिति गर्भे पर्य्यागते रूपाणि भवन्ति।[6]

गर्भ दिवसात् संतानोत्पत्ति पर्यन्तं गर्भिण्याः कृते केचन् नियमाः अपि पालनीया भवन्ति यथा–

गर्भिणी प्रथमदिवसात प्रभृति नित्यं प्रहृष्टा शुच्यलंकृता शुक्लवसना शान्तिमंगलदेवताब्राह्मण गुरुपरा च भवेत्।[7] मलिन विकृत हीनांगांनि न स्पृशेत् दुर्गन्धदुर्दर्शनानि परिहरेदुद्वेजनीयाश्च कथाः, शुष्क पर्युषितं क्वथितं क्लिनं चान्नं नोपभुञ्जीत, बहिर्निष्क्रमणं शून्यागारश्चैत्य श्मशानवृक्षाश्रयान् क्रोधामायासकरांश्च भारानुच्चैर्भष्यादिकं परिहरेत्,[8] यानि च गर्भं व्यापदयन्ति, न चाऽभीक्ष्णं तैलाभ्यंगो-त्सादनानि निषेवेत्, नचायासेच्छरीरं पूर्वोक्तानि च परिहरेत्, शयनासनं मृद्वास्तरणं नात्युच्चमपाश्रयोपेतमंसवाधं विद्ध्यात् हृद्यं द्रवं मधुरप्रायं स्निग्ध दीपनीयं संस्कृतं च भोजनं भोजयेत् सामान्यमेतदा प्रसवात्।[9]

पद्मपुराणेऽपि उल्लिखितमस्ति यत्–

नावस्करेषूप विशेन्मुसलोलूखलादिषु।
जलञ्च नावगाहेत् शून्यागारं विवर्जयेत् ॥10॥
वल्मीके नाधितिष्ठेत न चोद्विग्नमना भवेत्।
विलिखेन्न नखैर्भूमि नांगारेण न भस्मना ॥11॥
न शयालुः सदा तिष्ठेद् व्यायामञ्च विवर्जयेत्।
न तुषागारभस्मास्थिकपालेषु समाविशेत् ॥12॥
वर्जयेत्कलहं गेहे गात्रभंगं तथैव च।
न मुक्तकेशा तिष्ठेत् ना शुचिः स्यात् कदाचन ॥13॥
न शयीतोत्तर शिरा न चैवाधश्शिरा; क्वचित्।
न वस्त्रहीनां नोच्छिष्टा न चार्द्रचरणा तथा ॥14॥[10]

पारस्कर गृह्यसूत्रे गर्भाधान संस्कारस्य प्रमाणरूपेण मंत्रोऽयं उदाहृतमस्ति यत्–

"कुर्वन्नेह कर्माणि जिजीविषेच्छत समाः ।
एवं त्वयि नान्यथेतोस्ति न कर्म लिप्यते नरे ।।"[11]

तामुद्दुय् यथर्तुप्रवेशनम् ।।7,।। यथाकामी वा काममाविजनितोः सम्भवामेति वचनात्।।8।।[12]

रजोदर्शनात् षोड्श दिवसपर्यन्तं ऋतुसमय वर्तते तेषु दिवसेषु रजस्वला स्यात् तदा पुत्रकामी 6/8/10/12/14 16 रात्रौ पत्न्या पार्श्वे गच्छेत् कन्याकामी 5/7/9/15 रात्रौ गर्भाधानं कुर्यात् । गर्भाधान निमित्तं संकल्पान्तरं मातृपूजनादिकं कृत्वा अधोलिखित मन्त्रेण सूर्यदर्शनं नमस्कारं च कुर्यात् यथा–" ॐ आदित्यं गर्भं पयसा समग्धिसहस्त्रस्य प्रतिमां विश्वरूपम् । परिवङ्ग्धिहर सामाऽभिमस्थाः शतायुषं कृणुहि चीयमानः ।।"[13] पुनश्च पूर्व दिशायां शिरं कृत्वा नाभिस्थलं दक्षिण हस्तेन स्पर्शं कुर्वन् अधोलिखित मन्त्रं पठेत्–

"ॐ पूषा भग ंसविता मे ददातु रुद्र; कल्पतु ललामगुम् ।
"ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।
आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु तें ।।"[14]

पुन; पूवाभिमुखो भूत्वास्त्रीं अवलोकनं कृत्वा इमं मन्त्रं पठेत्–

"ॐ गर्भं धेहि सिनीवालि। गर्भं धेहि पृथुष्ट के।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्त्रजौ ।।[15]
तेजो वैश्वानरो दद्यादथ ब्रह्मानुमंत्रयेत् ।
ब्रह्मा गर्भन्दधातु ते ।

पश्चात् एतान् मन्त्रान् पठित्वा आलिंगनं कुर्यात्–

"ॐ गायत्रेण त्वा छन्दसा मन्थामि। त्रैष्टुभेन त्वा छन्दसा मन्थामि।
जागतेन त्वा छन्दसा मन्थामि।।[16]

"ॐ रेतो मूत्रं विजहाति योनिं प्रविशादिन्द्रियम् ।
गर्भो जरायुणा वृत उल्वं जहाति जन्मना ।।
ऋतेन सत्यमिन्द्रियं विपान शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु।।[17]

आलिंगनोपरान्तं पवित्रो भूत्वा आचमनं कृत्वा अनन्तरं पत्न्या दक्षिण स्कन्धे हस्तं संस्थाप्य निम्न मन्त्रेण हृदयालम्भनं कुर्यात्–

"ॐ यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम् । वेदाहं तन्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतंश्रृणुयाम शरदः शतम् ।।[18]

तदनन्तरं कृत गर्भाधानं संस्कारस्य अंगपूर्ति निमित्तं ब्राह्मणभोजन निमित्तं संकल्पं कुर्यात्–

"कृतस्य कर्मणः स्वाङ्गतासिध्यर्थं यथाशक्ति ब्राह्मणान् भोजयिष्ये तेन श्रीकर्माङ्गदेवताः प्रीयन्ताम् ।।

ब्राह्मणान् भोजयित्वा दक्षिणां दत्वा' यान्तु मातृगणाः सर्वे" इत्यादिमन्त्रं पठित्वा मातृकादीनां विसर्जनं कृत्वा ताम्बूलं भुक्त्वा कृत्यं समापयेत् ।

।। इति गर्भाधान संस्कारः।।

पुंसवन संस्कारः

द्वितीयः संस्कारः पुंसवनम् । यथाह पारस्करः–पुंसवन संस्कारः तदा जायते यदा "द्वयअंगुलक;" शरीररूपं अवतरित। शरीरश्च शिशो; स्वस्थ; सुन्दरश्च भवेत् एषा धारणा पित्रोर्मनसि तिष्ठति तदर्थं समन्त्रकं–"आवीरो जायतां पुत्रस्ते दशमास्यः" इत्यनेन मन्त्रेण गर्भयोनिं–मभिमन्त्रयति। जीवनस्य प्रवाहः प्रबलतरेण शक्तिमान् तिष्ठति तां शक्तिं वशीकर्तुं विकासपश मानेतु एष; पित्रोः द्वितीय; प्रयासः । पारस्करस्य मतेन।

"पुरा स्यन्दते इति मासे द्वितीये तृतीये" पुंसवन संस्कारः क्रीयते।[19] पुंसवन शब्दस्य यौगिकार्थः भवति–"पुमान् सूयते अनेन तत् पुंसवनम् । गणेशपूजनं संकल्पं मातृपूजा नान्दीश्राद्धपूर्वक पुण्याहवाचनं कृत्वा संकल्पं कुर्यात् यत्–

"अमुकोहं ममास्यां भार्यायां उत्पत्स्यमानापत्यगर्भस्य बीजगर्भ समुद्भवैनो निवर्हणपुंरुपता ज्ञानोदयप्रतिरोधि कर्मनिरसनद्वारा श्री परमेश्वर प्रीत्यर्थं पुसंवनाख्यं कर्म करिष्ये। मातृपूजनादिकं कृत्वा रात्रौ वटस्य मूलं जटा अंकुरान् पिष्ट्वा स्त्रियाः दक्षिणा नासिकायां नस्यं दद्यात् । सुश्रुतस्य मतानुसारेण–**"लब्धगर्भाया श्चैतेष्वहःसुलक्ष्मणा-वटशुङ्गा-सहदेवा-विश्वदेवानामान्यतमं-क्षीरेणाभिषुत्यत्रींशचतुरोवा विन्दून् दद्यात्। दक्षिणेनासापुटे पुत्रकामायै न च तावन्निष्ठीवेत् ।।"**[20]

नस्यदानसमये विनियोगपूर्वकं इमं मन्त्रं पठेत्–

"हिरण्यगर्भः अदभ्य संभृतः इत्यनयोः क्रमेण प्रजापत्युत्तरनारायणौ ऋषी त्रिष्टुप् छन्दः प्रजापतिपुरुषौ देवते नासिकायां रसासेके विनियोगः ।

"ॐ हिरण्यगर्भः सर्वततागे्र भूतस्य जात; पतिरेक आसीत् ।

सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय ह विषा विधेम ।।1।।[21]

ॐ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मण; समवर्तताग्रे । तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजनमग्रे ।।[22]

यदि दम्पतिः बलिष्ठ सन्तानं इच्छतितदर्थं सुश्रुतेन उक्तम् यत्–"दौहृदविमाननात् कुब्जं कुणिं खजं जडं वामनं विकृताक्षं वा नारी सुतं जनयति तस्मात् सा यद्यदिच्छेत्ततस्यै दापयेत् ।। लब्धदौहृदाहि वीर्यवन्तं चिरायुषं च पुत्रं जनयति ।।"[23]

स्त्रियाः उपस्थेन्द्रिये कुक्षौ वा जलपूर्णं मृत्तिका पात्रं संस्थाप्य गर्भाशयं अनामिकाया; अग्रभागेन स्पर्शं कृत्वा मन्त्रमिमं जपेत्–"सुपर्णोऽसीतिप्रजापति ऋषिः कृतिश्छन्दः गरुत्मान् देवता गर्भाभिमन्त्रणे विनियोगः। "**ॐ सुपर्णोऽसि गरुतॉंस्त्रिवृत्ते शिरोगायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ। स्तोम आत्मा छंदाᳬंस्यङ्गानि यजूᳬंषि नाम॥ साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः। सुपर्णोऽसि गुरुत्मान् दिवं गच्छ स्वः पतः॥**[24] तदनन्तरं निम्नलिखित दक्षिणा संकल्पं पठेत् यत्–"अद्येहामुकोहं कृतस्यास्य पुंसवनकर्मण साद्गुण्यार्थं इमां दक्षिणां भोजनञ्च ब्राह्मणेभ्यो विभज्य दास्ये- ॐ तत्सत् तथा दश यथाशक्ति वा ब्राह्मणान भोजयिष्ये ॥

तदनन्तरं अभिषेकः मन्त्रपाठादिकं कृत्वा मातृका दीनां विसर्जनं कृत्वा कृत्यं समापयेत्।

॥ इति पुंसवन संस्कारः ॥

निष्क्रमण संस्कारः

निष्क्रमण संस्कार विषये मनुना उक्तम् यत्–

चतुर्थे मासि कर्त्तव्यं शिशो र्निनष्क्रणं गृहात् ।
षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मंगल कुले ॥"[25]

पारस्कर मतेन तु–चतुर्थ मासि निष्क्रमणिका सूर्यमुदीक्षयति[26] "तच्चक्षुः[27] इति।

अर्थात् पिता चतुर्थे मासे गृहात् शिशोः निष्क्रमणं कृत्वा तच्चक्षुर्देवहितं मन्त्रेण सूर्यं दर्शयति। तदर्थं पिता बालकं स्नानादि कारयित्वा आचमनं प्राणायामपरो भूत्वा प्रथमं संकल्पं कुर्यात् यत्–"अद्येहेत्यादि संकीर्त्य ममास्य शिशोरायुरभिवृद्धि व्यवहारासिद्धि द्वारा श्रीपरमेश्वर प्रीत्यर्थं गृहान्निष्क्रमणं करिष्ये ।

तदनन्तरं गणेशपूजनं, स्वस्तिवाचनं पुण्याहवाचनंकृत्वा यजमानः निष्क्रमण संस्कारस्य पूर्वांगं दिक्पतीनां पूजनार्थं संकल्पं कुर्यात्–"अद्येहेत्यादि संकीर्त्यामुकराशेरमुकशर्मणोऽस्य बालकस्य करिष्यमाण निष्क्रमणकर्माणि सर्वारिष्ट निवृत्तये जले दिगीशानां दिशां चेन्द्रस्य अर्कस्य वासुदेवस्य गगनस्य च पूवाङ्गत्वेन पूजनं करिष्ये। तदनन्तरम् –"ॐ एतन्ते[28], ॐ भूर्भुवः स्व; जलेदिगीशादिदेवा गगन पर्यन्ताः आगच्छन्तु सुप्रतिष्ठिता वरदा भवन्तु। अनेन प्रकारेण प्रतिष्ठाप्य निम्नस्थ नाममन्त्रेण ध्यानेन आवाहनं पाद्यादीनां यजमानः पूजनं कुर्यात्–

"ॐ दिगीशेभ्यो नमः । ॐ दिग्भ्योनमः । ॐ चन्द्राय नमः । ॐ अर्काय नमः। ॐ वासुदेवाय नमः । ॐ गगनाय नमः । पूजनोपरान्तं प्रार्थनां कुर्यात्–

"चंद्रार्कयोर्दिगीशानां दिशाञ्च गगनस्य च ।
निक्षेपार्थमिमं दद्मीते मे रक्षन्तु बालकम् ॥[29]
अप्रमत्तं प्रमत्तं वा दिवारात्रमथापि वा ।

रक्षन्तु सततं सर्वे देवाः शुक्रपुरोगमाः ॥

(विष्णु धर्मोत्तरे)

इति संप्रर्थय ऋग्वेदीय शाकुन्तसूक्त "प्रदक्षिणीदभिगृणीतकारव इत्यादिकं तथा च "कनिक्रदज्जनतुषं प्रब्रुवाण इत्यादिकं पठित्वा शंखनादं घण्टारवं कृत्वा स्वस्तिवाचन पूर्वकं "ॐ एतन्ते मन्त्रं पठित्वा पूजनार्थं संकल्पं कुर्यात्–"ॐ अद्येहेत्यादि देशकालौ संकीर्त्यामुकराशेः बालकस्य बैजिक गार्भिक दुरितोपशान्तये आदित्यस्य पूजनं करिष्ये। अथध्यानम्–"ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासन सन्निविष्टः । केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्यमयवपुर्धृतशङ्ख चक्रः ।। इति ध्यात्वा वेदमन्त्रेण आवाहन कृत्वा नीराजनपर्यन्तं पूजनं कुर्यात्–ॐ आकृष्णेन रजसा वर्तमनो निवेशयननमृतं मर्त्यं च। हिरण्येन सविता रथेना देवो याति भुवनानि पश्यन्[30] ॐ आदित्याय नमः ॥ पूजनान्तरं "एहि सूर्य सहस्रांशो इति मन्त्रेण अर्घं दत्वाबालकं सूर्यदर्शनं कारयेत्–" ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुकमुच्चरत । पश्येम शरदः शतं जीवेम शरदः शतं शृणुयामशरदः शतं प्रब्रवाम शरदः । शतमदीनाः स्याम शरदः शतं भूयश्च शरद; शतात् ॥[31]

तत निष्क्रमण संस्कार कर्मसंपादन निमित्तं दक्षिणा संकल्पं कुर्यात्–" ॐ अद्येह कृतस्य निष्क्रमणाख्यस्य संस्कारकर्मणः सांगता सिद्ध्यर्थं दश यथासंख्याकान् वाब्राह्मणान् भोजयिष्ये ॥

।। इति निष्क्रमण संस्कारः ।।

सीमन्तोन्नयन संस्कारः

तृतीयः संस्कारः सीमन्तोन्नयनम् । तदाह पारस्करः–"यदा शिशो मस्तिष्क निर्माणाय उदर प्रयोगगृहं सक्रियं भवति तदायं संस्कारः सम्पद्यते। संस्कारेऽस्मिन् मातु वेशाः विविध तैलाभ्यञ्जनेन सज्जीक्रियन्ते। सज्जीकरण समये मस्तिष्कस्य ध्यानाय नारीभिः प्रेर्यते। तत्सम्मुखं घृतपूर्णा काचित् कटोरिका तिषठति। तां द्रष्टुं प्रेरयति पृच्छयते च "किं पश्यसि" तदा सा ब्रवीति "प्रजां पश्यामि" पुत्र रूपान्।[32] तदारभ्य वत्सजन्मपर्यन्तं निरन्तरं गर्भस्य साकांक्षतया सा ध्यानं रक्षति । यतोऽयमेक गर्भस्थ शिशुः कदाचित् समस्तस्य जगतः उन्नायको भविता युगद्रष्टा च संभवति। गर्भस्थ शिशोः एते त्रय संस्काराः गर्भरक्षणरूपाः भवन्ति। सीमन्तोन्नयन संस्कार गर्भस्थ बालकस्य आयुः यदा षड् मासः अष्ट मासं वा भवति तदा कर्त्तव्यः । सीमन्त शब्दस्य स्पष्टीकरणं गदाधराचार्येण कृतम् यत्–"सीमन्त; कथ्यते स्त्रीणां केशमध्ये तु पद्धतिः।"[33] सुश्रुताचार्येनाप्युक्तम्–"पञ्च सन्धयः शिरसि विभक्ताः सीमन्ताः। तत्राघातोन्मादभयचेष्टानाशै र्मरणम् ।।"[34] सीमन्तोन्नयन संस्कारकारणाद् गर्भस्थ शिशो मर्म स्थानानां उन्नतिः बुद्धेः अङ्ग प्रत्यङ्गानां च समन्वितः विकासः भवति।

सीमन्तोन्नयन संस्कार दिवसे पति प्रातःकाले स्नानादिकं कृत्वा नवीन वस्त्रं धृत्वा पूर्वाभिमुखं उपविश्य शुभलग्ने आसने उपविश्य आचमनं प्राणायामदिकं कृत्वा स्वस्ति वाचनं गणेश पूजनञ्च कृत्वा अनन्तरं संकल्पं कुर्यात्–"अद्येहामुकोहं अस्यां भार्यायां गर्भाभिवृद्धिपरिपन्थिपिशित प्रियाऽलक्ष्मीभूतराक्षस गण निरसनक्षम सकल सौभाग्य निदानभूतलक्ष्मी समावेशन द्वारा प्रतिगर्भं बीजगर्भसमुद्भवैनो निवर्हणाये श्री परमेश्वर प्रीत्यर्थं स्त्रीसंस्काररूप सीमन्तोन्नयनाख्यं कर्म करिष्ये, तत्पूर्वाङ्गत्वेन गणपतिसहितं गौर्यादिषोड्शमातृणां पूजनं नान्दी श्राद्धं पुण्याहवाचनं च करिष्ये।

संकल्प कृत्वा पञ्चभूसंस्कारपूर्वकं अग्नि स्थापनं कलशस्थापनं नवग्रह पूजनपूर्वकं गर्भिणी स्त्री पत्युः दक्षिण भागे मृदु आसने उपाविश्य आचार्य ब्रह्मवरणादिकं कारयेत्। तदनन्तरं पवित्र निर्माणं आज्यस्थाली चरुस्थाली मार्जनं प्रोक्षणी संस्कारं अधिश्रयणं पर्यग्निकरणं, स्रुवः प्रतपनं सम्मार्जनं अभ्युक्षणं कृत्वा निम्नलिखित देवानां अभिध्यानं कुर्यात् "अद्येह सीमन्तहोमकर्मणा यक्ष्ये तत्र प्रजापतिं, इन्द्रं अग्निं सोमं आज्येन प्रजापतिं तिलमिश्रित मुद्गस्थाली पाकेन अग्नि स्विष्टकृतं आज्यस्थालीपाकाभ्यां, अग्निं, वायु सूर्यं अग्नीवरुणौ, अग्नीवरुणौ अग्निं वरुणꣳसवितारं विष्णुं विश्वान् (देवान्) मरुतः स्वर्कान् वरुणं प्रजापतिं चाज्येन यक्ष्ये।

देवताभिध्यानं कृत्वा "एतन्ते देव सविर्त"[35] इति मन्त्रेण तथा च–"मङ्गलनामाग्ने सुप्रतिष्ठितो वरदो भव" इति वाक्येन अग्निस्थापनं कृत्वा–"चत्वारि शृङ्गा त्रयोऽस्य पादा[36] इति मन्त्रेण ध्यानं कुर्यात् । पुनश्च" अग्ने नय सुपथा[37] तथा मङ्गलाग्नये नमः–एतेन मन्त्रेण पाद्यं दत्वा नीराजनपर्यन्तं पूजनकृत्वा आघार आज्यभागेन आहुतिं दत्वा आज्यमिश्रित स्थालीपाकेन आहुतिं दद्यात् "ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम। ॐ अग्नये स्विष्टकृते स्वाहा, इदं मग्नये स्विष्टकृते न मम।।" एतावत् हवनं कृत्वा भूरादिनां नव आहुतिं हुत्वा संस्रवप्राशनं पूर्णपात्रदानं च कुर्यात् ।

तदनन्तर अग्न्याः पश्चिम भागे उपविष्टां गर्भिणी स्त्रियाः सीमंते अपक्व उदुम्बर स्यशाखा त्रय पवित्री, शल्लकी, केशाः, सूत्रपूर्ण लौह कण्टकान् स्वीकृत्य पत्न्याः ललटात् शिरपर्यन्तान केशान् विनयनं कारयेत् । पुनश्च अधोलिखित मन्त्रेण सीमन्तं कारयेत्–

"ॐ भूर्विनयामि। ॐ भुवर्विनयामि! ॐ स्वर्विनयामि । तत्पश्चात् पञ्च उदुम्बर गुच्छान् मन्त्रं पठित्वा पत्न्याः वेणी मध्ये त्रिबन्धं दत्वा बन्धयेत् ।

"अयमूर्जावत इत्यस्य प्रजापतिऋषिः यजुश्छन्दः फलिनी देवता वेणी बन्धने विनियोगः– "ॐ अयमूर्जावतो वृक्ष उर्जीव फलिनी भव।

तत्पश्चात् वीणावादकान्–"सोमं राजानं गायताम्" इति वदेत् । तत्पश्चात् मन्त्रं वदेत् यत्–"सोममित्यस्य प्रजापति ऋर्षिः गायत्री छन्दः सोमो देवता गाने विनियोगः–"ॐ सोम एव नो राजे मा मानुषीः प्रजाः। अविमुक्तचक्र आसीरँस्तीरे तुभ्यमसौ ।।

तदुपरान्तं यजमानः दक्षिणाया; संकल्पं कुर्यात्–

"अद्येहामुकोऽहं अस्या भार्यायाः सीमन्तोन्नयनकर्मणः साद्गुण्यार्थं इमां दक्षिणामाचार्यदिभ्यो विभज्य दास्ये ॐ तत्सत् ।

इति संकल्प्य दक्षिणां दत्वा ब्राह्मण भोजनार्थं संकल्पं कुर्यात् ।

तदनन्तरम् अभिषेकं तिलकं रक्षाबंधनं, घृतच्छाया दर्शनं, त्र्यायुषकरणं मन्त्रपाठादिकं कृत्वा कृत्यम् समापयेत् । ब्राह्मणान् भोजयित्वा स्वयमपि भोजनं कुर्यात् ।

।। इति सीमन्तोन्नयन संस्कारः।।

जातकर्म संस्कारः

समुत्पन्ने च शिशो प्रथम संस्काररूपेण संस्कारोऽयं जातकर्मेति नाम्ना व्यवह्रियते। जाते शिशो स्वर्ण शलाकया मधुसिक्तेन "ओमिति" देवीं गायत्रीं जिह्वायां लिखति। तत; अग्रे "वेदोऽसीति" जपति । तदनन्तरं–"अश्मार्भभव परशुर्भव हिरण्यमश्रुतं भव। आत्मा वै पुत्र नामासि सजीव शरदः शतंम् । पिता अङ्के आधाय मन्त्रोऽयं प्रजपति।[38] अयमपि मन्त्रः नितान्तं भावपूर्णम् । शरीरेण मनसा वाचाकायं शिशुः समग्र जीवनं ससुखं जीवितुं शतायुर्भवितुं च लब्धाशीर्वचनः सभ्य सन् समाजं प्रगति पथं नयति।[39]

आचार्य जैमिनी मतेन जातकर्म संस्कारः जातकस्य उत्पत्तेः सार्द्धत्रिहोरान्तरं भवेत् तदुपरान्तं नालोच्छेदनं कर्म भवेत् तद्यथा–

"प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते ।
यावन्न छिद्य नालं तावन्नाप्नोति सूतकम् ।
छिन्ने नाले तत पश्चात् सूतकन्तु विधीयते ।।"

पुत्रोत्पत्ति अनन्तरं पिता पुत्रमवलोक्य नद्याः शीतल जलेन संकल्प्य सवस्त्रं स्नानं कुर्यात् यत्–

"अद्येह अमुकोऽहं पुत्र जनन निमित्तकं सचैलं स्नानं करिष्ये।"

ततः स्नानं कृत्वा नवीन वस्त्रं परिधाय पूर्वमुखं उपविश्य आचमनं कृत्वा दीपं प्रज्वाल्य स्वस्ति वाचनं कृत्वा इष्टदेवं पुष्पांजलिं समर्प्य नालोच्छेदनात् पूर्वम् संकल्प्य गणेशपूजनं कुर्यात्–

"अद्येहामुकोऽहं जातस्य पुत्रस्य दीर्घायुरारोग्यावाप्तये श्री भगवतो गणेशस्य पूजनं करिष्ये ।।" तत्पश्चात् प्रधान संकल्पं कुर्यात्–"अद्येहेत्यादि अुकोऽहमस्य कुमारस्य गर्भाम्बुपानजनित सकलदोष निवर्हणायुर्मेधाभिवृद्धि द्वारा बीजगर्भसमुद्भवैनोनिर्वहण द्वारा श्री परमेश्वर प्रीत्यर्थं जातकर्माख्यं संस्कारं करिष्ये।" तदनन्तरं मातृपूजनः संकल्पं कुर्यात्– "अद्येहामुकोऽहं पुत्रजनननिमित्तक गौर्यादिषोड्शामातृणां पूजनं करिष्ये।।"

मातृपूजनोपरान्तं वसोर्धारा पातनं, कर्मपात्रस्थापनं संकल्पं कृत्वा सुवर्ण दक्षिणा प्रतिज्ञां च कुर्यात्–"अद्येहेत्यादि सं. अमुक गोत्राणां अस्मन्मातृपितामहीप्रपितामहीनां अमुकामुकदेवीनां नान्दीमुखानां तथाऽमुकगोत्राणां अस्मित्पितृपितामहप्रपितामहानां, अमुकामुकदेवानां नान्दी मुखानां तथा अमुक गोत्राणां अस्मन्ममातामहप्रमातामहवृद्धप्रमातामहानां अमुकाभुक देवानां सपत्नीकानां नान्दीमुखानां सत्यवसुसंज्ञक विश्वदेव पूर्वकं संक्षिप्तसंकल्प विधानेन पुत्रजननिमित्तं नान्दीश्राद्धं करिष्ये।

रुद्रकल्पद्रुमे संर्वतऋषिणामुक्तम्–"कल्याणस्य इच्छुकः बुद्धिमान् पुरुष पुत्रस्य जन्मे नान्दी श्राद्धं कुर्यात्, पक्वान्नेन आमान्नेन न कुर्यात् । मरीचि ऋषिणाप्युक्तम् यदि बुद्धिमान आमान्नाभावे श्राद्ध कुर्यात् तर्हि धान्याद् चर्तुगुणितं मूल्यकं सुवर्णं दद्यात् तद्यथा–

"पुत्रजन्मनि कुर्वीत् श्राद्ध हेम्नैव बुद्धिमान् ।
न पक्वेन न चामेन कल्याणान्यभिकामयन् ॥
आमान्नस्याप्यभावे तु श्राद्धं कुर्वीत बुद्धिमान् ।
धान्यच्चतुर्गुणेनैव हिरण्येन सुरोचिषा॥ इति मरीचिः॥

अद्येहेत्यादि युग्मब्राह्मणभोजन पर्याप्तान्न समर्थ धान्यतश्चतुर्गुणं द्विगुणं समंवा हिरण्यं ब्राह्मणाय दास्ये तद्वो नमो नमो वृद्धि-वृद्धि श्रियै ।"

तदनन्तरं पुण्याहवाचन निमित्तं निम्नस्थ संकल्पेन चतुर्णां ब्राह्मणानां वरणं कुर्यात्–'अमुकोऽहं जातस्य पुत्रस्य करिष्यमाण जातकर्माख्य संस्कार कर्मणि सकल मङ्गालभिवृद्ध्यर्थं ब्राह्मण द्वारा पुण्याहं वाचयिष्ये तदङ्गत्वेन चतुर्णां ब्राह्मणानां पूजनं वरणञ्च करिष्ये।।" एतेन प्रकारेण संकल्पपूर्वकं वरणं पुण्याहवाचनं च कारयित्वा कलशे ब्रह्मवरुणादि सहित नवग्रहाणां आवाहनं पूजनं कृत्वा, रक्षा सूत्रस्य अभिमन्त्रणं कृत्वा, पुत्रस्य मेधाजनन कर्मं कुर्यात् ।

मेधाजननकर्म विधानम्–सुवर्णादिकं तैजस् पात्रे मधु धृतस्य च सम्मिश्रणं कृत्वा अथवा केवल धृतं सुवर्ण सहितं दक्षिण हस्तस्य अनामिका अंगुल्या समुत्पन्न बालकस्य जिह्वायां एक बारं अनेन मन्त्रेण दद्यात्–

"व्याहृतीनां प्रजापतिऋषिः गात्र्युष्णिगनुष्टुप् ब्बृहत्यश्छन्दांसि अग्नि वायु सूर्य प्रजापतयो देवता प्राशने विनियोगः। "ॐ भूस्त्वयि दधामि। ॐ भुवस्त्वयि दधामि। ॐ स्वस्त्वयि दधामि। ॐ भूर्भुवः स्वः सर्वं त्वयि दधामि।

आयुष्यकरणम्

पिता उत्पन्न कुमारस्य आयुष्य निमित्तं तस्य नाभिसमीपं दक्षिण कर्ण समीपं गत्वा त्रिवारं एक बारं वा मन्त्रमिमं जपेत"अग्निरायुष्मानित्यादीनामष्टानां मंत्राणां प्रजापतिऋषिर्गायत्री छन्दः लिंगोक्ता देवता आयुष्यकरणे विनियोगः । त्र्यायुषमित्यस्य नारायण ऋषिः उष्णिक् छन्दः शिवो देवता आयुष्य करणे विनियोगः।

"ॐ अग्निरायुष्मान्त्स वनस्पतिमिरायुष्मांस्तेन त्वायुषायुष्मन्तं करोमि।।1।।
ॐ सोम आयुषन्त्सौषधीभिरायुष्मास्ते न त्वायुषायुष्मन्तं करोमि।।2।।
ॐ ब्रह्मायुष्मत् दब्रह्मणैरायुष्मस्त्तेन त्वायुषायुष्मन्तं करोमि।।3।।
ॐ देवा आयुष्मन्तस्तेऽमृतेन-युष्मन्तस्तेन त्वायुषायुष्मन्तं करोमि।।4।।
ॐ ऋषय आयुष्मन्तस्ते व्रतैरायुष्टमन्तस्तेन त्वायुषायुष्मन्तं करोमि।।5।।
ॐ पितर आयुष् मन्तस्ते स्वधाभिरायुषमन्तस्तेन त्वायुषायुषमन्तं करोमि ।।6।।
ॐ यज्ञ अयुष्मान्त्सदक्षिणाभिरायुषमांस्तेन त्वायुषायुष्मन्तं करोमि।।7।।
ॐ समुद्र आयुष्मान्त्सस्त्रवन्तीभिरायुषमास्तेन त्वायुषायुष् मन्तं करोमि।।8।।
ॐ त्र्यायुषं जमदग्ने कश्यपस्य त्र्यायुषम् । यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम्।।

सर्वायुष्यकरणम्

यदि पिता कुमारस्य सर्वायुष्यप्राप्ति; वाञ्छति तर्हि सः अधोलिखित मंत्रेण कुमारस्य सर्वाङ्ग स्पर्शं कुर्यात् –"दिवस्परीत्येकादशानां मन्त्राणां वत्सप्रिभालन्दन ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता जाताभिमर्शने विनियोगः।

ॐ दिवस्परि प्रथमं जज्ञे अग्निस्मद् द्वितीयं परिजातवेदाः ।
तृतीयामप्सुनृमणा अजस्त्रमिन्धान एवं जरते स्वाधीः ।।1।।
विद्मा ते अग्ने त्रेधा त्रयाणि विद्माते ते धाम विभृता पुरुत्रा ।
विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्संयत आजगन्थ ।।2।।
ॐ समुद्रे त्वा नृमणाॐअप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन् ।
तृतीये त्वा रजसि तिस्थवा समपामुपस्थे महिषा अवर्द्धन ।।3।।
अक्रन्ददग्निः स्तनयन्निवद्यौः क्षामारेरिहद्वीरुध; समञ्जन् ।
सद्यो जज्ञानो विहीमिद्रो अख्यदा रोदसी भानुना भात्यन्तः ।।4।।
श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पण सोमगोपाः ।
वसुः सूनुः सहसो अप्सु राजा विभात्यग्र उषसामिधानः ।।5।।
विश्वस्य केतुर्भुवनस्य गर्भ आरोदसी आपृणाज्जयमानः ।
वीडुंचिदद्रिमभिनत्परायन् जना यदग्निमयजन्त पञ्च ।।6।।
उशिक्पावको अरतिः सुमेधा मर्त्येष्वग्निरमृतो निधायि ।
इत्यर्त्ति धूममरूपं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ।।7।।
दृशानो रुक्म उर्व्या व्यद्यौद दुर्मर्षमायुः श्रिये रुचानः' ।
अग्निरमृतो अभवद्वयोर्भिर्यदेनं द्यौरजनयत्सुरेताः ।।8।।

यस्ते अद्य कृण्वदभद्रशोचे पूपं देव घ्रतवन्तमग्ने ।
प्रतन्नय प्रतरं वस्यो अच्छा भिसुम्नं देवभक्तं यविष्ठ ॥9॥
आतं भज सौश्रवसेष्वग्न उक्थ उक्थ आभज शस्यमाने प्रियः ।
सूर्यो प्रियो अग्ना भवात्युज्जातेन भिन दुज्जनित्वै ॥10॥
त्वामग्ने यजमाना अनुद्यून् विश्वावसु दधि रे वार्य्याणि ।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो विवब्रुः ॥

तदनन्तरं कुमारं पूर्वाभिमुखं कृत्वा चतुर्णां ब्राह्मणानां मध्ये उपाविशेत। अभावे पिता "इममनुप्राणित मीति वाक्यस्थाने प्राणादि शब्दं वदेत् । यस्मिन् स्थाने कुमारस्य जन्म अभवत तं भूमिं अनामिकया स्पर्शं कृत्वा अधोलखित मन्त्रान् पठेत्–

"वेद ते भूमि हृदयम् इत्यस्य प्रजापति ऋषिरनुष्टुप छन्द भूमिर्देऽवता जन्मभूभिमिन्त्रणे विनियोगः ।

ॐ वेद ते भूमि हृदयं दिवि चन्द्रमसि श्रितम्।
वेदाहं तन्मांतद्विद्यात्पश्येम शरदः शतं जीवेम शरदः शत शृणुयाम शरद; शतम् ॥

एतेन मन्त्रेण पिता भूमिं स्पृष्ट्वा कुमारस्य शरीरस्य अङ्गानि समन्त्रकं स्पृशेत्-

"ॐ अश्मा भव परशुर्भव हिरण्यमस्त्रुतं भव ।
आत्मा वै पुत्र नामाऽसि स जीव शरदः शतम् ॥

तदुपरान्त कुमारस्य मातरं अभिमन्त्रयेत्–

"ॐ इडाऽसि मैत्रावारुणी वीरे वीरे मजीजनथाः ।
सात्वं वीरवती भव याऽस्मान्वीरवतोऽकरत् ॥

तत्पश्चात् अनेन मन्त्रेण मातु दक्षिण स्तनं प्रक्षाल्य कुमारं पाययेत् "ॐ इमं स्तनमूर्जस्वन्त धयापां प्रपीनमग्ने सरिरस्य मध्ये उत्सं जुषस्व मधुमन्तमर्वन्त्स्यमुद्रियꣳ सदनमाविशस्व॥

तत्पश्चात् "यस्ते स्तन" इमँ स्तनमीति मंत्र द्वयेन वाम स्तनं प्रक्षाल्य माता कुमारस्य मुखे दद्यात्–"ॐ यस्ते स्तन शशयो यो मयो भूर्यो रत्नधा वसुविद्मः सुदत्रः । येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवेऽकः ॥

तदनन्तरं सूतिकाया मस्तकस्य निकटेदश दिनपर्यन्तं उदकेन पूरितं कुम्भं संस्थापयेत्– "ॐ आपो देवेषु जाग्रथ यथा देवेषु जाग्रथ एवमस्या सूतिकाया ꣳसपुत्रिकायां जाग्रथ ।

तदुपरान्तं मन्त्रोऽयं पठित्वा नाल छेदनं कृत्वा सूतिकायाः द्वारभूमौ अग्निं कृत्वा "एतन्ते इति मन्त्रस्योच्चारणपूर्वकं–"ॐ भूर्भुवः स्वः प्रगल्भनामाग्ने सुप्रतिष्ठितो वरदो भव" इति मन्त्रेण आवाह्य "ॐ प्रगल्भनामाग्नये नमः" इत्यनेन प्रतिष्ठापयेत् । पुनश्च दशदिनं यावत्

तण्डुलेन सर्षपेन सायंकाले अनेन मन्त्रेण प्रातः काले आहुतिद्वयं दद्यात्–

"ॐ शंडामर्का उपवीरः शौंडिकेय उलूखलः । मलिम्लुचोद्रोणासश्च्यवनो नश्यतादितं; स्वाहा इदमग्नये न मम ॥"

ॐ आलिखवन्ननिमिषः किं वदेत उपश्रुतिः ।

हर्यक्षः कुंभीः शत्रु पात्रपाणिर्नृमणिः ।

हंत्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहा, इदमग्नये न मम ।

तदनन्तरं बालग्रहादीनां शान्त्यर्थं मन्त्रमिदं पठेत्-

"ॐकूर्क्कुरः सुकूर्करः कूर्क्कुरो बालबन्धनः ।
चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेताह्वर ॥1॥
तत्सत्यं यत्ते देवा वरमददुः कुमारमेव वाऽवृणीथाः ।
चेच्छुनक सृज नमस्तेस्तु सीसरो लपेताह्वर ॥2॥

तत्सत्यं यत्ते सरमा माता सीसर; पिता श्यामशवलौ भ्रातरौ । चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर ।।3।।

जपान्ते निम्न मन्त्रेण बालकस्य अभिमर्शनं कुर्यात्–

"न नामयति न रुदति न हृष्यति न ग्लायति ।
यत्र वयं वदामो यत्र चाभिमृशामसि ॥

कर्मान्ते दक्षिणायाः संकल्पं कुर्यात् यत्–

अद्येहामुकोऽहं जातस्य पुत्रस्य कृतैज्जातकर्माख्य संस्कारकर्मणः साङ्गतासिद्ध्यै सादगुण्यार्थञ्च इमां दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दास्ये ॐ तत्सन्न मम ।

तदनन्तरं भूयसी संकल्पं कृत्वा ब्राह्मण भोजनं कारयेत् । इति जातकर्म संस्कारः।

नामकरण संस्कारः

दशम्यामुत्थाप्य ब्राह्मणान् भोजयित्वा पिता नाम करोति (पा. गृ. सू.1 कां. 1 कं. 17)। अर्थात् बालकस्य जन्मात् एकादशे दिवसे पिता सूतिकागृहात् ब्राह्मणान् भोजयित्वा शिशोः नामकरणं कुर्यात् । सूतकान्ते नाम कुर्यात् इति शङ्ख तच्च सूतकं ब्राह्मणस्य दशाहं क्षत्रियस्य द्वादशाहं वैश्यस्य पञ्चदशाहं शूद्रस्य मासम् इति वर्णक्रमः, सर्ववर्णानां दशाहमेव वा देशाचारात् । "सूतिका सर्ववर्णानां दशाहेन विशुध्यति । ऋतौच न पृथग् धर्मः सर्ववर्णेष्वयं विधिः । इति प्रचेताः । मनुनाप्युक्तम्–"नामधेयं दशम्यां तु द्वादश्यां वास्यकारयेत्।

पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते।। मनु. 2/30 अर्थात् दशम्यां द्वादश्यांवा तिथौ पुण्ये तिथौ मुहूर्ते च युक्ते द्वयक्षरं त्रयक्षरं वा पिता नाम कुर्यात् । इदं नामकरणं शिशोः

समग्र निर्माण बीजं वर्तते। तस्मात्यथा सर्वैः आदरेण नाम गृहयेत् तथा नामकरणं कुर्यात् । प्रचेतामते तु–"नामधेयं दशम्याञ्च द्वादश्यां वास्य कारयेत् ।

दशमे दिवसे स्नायाच्छुद्धयर्थं सा सबालिका ।। इति ।। सर्ववर्णसाधारणम् असम्भवेष्टादशे एकोनविंशे दिने शतरात्रे व्युष्टे अयने संवत्सरे गते वा नामकरणं भवति। पूर्वपूर्वासंभवे सति एते व्यवस्थित विकल्पाः। पारस्कराचार्य मतेन–"द्वयक्षरं चतुरक्षरम्वा घोषवदाद्यन्तरस्थं दीर्घा भिनिष्ठानं कृतं कुर्यान्न तद्धितम् ।।" स्त्रिनां विषये–"अयुजाक्षमकारान्तं स्त्रियै तद्धितम्।।" अग्निवेश ऋषेः विचारेण–"द्वे नामनी कारयेननाक्षत्रिकं नामाभिप्रायिकं च। तत्राभिप्रायिकं घोषवदाद्यन्त्यस्थान्तं ऊष्मान्तं वा वृद्ध त्रिपुरुषाननूकमनवप्रतिष्ठितम् । नाक्षत्रिकन्तु नक्षत्रदेवतासमानाख्यं द्वयक्षरं चतुर क्षरम्वा।। इति । चरक शा अ. 8।।

।। नामकरण संस्कारः।।

अथ अन्नप्राशन संस्कारः

षष्ठे मासेऽन्नप्राशनम् । (पा. गृ. सू. 1 का 1 कं 19)

मनुनापि षष्ठे मासिऽन्नप्राशनम् उक्तम् । अर्थात् जन्मकालाद् षष्ठे मासि बालकस्य अन्नप्राशन संस्कारः कर्त्तव्यः। यदि बालकस्य शक्ति अन्नपाचनयोग्यः न स्यात् तर्हि बालकस्य अष्टमे, द्वादशेमासि अन्नप्राशन संस्कारः कर्त्तव्य;। संस्कारस्य दिने प्रातःकाल स्त्री सहितं पिता बालकेन सह मंगलस्नानं कृत्वा नित्यकर्माद् निवृतो भूत्वा नवीन वस्त्रं धृत्वा पूर्वाभिमुखो भूत्वा शुद्धासने उपविश्य आचमनं स्वस्ति वाचनं दीप प्रज्वलनम् अर्घस्थापनं कृत्वा गणेश पूजार्थं संकल्पं कुर्यात्–"ॐ अद्येहेत्यादि संकीर्त्य अमुक गोत्रोऽमुकराशिरमुक शर्माऽहं मम अमुकराशेरस्य पुत्रस्य करिष्यमाणान्नप्राशन कर्मणि निर्विध्नतासिद्धये भागवतः श्री गणेशस्य पूजनंऽहंकरिष्ये।

गणेश पूजनं कृत्वा प्रधान संकल्पं कुर्यात्–

"ॐ अद्येहेत्याद्युच्चार्य अमुकोऽहं मम अमुकराशेरस्य बालकस्य मातुगर्भमलाप्राशन शुद्धयन्त्रा ब्रह्मवर्चस तेजइन्द्रियुर्लक्षणाफलसिद्धि बीजगर्भ समुद्भवैनोनिबर्हण द्वारा श्रीपरमेश्वर प्रीतये अन्नप्राशनाख्यं कर्म करिष्ये। तत्पूर्वाङ्गत्वेन गणपति सहित गौर्यादि षोड्शमातृणां पूजनं नान्दीश्राद्धं पुण्याहवाचनं च करिष्ये।

प्रधान संकल्पादनन्तरं मातृपूजनं नान्दीश्राद्धं पुण्याहवाचनं कृत्वा वेदिनिर्माणं पञ्चभूः संस्कारं अग्निस्थापनं कृत्वा आचार्य ब्रह्मणः वरणनिमित्तं संकल्पं कुर्यात् यत् ॐ अद्येहामुकोऽहं अमुकराशे पुत्रस्य अन्नप्राशनाङ्ग होमकर्मणि आचार्य ब्रह्मणोः पूजनपूर्वकं वरणं करिष्ये। आचार्य ब्रह्मणः कृत्वा ईशानकोणे कलशस्थापनं ब्रह्मवरुण सहित आदित्यादि नवग्रहाणामावाहनं पूजनं रक्षासूत्राभिमन्त्रणं कृत्वा अग्नेः दक्षिण भागे ब्रह्मसनोपवेशनम् प्रणीता प्रणयनम् कुशपरिस्तरणम्, तथा च उत्तरदिशायाम् अर्थवदासादनपर्यन्तं कर्मं कृत्वा पूजन वस्तूनि स्थापयेत् ।

शरीरवृद्धिहेतो पौष्टिकमन्नं बालकः अपेक्षते । यद्यपि बालकः जन्मकालादारभ्य मातृदुग्धे आश्रितो भवति परन्तु तस्य शरीरवर्धने मातृदुग्धमल्पायते । एतदर्थं बाह्य भोजन स्यावश्यकता भवति। अतः भोज्य पदार्थरूपेण बालकाय पक्वान्नप्रदानं हि अन्नप्राशन संस्कारो भवति। उक्तं चाश्वलायन गृह्यसूत्रे–

षष्ठे मास्यन्नप्राशनम् ।

घृतौदनं तेजस्कामम् ।

दधिमधुघृत मिश्रित मन्नं प्राशयेत् ।

।।इति अन्नप्राशन संस्कारः।।

चूड़ाकरणम्

चूड़ाकर्म संस्कार माध्यमेन संस्कारितो बालको दीर्घायुष्यं सौन्दर्यं कल्याणञ्च प्राप्नोति। एतत्तु आयुर्वेदीय ग्रन्थेषु अपि प्रतिपादितो विलोक्यते। चूड़ाकरणस्यार्थो भवति बालकस्य शिरसि जातानीं शिरोरुहानां कर्त्तनम् । आश्वलायगृह्यसूत्रे उक्तम्–"तृतीये वर्षे चौलम् । अर्थात् चूड़ाकर्मणो विधानं जन्मतः तृतीये वर्षे कारयेत् । यद्यपि आश्वलायनगृह्यसूत्रे तृतीये वर्षे चूड़ाकर्मणो विधानं वर्तते परन्तु पारस्करगृह्यसूत्रानुसारम् अस्य संस्कारस्य पालनं तु प्रथमवर्षे उत्तरायणकाले शुक्ल पक्षे दिवसे भवेत् । तद्यथा–

"सांवत्सरिकस्य चूड़ाकरणम् ।।"

महर्षि वशिष्ठस्य मते चूड़ाकरण संस्कारणेन दीर्घायुत्वं लभ्यते नैरुज्यमपि प्राप्यते। सुश्रुतेनापि उक्तम् यत्–

"पौष्टिकं वृष्यमायुष्यं शुचिरूपं विराजनम् ।
केशाश्मश्रू नखादीनां कर्तनं सम्प्रसाधनम् ॥
पापोपशमेनं केशनखरोमापमार्जनम् ।
हर्षलाघवसौ भाग्यकरमुत्साहवर्धनम् ॥

चूड़ाकरणम् विशुद्धरूपेण वैदिक संस्कारः वर्त्तते यतः गृह्यसूत्रेषु प्रयुक्ता सर्वे वैदिक मन्त्राः एव यथा केशान् आद्रिकर्तुम्–"आयमगन सविता क्षुरेणोष्णेन वाप उदकेनेधि. आदित्या रुद्रावसव उन्दन्तुसचेतसः सोमस्य राज्ञो वपत प्रचेतसः ।।6/68/1।।

पारस्कराचार्यस्य मते चूड़ाकरण संस्कारः प्रथमे तृतीये वर्षे वा भवेत् । मनुनापि उक्तम्–

"चूड़ाकर्म द्विजातीनां सर्वेषामेव धर्मतः ।
प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात् ।।2/35।।

यमस्य मतेन तु द्वितीयवर्षमपि ग्राह्यो वर्त्तते–

"तत सम्वत्सरे पूर्णे चूड़ाकर्म विधीयते ।
द्वितीये वा तृतीये वा कर्त्तव्यं श्रुति चोदनात् ॥"

आश्वलायनाचार्यस्य मतेन तु–

"तृतीये पञ्चमे वाब्दे चौलकर्म प्रशस्यते ।
प्राग्वाऽसमे सप्तमे वा सहोपनयनेन वा ॥"

महर्षि अत्रि दृष्ट्या तु–

"तृतीये वर्षे चौले तु सर्वकामार्थ साधनम् ।
सम्वत्सरे चु चौलेन आयुष्यं ब्रह्मवर्चसम् ॥
पञ्चमे पशुकामस्य युग्मे वर्षे तु गर्हितम् ॥"

चूड़ाकरण कर्म कस्मिन् मासे पक्षे मुहूर्ते वा भवेत् इति विषयेऽपि उक्तम् यत्–

"मकरे सर्व सम्पत्ति कुंम्भे सन्तानकारकः ।
मीनमासे सदा सौख्यं मेषे सर्वार्थ साधनम् ॥
विजयं वृषभे विद्यान्मिथुनं वंशवद्धिकृत् ।
कर्कटे बहुरोगित्वं सिंहे नष्ट प्रजा भवेत् ॥
षष्ठे कुलक्षयं विद्यातुलायां देहनाशनम् ।
वृश्चिके बन्धु नाशः स्यात् वित्तनाशस्तु कार्मुके ॥"

चूड़ाकरण संस्कार निमित्तं शुक्लपक्षः प्रशस्तः भवति। बृहस्पति मतेन तु–"शुक्ल पक्षे शुभं प्रोक्तं कृष्णपक्षे शुभेतरत् । वशिष्ठस्य मतेन द्वितीया, तृतीया, पंचमी, सप्तमी, दशमी, एकादशी त्रयोदशी च शुभ तिथिः वर्त्तते चूड़ाकरण निमितम् । तद्यथा–

"द्वित्रिपञ्चमसप्तम्यामेकादश्यान्तथैव च ।
दशम्यां च त्रयोदश्यां कार्यं क्षौरं विजानता ॥

अस्य संस्कारस्य प्रधानाङ्गमस्ति शिखास्थापनम् । शिखास्थापनं स्वकुल परंपरानुसारेण भवेत्–"यथा कुल धर्म केशवेशान कारयेत् (आ. गृ. सू. 1/17) यजुर्वेदः वदति-यशसे श्रियः । सद्योपवीतिनाभाव्यं सदाबद्धशिखेन च।।"

शिखायाः स्थापन विषये अष्टाङ्गहृदयकारेणोक्तं यत्–

"आन्तरोमस्तकस्योर्ध्वं शिरासन्धि समागमः ।
रोमावर्तोवधिपोनाम मर्मः सद्यो हरत्सूनू ॥"

अन्ते गोमयपिण्डेन सह छिन्न केशान् नद्यां तड़ागे वा क्षिपेत् इति ।

।। इति चूड़ाकरण संस्कारः ।।

उपनयन संस्कारः

षोडश संस्कारेषु उपनयन संस्कारः महत्त्वपूर्णं स्थानं भजते। उपनयन संस्कारे मुख्यकर्म माणवकस्य यज्ञोपवीत धारणम् वर्तते। गृह्यसूत्राणामनुसारेण यज्ञोपवीतस्यधारणं ब्राह्मणबालकस्य कृते अष्टमे वर्षे क्षत्रियस्य एकादशे, वैश्यस्य च द्वादशेवर्षे। तद्यथा–"अष्टमे वर्षे ब्राह्मणमुपनयेत् । एकादशेक्षत्रियं द्वादशे वैश्यम् ।।"[40] पुनश्च यस्य एतस्मिन् वर्षे उपनयन संस्कारो नैव भवति स पतित इति स्वीक्रियते। उक्तञ्च–"अत ऊर्ध्वं पतितसवित्रीका भवन्ति।।"[41]

अनेन परीक्ष्यते यत् यः शीघ्रमेव विद्यामिच्छतितस्य कृते उपनयनसंस्कारोऽपि शीघ्रं कुर्यात् । उक्तञ्चमनुना–

"ब्रह्मवर्चस कामस्य कार्यं विप्रस्य पञ्चमे ।

राज्ञो बालार्थिन षष्ठे, वैश्यस्येहार्थिनोऽष्टमे ॥"[42] मनु 2/27

उपनयनस्य कालविषये शतपथब्राह्मणे उक्तमस्तियता–

"वसन्ते ब्राह्मणमुपनयेद् ग्रीष्मे राजन्यं शरदि वैश्यम् । पयोव्रतो ब्राह्मणो यवागूव्रतो राजन्य आमिक्षाव्रतो वैश्यः ॥"[43]

बालकस्य पिता आचार्यो वा वेदी समीपं उपनयन सामग्रीन् संस्थाप्य पञ्चभूः संस्कारपूर्वकं समुद्भव अग्नेः स्थापनं कृत्वा संकल्पं कुर्यात् । आचार्यः मुण्डित शिरं कुमारं माङ्गलिक द्रव्येण स्नात्वा वस्त्रं परिधाय आचार्यस्य समीपं आनीयात् । तदा आचार्यः अग्निसम्मुखं पूर्वाभिमुखं स्थित्वा दक्षिण भागे कुमारं उत्तराभिमुखं उपावेश्य वदेत्–"ब्रह्मचर्यमागाम्। ब्रह्मचार्यसानि।[44]

ब्रह्मचारी अनुवदेत् । तदनन्तरं आचार्यः निम्न मन्त्रान् पठित्वा ब्रह्मचारिणं कटि सूत्रम् वस्त्रं च दद्यात्– "ॐ येनेन्द्राय बृहस्पतिर्वासः पर्यदधादमृतम् । तेन त्वा परिधाम्यांधुषे दीर्घायुत्वाय बलाय वर्चसे ।।"[45]

तदनन्तरं आचार्यः मन्त्रमिमं पठेत्–ॐ इयं दुरुक्तं परिवाधमाना वर्णं पवित्रं पुनती म आगात् । प्राणापानाभ्याम्बलमादधाना स्वसा देवी सुभगा मेखलेयम्"[46] इति मन्त्रेण प्रवरानुसारं मुञ्ज मेखलां धारणं कारयति।

तदनन्तरं कलशस्थापनादिकं कृत्वा एतन्ते मन्त्रेण प्रतिष्ठां कृत्वा अधोलिखित मन्त्रेण यज्ञोपवीतस्य तन्तुणां पूजनं कुर्यात् तद्यथा–

"ॐ कारदैवत्याय प्रथमतन्तवे नमः ।

ॐ अग्निदैवत्याय द्वितीयतन्तवे नमः ।

ॐ भग (नाग) दैवत्याय तृतीय तन्तवे नमः ।

ॐ सोमदैवत्याय चतुर्थतन्तवे नमः ।

ॐ पितृदैवत्याय पञ्चमतन्तवे नमः ।

ॐ प्रजापतिदैवत्याय षष्ठ तन्तवे नमः ।

ॐ वायुदैवत्याय सप्तम तन्तवे नमः ।

ॐ सूर्यदैवत्यायाष्टम तन्तवे नमः ।

ॐ सर्व दैवत्याय नवम तन्तवे नमः ।[47]

तन्तुस्थित देवतानां पूजनं कृत्वा त्रयाणां ग्रन्थिदेवतानां पूजनं कुर्यात्–

"ॐ हरये नमः । ॐ ब्रह्मणे नमः । ॐ ईश्वराय नमः । ॐ यज्ञोपवीतस्याधिपाय परब्रह्मणे नमः । तत्पश्चात् ॐकार गायत्री जपं, प्राणायामं कृत्वा त्र्यम्बकमन्त्रं[48] पठित्वा "आपोहिष्ठा"[49] इति मन्त्रेण यज्ञोपवीतस्य प्रक्षालनं कुर्यात् । ततः निम्नमन्त्रेण यज्ञोपवीत धारणं कुर्यात्–"ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यतसहजं पुरस्तात् । आयुष्यमग्रयं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः।। ॐ यज्ञोपवीतमसि यज्ञस्य त्वां यज्ञोपवीते नोपह्यामि।।"[50] तदनन्तरं आचमनं कृत्वा अग्निः प्रदक्षिणां कृत्वा आचार्यः मृगचर्मणः यज्ञोपवीतं माणवकं दद्यात्। मन्त्रं पठेत् यत्–

"ॐ मित्रस्य चक्षुर्द्धरणं बलीयस्तेजोयशस्वि स्थविरं समृद्धम् । अनाहनस्यं वसनं जयिष्णु परीदं वाज्यजिनं दधेऽहम् ।।"[51]

तदनन्तरम् मौनपूर्वकं आचार्यं ब्रह्मचारिणं दण्डं दद्यात् । दण्डग्रहणा नन्तरं मन्त्रं पठेत्–

"ॐ यो मे दण्डः परापत द्वैहायसोधिभूम्याम् ।
तमहं पुनराददे आयुषे ब्रह्मणे ब्रह्मवर्चेसाथ ।।"[52]

दण्ड ग्रहणानन्तरं अधोलिखित मन्त्रेण दण्डं आकाशे उड्डीयेत्–

ॐ उच्छ्रयस्व वनस्पत ऊर्ध्वो मा पाह्यं हस आस्य यज्ञस्योदृचः ।।"[53]

तदनन्तरं आचार्य स्व अञ्जलिमध्ये जलं आदाय माणवकस्य अंजलिमध्ये पूरयेत्–

"ॐ आपोहिष्ठा मयो भुवस्ता न ऊर्जे दधातन । महेरणाय चक्षसे ।।1।।
यो वः शिवतमो रस तस्य भाजयतेह नः।
उशतीरिव मातरः ।।2।।[54]
तस्म अरङ्गमाम वो यस्य क्षयाय जिन्वथ ।
आपो जन यथा च नः ।।3।।[55]

तदुपरान्तं आचार्यः ब्रह्मचारिणं सूर्योपस्थानं कर्तुं वदेत् । सूर्यं अंजलिमध्ये स्थितं जलमादाय उपरिहस्तं कृत्वा अधोलिखित मन्त्रेण उपस्थानं कुर्यात्–"ॐ तत्चंक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरतः पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम

शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्।।"[56] तदुपरान्तम् आचार्यः ब्रह्मचारिणः हृदयस्पर्शं अनेन मन्त्रेण कुर्यात्–"ॐ ममं व्रते ते हृदयंदधामि मम चित्तमनुचित्तं ते अस्तु । मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यम् ।।[57]

पुनश्च आचार्य बालकस्य दक्षिण हस्तस्य अगुष्ठं धृत्वा वदेत्–"को नामासि। तदा ब्रह्मचारी वदेत्–अमुकशर्माहं भोः–इति त्रिबारं वदेत् । पुनश्च आचार्यः कथयेत्–

कस्य ब्रह्चार्यासि। तदा ब्रह्मचारी–भवतः इति उत्तरेत् । तदा आचार्यः मन्त्रोऽयं पठेत् मन्त्रान्ते सः "आचार्यस्तव देवशर्मन्" पुनश्च असौ स्थाने ब्रह्मचारिणः नाम ब्रूयात् । तद्यथा–

"ॐ इन्द्रस्य ब्रह्मचार्यस्यग्रिराचार्यस्तवाहमाचार्यस्तव अमुक शर्मन् ।"

तदनन्तरम् आचार्यः प्रणम्य ब्रह्मचारिणं पूर्वादि दिशानां उपस्थानं प्रजापति भूतेभ्यो रक्षार्थं कारयेत् तदर्थं आचार्यः मन्त्रं स्वयं पठेत्–पूर्वाभिमुखोभूत्वा–"ॐ प्रजापतये त्वा परिददामि। दक्षिणाभिमुखे–'ॐ देवाय त्वा सवित्रे परिददामि। पश्चिमाभिमुखे–ॐ अद्भ्यस्त्वौषधीभ्य; परिददामि। उत्तराभिमुखे–ॐ द्यावापृथिवीभ्यां त्वां परिददामि अधः दृष्ट्वा-ॐ विश्वेभ्यस्त्वा देवेभ्यः परिददामि उपरि दृष्ट्वा–ॐ सर्वेभ्यस्त्वा देवेभ्यः परिददाम्यरिष्ट्यै।

तत्पश्चात् ब्रह्मचारी अग्नेः प्रदक्षिणां कृत्वा आचार्यस्य उत्तरदिशायां उपविशेत । पुनश्च भिभापात्रं समीपे संस्थाप्य पवित्रीकरणं कृत्वा द्रव्यदेवताभिर्ध्यानं कुर्यात–"अद्येहामुकोहं अस्य वटोरुपनयनकर्मणा यक्ष्ये। तत्र प्रजापतिं इन्द्रं "अग्निं सोमं वायु सूर्यं अग्नीवरुणौ, अग्नि, वरुणं सवितारं विष्णु विश्वान् (देवान्) मरुत; स्वर्कान् वरुणं प्रजापतिं स्विष्टकृतञ्चा-ज्येनयक्ष्ये।

तदुपरान्तं समुद्भव नामधेय अग्न्याः आवाहनं कुर्यात्–"एतन्ते" ॐ भूर्भुवः स्वः समुद्भवनामाग्ने सुप्रतिष्ठितो वरदो भव।" अग्निं प्रतिष्ठाप्य अग्नेः पूजनार्थं सङ्कल्पं कुर्यात्–

"अद्येहामुकोहं उपनयनकर्माङ्गहोम कर्मणि समुद्भव नामाग्नेः पूजनं करिष्ये।"

सङ्कल्पानन्तरं चत्वारि शृङ्गादिमन्त्रेण[58] गन्धादि द्वारा रेखापूजनं, जिह्वापूजनं, आघारादि चतुर्दश आहुतिं हुत्वा आज्याहुति होमः, संस्रवप्राशनं मार्जनं, पवित्रप्रतिपत्तिः प्रणीता विमोकादिक कृत्वा ब्रह्माणं संकल्प्य पूर्णपात्रं दद्यात् तद्यथा–

"अद्येह अमुकशर्माहं अमुकशर्मणोऽस्य कुमारस्य उपनयनाङ्गहोमकर्मणः सादगुण्यार्थं अपूर्णपूरणार्थञ्च इदं पूर्णपात्रं ससुवर्णं ब्रह्मन् तुभ्यं सम्प्रददे ।

तत्पश्चात् आचार्यः ब्रह्मचारिणं शिक्षयेत् यत् त्वं "ब्रह्मचासि"। अद्यारभ्य त्वं ब्रह्म नाम वेदोक्त कर्मणः अधिकारी असि। ब्रह्मचारीः "असानि" वदेत् । आचार्यः–कर्मं कुरु। अर्थात् त्वं स्नानं संध्योपासनं वेदाध्ययनं भिक्षाचरणादिकं स्वशास्त्रोक्त कर्मं करोतु ।

ब्रह्मचारी–करवाणि अर्थात् अहं करिष्यामि वदति ।

आचार्यः–मा दिवा सुषुप्थाः ।

ब्रह्मचारी–न स्वपानि ।

आचार्यः–वाचं यच्छ। अर्थात् धर्मशास्त्रानुसारं भोजन शौचादि समये मौनं तिष्ठतु।

ब्रह्मचारी–यच्छानि ।

आचार्यः–समिधमाधेहि ।

ब्रह्मचारीः–आदधानि ।

आचार्यः–अपोशान् । भोजनात् परं नित्यं आचमनं करोतु ।

ब्रह्मचारीः–अश्नानि ।

आचार्य ब्रह्मचारी संवादानन्तरं दीक्षायाः लग्ने लग्नदानस्य सङ्कल्पं कुर्यात् । तदनन्तरं आचार्यः ब्रह्मवर्चसकामायमानं ब्रह्मचारिणं सावित्री मन्त्रस्योपदेश; कुर्यात् । आश्वालायन स्मृति मतेन "प्रणवव्याहृति पूर्वां गायत्रीं प्रथमं पच्छोब्रूयात् । तत्र प्रथमं प्रथम पादः–

"ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यम् , ततः द्वितीयः पादः–"भर्गो देवस्य धीमहि, तत; तृतीय; पादः–"धियो यो नः प्रचोदयात् ।।

द्वितीय बारं आचार्यः अर्धं अर्धं मन्त्रस्य उपदेश; कुर्यात् तद्यथा–"ॐ भूर्भुवः स्व; तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।

द्वितीयः अर्धभागः

धियो यो नः प्रचोदयात् ।

तृतीय बारं आचार्यः सम्पूर्ण गायत्री मंत्रस्य उपदेशं कुर्यात्–"ॐ भूर्भुवः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ।।

तदनन्तर ब्रह्मचारी आचार्यचरणौ प्रणम्य सङ्कल्पपूर्वकं गुरुदक्षिणां दद्यात्। गुरुः आशीर्वादं वदेत्–"अद्येह अुकराशिरमुक शर्माहं कृतैतद गायत्री ग्रहणकर्मणः सादगुण्यार्थमिदं सुवर्णमग्निदैवतं वररूपेणाचार्याय तुभ्यमहं सम्प्रददे । तदुपरान्तं आचार्यः अधोलिखित मन्त्रेण उपनयननिमित्तं अग्ने; संधुक्षणम् (प्रज्वालनं) कुर्यात् तथाहि–

ॐ अग्ने सुश्रवः सुश्रवसम्मा कुरु ।।1।।

ॐ यथा त्वमग्ने सुश्रवः सुश्रवा असि ।।2।।

ॐ एवम्माँ सुश्रवः सौश्रवसं कुरु ।।3।।

ॐ यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि ।।4।।

ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासम् ।।5।।

तदनन्तर ब्रह्मचारी अग्ने; ईशानकोणतः उत्तरपर्यन्तं प्रदक्षिणाक्रमेण जलं क्षिपेत्। जलसेचनानन्तरं प्रादेशमात्र घृताक्तान् त्रीन् समिधान् स्वीकृत्य त्रिबारं समिदाधानं कुर्यात्–

"ॐ अग्नये समिधमहार्षं बृहते जातवेदसे। यथा त्वमग्ने समिधा समिद्धयसे एवमहयायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे। जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिरा-करिष्णुर्य्यशस्वी तेजस्वी ब्रह्मवर्च्चस्व्यन्नादो भूयासंᳬस्वाहा।

समिदाधानात् परं अग्नि प्रदक्षिणा, पर्य्युक्षणं हस्तेन मुखामार्जनं अङ्गाप्यायनं आयुष्करणंकृत्वा ब्रह्मचारी एकाग्रचित्तेन अग्निं ईश्वरं गुरुं च प्रणमेत् । अग्नि प्रणामं कुर्यात्–"अमुकगोत्रोऽमुकप्रवरो यजुर्वेदान्तर्गतामुकशाखाध्यायी अमुकशर्माहं भो अग्ने त्वामभिवादये। तदनन्तरं गुरुं-प्रणमेत् "अमुकगोत्रोऽमुकप्रवरो यजुर्वेदान्तर्गताऽमुकशाखाध्यायी अमुकशर्माहं भो गुरो त्वां अभिवादये।

गुरुः अपि निम्नस्थ वाक्येण आशीर्वादं दद्यात्–

"आयुष्मान्भव सौम्याऽमुकशर्मन्"।

तत्पश्चात् ब्रह्मचारी वृद्ध पुरुषान् माता पिता पितामहादीनां यथायोग्य अभिवादनं कुर्यात्।

<u>भिक्षाचर्या-</u>

तदुपरान्तं पीतवस्त्रेण निर्मित्तां स्यूतां दक्षिण स्कन्धे संस्थाप्य हस्ते दण्डं भिक्षापात्रं च गृहीत्वा ब्रह्मचारीः भिक्षां याचयेत्–

ब्राह्मणीं प्रति–"भवति भिक्षां देहि मातः ।

क्षत्रियां प्रति-भिक्षां भवति देहि मातः ।

वैश्यां प्रति- भिक्षांदेहि भवति मातः।

पुरुषान्–भवान् भिक्षां देहि" इति वदेत् ।

ब्रह्मचारी भिक्षाटनं कृत्वा-"ॐ स्वस्ति" इति वदेत् पुनश्च–"भो गुरो । इयं भिक्षा मया लब्धा" इति वाक्यं उक्त्वा भिक्षां गुरुं समर्पयेत् । आचार्यस्य वाक्यं–"भैक्ष्यं भुङ्क्ष्व" इति आज्ञां प्राप्त भोजनार्थं भिक्षां स्वीकरणं कुर्यात् । पुनश्च गुरुं होम दक्षिणां दद्यात् ।

<u>होमदक्षिणा संकल्पः-</u>

"ॐ अद्येहामुकोहममुक राशेः पुत्रस्योपनयनाङ्गहोमकर्मणः सादगुण्यार्थं इदं सुवर्ण वररूपेण आचार्याय तुभ्यं सम्प्रददे। ॐ तत्सन्न मम।

होमदक्षिणात् परं गुरु ब्रह्मचर्यस्य नियमाः उपनियमान् श्रावयेत् । तदुपरान्त ब्राह्मणभोजनस्य संकल्पं च कारयेत्।

"अद्येह कृतस्यास्य पुत्रस्योपनयनकर्मणः साङ्गतासिद्धयर्थं पञ्चाशत यथाशक्ति वा ब्राह्मणान् भोजयिष्ये।

इति संकल्प्य समुद्भव नामकस्य अग्नेः पूजनं कृत्वा विसर्जनं कारयेत् ।

ब्रह्मचारिणः नियमाः उपनियमाश्च-

आचार्य पारस्करमतेन–"अधः शाय्यक्षारालवणाशीस्स्यात् । दण्डधारणमग्नि- परिचरणं गुरुशुश्रूषा भिक्षाचर्या। मधुमांसमञ्जनोपर्यासनस्त्रीगमना-नृतादत्तादानानि वर्जयेत् ॥ पा. गृ. सू. का. 2 कं 5।।

मनुनापि उक्तम्–

"वर्जयेन्मधु मांसञ्च गन्धं माल्यं रसान् स्त्रियः ।
शुक्तानि यानि सर्वाणि प्राणिनाञ्चैव हिंसनम् ॥
अभ्यङ्गमञ्जनच्चाक्षणोरुपानच्छत्रधारणम् ।
कामं क्रोधञ्च लोभञ्च नर्तनं गीतवादनम् ॥
द्यूतञ्च जनवादञ्च परिवादं तथानृतम् ।
स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च ॥
एकः शयीत सर्वत्र न रेतः स्कन्दयैत्क्वचित् ।
कामाद्धि स्कन्दयन् रेतो हिनस्ति व्रतमात्मनः ॥"

स्मृत्यन्तरे–"मधुमांसञ्जनोच्छिष्टमुक्तस्त्रीप्राणिहिंसनम् । भास्करालोक-नाश्लीलपरिवादादिवर्जयेत् ॥

।। इति उपनयन संस्कारः।।

कर्णवेधः

वैदिक संस्कारेषु कर्णवेध संस्कारस्य महत्वपूर्णं स्थानं वर्तते। अस्य कर्णवेध संस्कार विषये सुश्रुत संहितायां प्रतिपादिमस्ति यत् –

"रक्षाभूषणनिमित्तं बालकस्य कर्णौ विध्येत् ।

अर्थात् रोगाणां निवारणार्थंमाभूषणेभ्यश्च विधिः स्वीकृतः। आश्वलायन गृह्यसूत्रे–

"कर्णवेधो वर्षे तृतीये पंचमे वा। बृहस्पतेरनुसारं जन्मतः दशमे द्वादशे षोड्शे वा दिवसे कर्णवेधः भवेत् । कात्यायनश्रौतसूत्रे–"कर्णवेधो वर्षे तृतीये पञ्चमे वा। अपि च–माङ्गलिके मुहूर्त्ते पूर्वाभिमुखे आसने बालकमुपवेश्य तस्य दक्षिणं पश्चात् वामकर्णं छेत्तुं निर्दिशति ।

सुवर्णेन क्षत्रियस्य रजतेन ब्राह्मणस्य ताम्रेन वैश्यस्य लौहेण शूद्रस्य कर्णं छेद्यात् इति संस्कार दीपके उल्लिखितिम् अस्ति। संस्कारगणपतौ तु कन्याणामपि कर्णवेधस्य विधानं दृश्यते तद्यथा–

"कन्याया कर्णवेधः स्याद् सद्वारे विषमेब्दके ।
आद्ययामे सिते पक्षे मैत्रेक्षिप्रोत्तराचरै ॥

अन्यच्च–"रक्षाभूषणनिमित्तं बालस्य कर्णौ विध्येते षष्ठे मासि सप्तमे वा शुक्लपक्षे प्रशस्तेषु तिथिकरण मुहूर्त्तनक्षत्रेषु कृतमङ्गलस्वस्तिवाचनं धात्रयङ्के कुमार मुपवेश्य बालक्रीडनकैः प्रलोभ्याभिसान्त्वयन् भिषग्वाम् हस्तेनाकृष्य कर्मं दैवकृते छिद्रे आदित्यकरावभासिते शनैः शनैर्दक्षिण हस्तेन ऋजुविध्येत् प्रतनुकं सूच्यावहलमारया पूर्वं दक्षिणां कुमारस्य वामं कन्यायास्ततः पिचुवर्ति प्रवेश्य सम्यक् विद्धमामतैलेन परिषेचयेत् । शोणितबहुत्वेन वेदनया वान्यदेशविद्धमिति जानीयान्निरुपद्रवतया तद्देशविद्धमिति।

।। इति कर्णवेध संस्कारः ।।

समावर्त्तनम्

समावर्त्तन संस्कारः एकः महत्वपूर्ण संस्कारः उच्यते । अस्य संस्कारस्य विषये यदुक्तमाश्वालयनगृह्यसूत्रे–"वेदसमाप्तिं वाचयीतं । कल्याणैः सह सम्प्रयोगः । स्नातकायोपस्थिताय राज्ञे च। आचार्य श्वसुर पितृव्य मातुलानां च दधानि मध्वानीय सपिर्वा मध्वलाभे। विष्टरः पाद्यमर्ध्यमाचनीयं मधुपर्कः।" अपि च पारस्करगृह्यसूत्रे–

"वेदं समाप्य स्नायाद् । ब्रह्मचर्यं वाष्टचत्वारिंशतम् । त्रयः एव स्नातकाः भवन्ति। विद्यास्नातको, व्रतस्नातको, विद्याव्रतस्नातकश्चेति ।

।। इति समावर्त्तन संस्कारः ।।

केशान्तः

केशानाम्–अन्तः (समीपे स्थित श्मश्रुभागः) केशान्तः इति निरुक्ति कारणात् श्मश्रुलोमानां च कर्त्तन् केशान्त संस्कार; उच्यते। आश्वालायनाचार्येणापि–"श्मश्रूणी होन्दति" इति वाक्येन श्मश्रुणां संस्कारमेव केशान्तः इत्युक्तः। देवयाज्ञिक मतेन उष्णोदकेन केशानाम् आसिञ्चने एषः नापितस्य प्रधानतायाः द्योतकः अस्ति। मनुनाप्युक्तम् यत्–

"केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते । राजन्यबन्धोर्द्वाविंशेवैश्यस्य द्वयधिके ततः। यदि ब्राह्मण ब्रह्मचर्याश्रमी स्यात तर्हि ब्रह्मचर्य समाप्तिपूर्वं सप्तदशेवर्षे आचार्यकुले एव तस्य केशान्त संस्कारः भवेत्।

शुभ दिवसे पिता शुभासने उपविश्य दीपप्रज्वालनम् आचमनं प्राणायाम स्वस्तिवांचनम् अर्घस्थापनं देवपुष्पाञ्जलि समर्पणपूर्वक गणेशपूजनं कृत्वा प्रधान संकल्पं कुर्यात्। संकल्पानन्तरं मातृपूजादि कलशे ब्रह्मवरुणादित्यादिनवग्रहाणां पूजनम् कृत्वा अग्निस्थापनं ब्राह्मण भोजनादिकं कारयेत् । तदन्तरं उष्णोदकं मस्तके सिञ्चनं कृत्वापठेत्–

"ॐ उष्णेन वाय उदकेनेह्युदिते केशश्मश्रु वप ।। पुनश्च जले घृतपिण्डं दत्वा जलं केशे दत्वा पठेत्–"ॐ सवित्रा प्रसूता दैव्या आपः उन्दन्तु ते तनूम्। दीर्घायुत्वाय वर्चसे ।

तदन्तरं शल्लकी केशं गृहीत्वा मौनपूर्वकं केशानां भागत्रयम् कुर्यात् पठेत्–"ॐ ओषधे त्रायस्व तदनन्तरं ताम्रक्षुरं धृत्वा केशोपरि चालयेत्–"ॐ येन भूरिश्चरा दिवं ज्योक् च पश्चाद्धि सूर्यम्। तेनते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तये॥' पुनश्च क्षुरं धृत्वा श्मश्रुच्छेदन कुर्यात्–"ॐ यत्क्षुरेण मज्जयता सुपेशसावप्त्रा वा वपति केशश्मश्रुच्छिन्धि शिरो मुखं माऽस्यायुः प्रमोषीः॥"

तदनन्तरं नापितः क्षुरेण सर्वान् केशान् कर्तयेत्–"ॐ अक्षण्वन् परिवप' इति मन्त्रेण। केशकर्तनानन्तरं पिता केशान् गोमय पिण्डे संस्थाप्य आचार्याय गौदक्षिणां ब्राह्मणान् भूयसी दक्षिणां दत्वा "यथा शक्ति वा भोजयिष्ये इति संकल्पं कृत्वा देवानां विसर्जनपूर्वकं तिलक मन्त्रपाठादिकं कारयेत्।

।। इति केशान्त संस्कारः ।।

विवाह संस्कारः

ब्रह्मचर्यव्रतानन्तरं गृहस्थश्रमधर्मानुपालनेच्छया वरः कन्या च सम्पूर्ण जीवनं सहैव जीवितुकामौ य; संस्कारं कुरुतः स एव विवाहोऽस्ति। न केवलं भारतवर्षे अपितु समग्रे विश्वे विवाहो धार्मिक जीवनस्यानिवार्यमङ्गं वर्तते। पत्नी तस्यार्द्धाङ्गिनी वर्तते। तथा तया विना पुरुषोऽपि अयज्ञिय मन्यते। यथा च तैत्तिरीय-ब्राह्मणे–

"आयज्ञियो वा एष योऽपत्नीकः।"

अस्माकं भारतीय संस्कृतेर्मान्यतानुरूपं विवाहोऽयं न केवलमस्य जीवनस्य कृते एवास्ति, अपितु जन्मजन्मान्तराणां कृते वर्त्तते। विवाह विषये उक्तमस्ति यत्–

"अग्निः प्रणयनं वस्त्र परिधानं समञ्जनम्।
गोत्रोच्चारो वरस्य प्राक् कन्यायाश्च ततोर्पणम्॥
कन्यादानप्रतिष्ठार्थं सुवर्णं गौश्च दक्षिणा।
गृहान्निष्क्रमणं चाग्निसमीपगमनं ततः॥
कन्यापितु; प्रैषदानं समीक्षेथामिति स्फुटम्।
अग्निं प्रदक्षिणी कृत्योपविश्य कुशकण्डिका॥
होमे वर्धूक्षिणतो हृदालम्भे तु वामतः।
उपवेश्य वरश्चैनां स्विष्टकृत् होममाचरेत्॥
संस्त्रवप्राशन पूर्णपात्रमाचार्य दक्षिणा।
विवाहानुक्रमश्लोकाः शितिकण्ठमुखोदिताः॥"

षोड्शं हस्तस्य मण्डपं कृत्वा स्वस्तिवाचनादन्ततरं पूर्वाभिमुखं वरं पश्चिमाभिमुखं कन्यां उपावेश्य दातारम् उत्तराभिमुखं उपावेश्य दीपप्रज्वालनम् अर्घस्थापनम् प्राणायाम गणेशादिपूजनं

कृत्वा निम्नस्थ संकल्प पूर्वकं मधुपर्केण वरस्य पूजनं कुर्यात् । तद् विषये संस्कार गणपतिकारेणोक्तम् यत्–

"सर्वत्र प्राङ्मुखो दाता प्रतिग्राही उदङ्मुखः ।
एष एव विधिर्दाने कन्यादाने विपर्ययः ॥"

वरः प्राङ्मुख उपविशेत् तस्य पुरस्तात् प्रत्यङ्मुखीं कन्यां पुरस्कृत्य दातोपविशेत् इति आश्वलायनगृह्यसूत्र परिशिष्ट भागे। तदनन्तरं निम्नलिखित संकल्पं कुर्यात्–"अद्येहेत्यादि अमुकगोत्रः अमुकराशिरमुकशर्माहं कन्यादानप्रतिग्रहार्थं गृहागतं स्नातकवरं मधुपर्केणार्चायिष्ये"। इति संकल्प्य कन्यायाः पिता वरम् उपवेष्टुं वरणादि यज्ञीय काष्ठं ऊर्णादिनिर्मित्तं आसनं दत्वा इमं मन्त्रं वदेत्–"ॐ साधुभवनास्तमिति प्रजापतिर्ऋषिर्ब्रह्मा देवता यजुश्छन्दो वरार्चने विनियोगः। साधु भवानास्ता मर्चयिष्यामो भवन्तम् ।

तदा वरः "अर्चयमिति वदेत् ।

तत्पश्चात् कन्याया पिता एकं विष्टरं नीत्वा पुनश्च आचार्यादि अन्य पुरुषा; त्रिवारं उच्चरेत्–

"ॐ विष्टरो विष्टरो विष्टरः ।।"

कन्यायाः पिता वरं प्रति वदेत्–

"ॐ विष्टरः प्रतिगृह्यताम् ।"

तदा वरः विष्टर गृहीत्वा–"ॐ विष्टरं प्रतिगह्णामि इति वाक्यं वदेत् । सः विष्टरं स्व आसने उत्तराग्रसंस्थाप्य इति वाक्यं वदेत् । सः विष्टरं स्व आसने उत्तराग्रसंस्थाप्य निम्न मन्त्रोच्चारणं कृत्वा उपविशेत्–"**ॐ वर्ष्मोस्मि समानानामुद्यतामिव सूर्यः। इमं तमभितिष्ठामि योमा कश्चाभिदासति॥**

तदा कन्यादाता अञ्जलि मध्ये पाद प्रक्षालनार्थं जलं स्वीकुर्यात् तदा आचार्यः त्रिवारं वदेत्–

"पाद्यं पाद्यं पाद्यम् । तदा कन्यादानकर्त्ता वदेत्–

प्रतिगृह्यताम् । तदा वरः वदेत्–"ॐ पाद्यं प्रतिगृह्णामि.' इति उक्त्वा कन्यादाता पात्रेण निम्न मन्त्रेण पादप्रक्षालनं कुर्यात्–

"ॐ विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः ।।"

तदा कन्यादाता काँस्य पात्रे जलं नयेत् तदा आचार्य वदेत्–"ॐ अर्घो अर्घो अर्घः।

तदाकन्यादाता वरं प्रति वदेत्–"ॐ अर्घः प्रतिगृह्यताम् । तदा वरः वदेत्–"ॐ अर्घं प्रतिगृह्णामि इति उक्त्वा निम्नस्थ मन्त्रेण अर्घपात्रं नयेत्–"ॐ आपस्थ युष्माभिः सर्वान् कामानवाप्रवानि।" अर्घपात्रं शिरसिस्पर्शं कृत्वा ईशानकोणे पातयेत्। मन्त्रमपि पठेत्–

"ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभि गच्छत ।

अरिष्टास्माकं वीरा मा परासेचिमत् पयः ॥"

तदनन्तरं कन्यादाता आचमनयोग्यं जलं हस्ते स्वीकुर्यात् आचार्यः वदेत्–"ॐ आचमनीयमाचमनीयमाचमनीयम् ।। इति। वरः दातारं हस्तात् आचमनीयं पात्रं स्वीकृत्य वदेत्–"ॐ प्रतिगृह्णामि। तदा अधोलिखित मन्त्रं पठित्वा एक बारं आचमनं कुर्यात् तथा द्विबारं मौनपूर्वक अमन्त्रकम् आचमनं करोति ।

"ॐ आमागन्यशसा सꣳसृज वर्चसा तं मा कुरु प्रियं प्रजानामधिपतिं पशुनामरिष्टिं तनूनाम् ॥"

तत्पश्चात् आचार्य कथयति–"ॐ मधुपर्को मधुपर्को मधुपर्कः । कन्यादाता दधिमधुघृतम् कास्यपात्रं संस्थाप्य "मधुपर्कः प्रतिगृह्यताम्" इति वरं वदेत् ।

तदा वरः "ॐ मधुपर्कं प्रतिगृह्णामि इति उक्त्वा स्वीकुयापात्रं । मधुपर्कं प्रति पश्येत्–

"ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे ।।" इति उक्त्वा मधुपर्कं वरः स्ववामहस्ते संस्थापयेत्–"ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूषणो हस्ताभ्यां प्रतिगृह्णामि।। तदनन्तरं अधोलिखित मन्त्रं त्रिवारं पठित्वा दक्षिण हस्तस्य अनामिका अंगुष्ठेन त्रिबारं संमिश्रणं कृत्वा प्रत्येकबारं मौनपूर्वकं भूमौ पातयेत्–

"ॐ नमः श्यावास्मायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि।"

तत्पश्चात् विनियोगपूर्वकं अधोलिखित मन्त्रेण अनामिका अंगुष्ठेन त्रिवारं मधुपर्कं कुर्यात् । त्रिबारं मन्त्र पठेत्–"ॐ यन्मधुनो मधव्यं परमेण रूपेणान्नेद्येत परमो मधव्योऽन्नादोऽसानि।।"

भुक्तशेष मधुपर्कं पूर्वदिशायां पातयेत् । तत्पश्चात् द्विवारं आचमनं कृत्वा हस्तं प्रक्षाल्य तर्जनी मध्यमा अनामिका अंगुलेन अङ्गस्पर्शं कारयेत्–

ॐ वाङ्मे आस्येऽस्तु (मुखम्)

ॐ नसोर्मे प्राणोऽस्तु (नासिका रन्ध्रौ)

ॐ अक्ष्णोर्मे चक्षुरस्तु (नेत्रौ)

ॐ कर्णयोर्मे श्रोत्रमस्तु (कर्णौ)

ॐ वाह्वोर्मे बलमस्तु (बाहुमूलम्)

ॐ ऊर्वो में ओजोस्तु (जंघा)

अरिष्टानिमेङ्गानि तनूस्तन्वा मे सह सन्तु (शीर्षात् पाद पर्यन्तम्)

अङ्गस्पर्शात परं गौपूजनं ग्रोग्रासं च दद्यात् । तदनन्तरं कन्यादाता वराय दातुं मधुपर्कीय गोदानस्य संकल्पं कुर्यात् । पुनश्च आचार्याय गोदानं कुर्यात् ।

अथ कन्यादान विधिः-

तदनन्तरं पञ्चभूसंस्कारपूर्वकं अग्नि स्थापनं कृत्वा कन्यादाता संकल्प्य सद्रव्यकं वस्त्रचतुष्ट्यम् वरम् प्रतिददाति। तदर्थं संकल्पः-"ॐ अद्येहामुकशर्माहं कन्यादानकर्मणः पूर्वाङ्गत्वेन वराय सद्रव्यं वस्त्रचतुष्टयं सम्प्रददे ।

वरं "ॐ स्वस्ति" उक्त्वा वस्त्रग्रहणं कृत्वा ततः वस्त्र द्वयम् कन्यां दद्यात् द्वयम् स्वयं धारणं कुर्यात् । तत्र कन्याधोवस्त्रधारण मन्त्रः-"ॐ जरां गच्छ परिधत्स्ववासो भवाकृष्टीनामभिशस्ति पावा। शतञ्च जीव शरदः सुवर्चा रयिं च पुत्राननुसंव्ययस्वायुष्यमतीदं परिधत्वस्व वासः।।" कन्योत्तरीय वस्त्र धारण मन्त्र-

"ॐ या अकृन्तन्नवयन् या अतन्वतायाश्च देवीस्तनूनभितो ततन्थ। तास्त्वादेवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वासः ।।

तदनन्तरं वरः मन्त्रद्वयं पठित्वा धौतवस्त्रं धारयेत् आस्तरणं स्कन्धे स्थापयेत् ।

वरस्य अधोवस्त्र धारण मन्त्रः-

"ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि शतञ्च जीवामि शरद; पुरूची रायस्पोषमभिसं व्ययिष्ये।।" अथ उत्तरीय धारण मन्त्राः-

"ॐ यशमा मा द्यावा पृथिवी यशसेन्द्राय बृहस्पतीयशो भगश्च मा विन्दद्यशो मा प्रतिपद्यताम् ।।"

वरः उत्तरीयधारणानन्तरं वर कन्याद्विवारं आचमनं कुर्यात् ।

तदनन्तरं वरः कन्या; च परस्परं मुखावलोकनं कृत्वा निम्नस्थ मन्त्रं पठेत्-"ॐ समञ्जन्तु विश्वेदेवा समापो हृदयानि नौ सम् मातरिश्वा सन्धाता समुदेष्ट्री दधातु नौ ।।"

तदनन्तरं गोत्रोच्चारः-

सम्मुखीकरणोपरान्तं याज्ञवल्क्य वचनानुसारं ग्रन्थिबन्धनं भवेत्-

"कन्यका सुदर्शे पार्श्वे द्रव्यपुष्पाक्षतानि च ।
निक्षिप्य तानि संबद्धा वरवस्त्रेण संयुजेत् ॥
वस्त्रैः संयोज्य तौ पूर्वं कन्यादानं समाचरेत् ।
दानेन युक्तयोः पश्चाद्विदध्यात्पाणिपीड़नम् ॥"

वरकन्यापक्षयोः गोत्रोच्चारणात् पश्चात् शुभ लग्ने वस्त्राभूषणैः सुंसज्जितां कन्यां गन्धाक्षतैः समन्त्रकं पूजयेत्-

"ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाण मुम्म इषाण सर्वलोकं म इषाण॥"

"ॐ अम्बेऽम्बिकेऽम्बालिके न मानयति कश्चन ।

ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥
ॐ समख्ये देव्या धिया सन्दक्षिण योरुचक्षसा ।
मामा आयु प्रमोषीर्मो अहं तव वीरं विदेय तव देवि सन्दृशि ॥''

तदुपरान्तं उत्तम लग्ने पाणिग्रहणं लग्नदानं कुर्यात् । लग्नदानोपरान्तं कन्याया; पिता कन्याया दक्षिण अंगुष्ठं धृत्वा कुशतिलयवजलान्यादाय कन्यादानस्य संकल्पं कुर्यात् । अथ कन्यादन संकल्पः–

''ॐ विष्णुः 3 ॐ नमः परमात्मने श्रीपुराण पुरुषोत्तमाय ॐ तत्सत् श्रीहंसस्य चित्सदान्दरूपिणो ब्रह्मणोवनिर्वाच्यमायाशक्तिविजृम्भिताविद्यायो। गात कालकर्मस्वभावाविर्भूत-महत्तवौदिताऽहंकार-त्रितयोद्-भूतवियदाऽदिपंचकेन्द्रियदेवतानिर्मितांडकटाहे चतुर्दलोकात्मके लोके लीलया तन्मध्यवर्तिभगवतः श्रीनारायणस्य नाभिकमलोद् भूतेन सकललोकपितामहेन ब्रह्मणा सृष्टिं कुर्वता तदुद्धरणाय प्रार्थितेन महापुरुषरूपिणा धृतवाराहावतारेण ध्रियमाणायामस्यां भूर्लोकसंज्ञितायां धरित्र्यां सप्तद्वीपमंडितायां क्षीरोदाद्यब्धिद्विगुणकुशादिद्वीपबलयीकृते लक्षयोजनविस्तीर्णे जम्बूद्वीपे भरतखण्डे स्वर्गस्थितामराद्याशासितावतारे गङ्गादिसरिद्भिः पाविते निखिलजनपावने शौनकादिमुनिकृतवसतिके नैमिषारण्ये आर्यावर्त्ते पुण्यक्षेत्रे श्रीभगवत्वमार्तंडकृपा-पात्रकालत्रितयज्ञगर्गवराहाचार्यादिगणितायां संख्यायां श्रीब्रह्मणो द्वितीयपरार्धे द्वितीयामे तृतीयमुहूर्त्ते श्रीश्वेतवाराहनाम्नि प्रथमकल्पे स्वायंभुवस्वारोचिषोत्तमतामसरैवतचाक्षुषेपितण्म-नूनामतिक्रम्यमाणे सम्प्रति सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितकलियुगस्य प्रथमचरणे बौद्धावतारे श्रीमनृपतिविक्रमार्कसमयात् सम्वतसराणां समयेनातिक्रान्तानां षष्टयब्दानां मध्ये अमुकनामसम्वत्सरे अमुकायने अमुकर्तौ अमुकमासे अुकपक्षे अमुकतिथौ अमुकवासरे अमुकनामदिवस-नक्षत्रे अमुकनाममहानक्षत्रे अमुकनामयोगे अमुकनामकरणे अमुकनाममुहूर्ते अमुकस्थे सूर्ये अमुकस्थे चन्द्रे अमुकस्थे भौमे अमुकस्थे बुधे अमुकस्थे देवगुरौ अमुकस्थे शुक्रे अमुकस्थे शनौ अमुकस्थे राहौ अमुकस्थे केतौ एवंगुणविशेषविशिष्टायाम् अस्यां शुभावस्थायां अमुकगोत्रोमुकप्रवरोमुकराशिरमुकशर्मा सपत्नीकोऽहम् अमुकगोत्रस्यामुक-प्रवरस्यांमुक-शाखिनोमुकवेदाध्यायिनोऽमुकशर्मणः प्रपौत्राय अमुकगोत्रस्यामुकप्रवरस्यामुक-शाखिनोमुकवेदाध्ययिनोमुकशर्मणः पौत्राय अमुकगोस्त्रस्यामुकप्रवरस्यामुक-शाखिनोमुकवेदा-ध्ययिनोऽमुकशर्मणः पुत्राय आयुष्मते विष्णुस्वरूपिणे कन्यार्थिने अमुकगोत्रायामुकप्रवराय अमुकशर्मणे वराय अमुकगोत्रस्यामुकप्रवर-स्यामुकशाखिनोमुकवेदाध्यायिनोमुक-शर्मणः पौत्रीम् अमुकगोत्रस्यामुकप्रवर-स्यामुकशाखिनोमुकवेदाध्यायिनोमुकशर्मणः पुत्रीम् आयुष्मतीम् श्रीरूपिणीं वरार्थिनीम् अमुकनामनीमिमां कन्यां यथाशक्त्यलं-कृतां यथा-शक्त्युपकल्पितयौतुकयुतां प्रजापतिदैवतां (विधानपावयसंर्त) मम पुराणोक्तशतगुणीकृतज्योतिष्टोमातिरात्रसमफलप्राप्ति-पूर्वकं मम समस्तपितृणां निरतिशयानन्दब्रह्मलोकावाप्त्यादिफलवाप्तिपूर्वकं वा श्रीलक्ष्मीनारायणप्रीतये तथानेन वरेणास्यां

कन्यायामुत्पादयिष्यमाणसन्तंत्या द्वादशावरान् द्वादशपरान् पुषान् । आत्मानं च पवित्रीकर्तुं देवाग्निगुरुब्राह्मणसन्निधौ अग्न्यादि-साक्षिकतया सहधर्माचरणाय तुभ्यमहं सम्प्रददे।

एतेन प्रकारेण कन्यादान संकल्पं कृत्वा कन्यायाः दक्षिणहस्तं वरस्य दक्षिणहस्ते समर्पयेत् । तदनन्तरं वरं इमं मन्त्रं पठित्वा कन्यायाः ग्रहणं कुर्यात्–

"ॐ देवस्य त्वा सवितु प्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्यां (प्रजापतये प्रतिगृहणामि) द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु ।। तदन्तरं "ॐ स्वस्तीति" कथयित्वा कन्याया दक्षिण अंगुष्ठं धृत्वा कामस्तुंति करोति–

"ॐ कोऽदात् कस्मा अदात् कामोदात् कामायादान् कामो दाता काम; प्रतिग्रहीता कामैतत्ते ।।"

तदनन्तरं कन्याया पिता कन्यादान कर्म प्रतिष्ठार्थं सुवर्णदानं वरं दद्यात् । तदा वरः "ॐ स्वस्ति" इति प्रतिवाक्यं कथयेत् । तद्यथा–

"ॐ अद्येहामुकोऽहं कन्यादानकर्मणः साद्गुण्यार्थं फलप्रतिष्ठा सिद्ध्यर्थं इदं सुवर्णमग्निदैवतं वराय तुभ्यं समप्रददे तथा दास्यमानं यौतुकादिकं च वराय तुभ्यं सम्प्रददे न मम।।"

तदनन्तरं शिष्टाचार परंपरया कन्यादाता वरकन्याया उत्तरीय वस्त्रस्य क्रोणे द्रव्यं पूगीफलं सर्षष; अक्षतः हरिद्रा। संस्थाप्य बंधनं कृत्वा कलशोपरि स्थापयेत् । मन्त्रमपि पठेत्– एतन्ते इत्यादि। ॐ भुर्भुवः स्व; अञ्चलग्रन्थे सुप्रतिष्ठो भव।" ततपश्चात् ब्राह्मण भोजनं भूयसी दक्षिणां दद्यात् । तत्पश्चात् वरः कंन्यायाः वामहस्तं स्वदक्षिणहस्तेन आदाय गृहात् मण्डपस्थित अग्नेःसमीपं गच्छेत् । कन्यां प्रति वदेत्–"ॐ यदैषि मनसा दूरं दिशोऽनु पवमानो वा। हिरण्यपर्णो वैकर्णः स त्वा मन्मनसा करोतु ।।"

तदनन्तरं कन्यायाः पिता "परस्परं समीक्षेयाम्" इति वदति तदा वरः अधोलिखित मन्त्रान् पठित्वा कन्यां पश्यति यथा–

"ॐ अघोरचक्षुरपतिह न्योधि शिवा पशुभ्यः सुमनाः सुवर्चा वीरसूर्देवकामा स्योना शन्नोभव द्विपदे शं चतुष्पदे ।।

ॐ सोमः प्रथमो विविदे गन्धर्वो विविद उत्तर ।
तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ।।
ॐ सोमोददत्गन्धर्वाय गन्धर्वो दददग्नये ।
रयिञ्च पुत्राश्चादादाग्निर्मह्यमथो इमाम् ।।

ॐ सा नः पूषा शिवतमा मैरय उरू उशती विहर यस्यामुशन्तः प्रहराम शेपं यस्यामु कामा बहवो निविष्टयै।।"

तदुपरान्तं वर वधूं अग्रे कृत्वा अग्नेः प्रदक्षिणां कुर्यात् । वधूं दक्षिणाङ्गकृत्वा तृणास्तरणे उपविशेत् । त्रिबारम् आचम्यजं प्राणायामर्धस्थापनपूर्वकं प्रधान संकल्पं च कुर्यात्।

"अद्येहेत्यादि अमुकगोत्रोऽमुकराशिरमुकशर्माहं धर्मार्थकाम सिद्धिद्वारा श्री परमेश्वर प्रीतये ब्राह्मविधिना पितृदत्तामिमां कन्यां विवाहयिष्ये। तत्पूर्वाङ्गतया विवाह होमकर्मणि कृताकृतावेक्षणादि ब्रह्मकर्मकर्तुं ब्रह्मणः पूजनपूर्वकं वरणं करिष्ये।

संकल्प्य दक्षिणे ब्रह्मासनमुत्तरे अन्यासनं स्थापयेत् तत्र ब्रह्मणाः उपविशेत पुनश्च भूमिदेवेमंत्रेण अर्घ्यं ब्रह्मजज्ञानंमन्त्रेण गन्धाक्षतपुष्पाणि स्वीकृत्य ब्रह्मवरणं कुर्यात् । तदनन्तरं पवित्रछेदनार्थं कुशत्रयम् पवित्रे द्वे प्रोक्षणीपात्रम् आज्यस्थालीं सम्मार्जद्वेकुशानैकम उपयमन कुशाः त्रयोदशः, समिधात्रयम्, स्रुवः आज्यं पूर्णपात्रम् दक्षिणादीन् वस्तूनि अग्नेरुतरतः स्थापयेत् । तदुपरान्त प्रणीता पात्राद् जलाहरणं कृत्वा आज्यस्थाली, सम्मार्जन कुशा, उपयनमनकुशा, समिधा, स्रुवः आज्यादीनां प्रोक्षणं कुर्यात् । तदा घृतं अग्नेः स्थापयेत् एकं अंगारं भ्रामयेत् । स्रुवं प्रतप्य सम्मार्जनं कुर्यात् । प्रोक्षणी जलेन सम्प्रेक्षण कृत्वा पवित्रम् प्रणीतायां स्थापयेत् । संस्त्रबधारणार्थं प्रोक्षणी पात्रं प्रणीतायां अग्निमध्ये संस्थाप्य निम्नस्थ देवानां ध्यानं कुर्यात् यथा–

अद्येह सवधूकोऽहं विवाहकर्मणा यक्ष्ये। तत्र प्रजापतिं, इन्द्र, अग्निं, सोमं, अग्नि, वायुं, सूर्ये, अग्नीवरुणौ, अग्नीवरुणौ, अग्नि, वरुणं सवितारं विष्णु विश्वान् (देवान्) मरुत स्वर्कान् वरुणं, 12ऋतासाहम् ऋतधामानम् अग्निं गंधर्वम्, ओषधीरप्सरसो मुदः, सꣳहितं विश्वसामानं सूर्यं गन्धर्वम्, मरीचीरप्सरस आयुवः, सुषुम्णꣳसूर्यरश्मिं चंद्रमसं गन्धर्वे, नक्षत्राण्यप्सरसो भेकुरीः, इषिरं विश्वव्यचसं वातं गन्धर्व, अपोऽप्सरस ऊर्जः, भुज्यु सुपर्णं यज्ञं गन्धर्वं, दक्षिणा अप्सरसस्तावाः, प्रजापतिं विश्वकर्माणं मनो गन्धर्व, ऋक्सामान्यप्सरस एष्टीः, 12–चित्तं, चित्तिम्, आकूतं, आकूतिम्, विज्ञातं, विज्ञातिं, मन, शक्वरीः, दर्शं, पौर्णमासं, वृहत्, रथन्तरं, प्रजापतिं, 13–अग्निं भूतानाधिपतिम्, इन्द्रं ज्येष्ठानामधिपतिम्, यमं पृथिव्या अधिपतिं, वायुमन्तरिक्षस्याधिपतिं, सूर्य दिवोधिपतिं, चंद्रमसं नक्षत्राणामधिपतिं, बृहस्पतिं ब्रह्मणोऽधिपतिं, मित्र सत्यानामधिपतिं, वरुणमपामधिपतिं, समुद्र स्रोत्यानामधिपतिं, अन्नꣳसाम्राज्यानामधिपतिं सोममोषधीनामधि, सवितारं प्रसवानामधिपतिं, रुद्रं पशुनामधिपतिं, त्वष्टार रूपाणामधिपतिं, विष्णु पर्वतानामधिपतिं, मरुतो गणानामधिपतीन्, पितृन् पितामहान् परान् अवरान् ततान् ततामहान् 18 अग्निम्, अग्निम्, अग्निं, वैवस्वतम्, मृत्युं 5-चाज्येनाहं यक्ष्ये ।

तदन्तरं कन्या देवताभिध्यानं कुर्यात् ।

अर्यमणं, अग्निं, अग्निं, अर्यमणं, अग्निं, अग्निं, अर्यमणं, अग्निं, अग्निं, भगं 10 च लाजैरहं लक्ष्ये ।

वरः पुनः अभिध्यानं कुर्यात् ।

प्रजापतिं, अग्नि स्विष्टकृतं, चाज्येनाहं यक्ष्ये।

तदनन्तरं पूर्वस्थापितं अग्नि प्रज्वलितं च कुर्यात् ।

'ॐ एतन्ते ॐ भूर्भुवः स्वः योजकनामाग्ने सुप्रतिष्ठितो वरदो भव। तदनन्तरं देशानुसारं दक्षिणां दद्यात् ।

अथ राष्ट्रभृतहोमः

ऋताषाऽिति प्रजापति र्ऋषि यर्जुछन्दः ऋताषाड्ृतधर्ग्रिर्गन्धर्वो देवता होमे विनियोगः। ॐ ऋताषाततधामाऽग्निर्गन्धर्वः स न इदं ब्रह्मक्षत्रं पातुतस्मै स्वाहा वाट् । इदमृतासाहे ऋतधाम्नेऽग्नये गन्धर्वाय न मम। पुनः ऋताषाडिति प्रजापतिर्ऋषिर्यजुश्छन्दः औषधयोऽप्सरसो मुदो देवताः होमे विनियोगः। ॐ ऋताषाड्ृततधामाऽग्निर्गन्धर्वस्तस्यैः पधयोऽ्सरसो मुदो नाम ताभ्य; स्वाहा । इदमोषध्यिोऽप्सरोभ्यो मुद्भ्यो न मम । सहित इति प्रजापतिर्ऋषियर्जुश्छन्दः सहितोविश्वतामा सूर्यो गन्धर्वो देवता होमे विनियोगः। ॐ सहितो विश्वसामा सूर्यो गन्धर्व; स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदं हिताय विश्वसप्ताम्ने सूर्याय गन्धर्वाय न मम। पुनः सहित इति प्रजापतिर्ऋषिर्युजु श्छन्दः मरीचयोप्सरसऽआयुवो देवताः होमे विनियोगः। ॐ सहितो विश्वसामासूर्योगन्धर्ईस्ततस्यमरीचयोप्सरस आयुवो नाम ताभ्यः स्वाहा। इदं मरीचिम्भोप्सरोभ्य आयुभ्यो न मम। सुषुम्णा इति प्रजापतिर्ऋषिर्यजुश्छन्द सुषुम्णः सूर्यरर्श्मिश्चन्द्रमागन्धर्वो देव्नता होमे विनियोगः। ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्। इद सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय न मम। पुन सुषुम्णः इति प्रजापतिर्ऋषिर्यजुरश्छन्दः नक्षत्रा रायप्सरसो भेकुरयो देवता होमे विनियोगछ। ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा। इदं नक्षत्रेभ्योप्सरोभ्यो भेकुरिभ्यो न मम। इषिर इति प्रजापतिर्ऋषिर्यजुश्छन्द; इषरो विश्वव्यचावातो गन्धर्वो देवता हो विनियोगः। ॐ इषिरो विस्वव्यचा वातो गन्धवाः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदमिषिराय विश्वव्यचसे वाताय गन्धर्वाय न मम। मुपरिषिर इति प्रजापतिर्ऋषिर्यजुरश्छन्दः आपोप्सरस ऊर्जो देवताः होमे विनियोगः। ॐ इषिरो विश्वव्यचावातो गन्धर्वस्तस्यापोऽप्सरस उर्जो नाम ताभ्य; स्वाहा। इदमद्भ्योप्सरोभ्य अभ्यों न मम। भुज्युरिति प्रजापतिर्ऋपिर्यजुश्छन्दः भुज्युः सुपर्णो यज्ञो गंधर्वो देवता होमे, विनियोगः। ॐ भुज्यु सुपर्णोयज्ञो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्। इदं भुज्यवे सुपर्णाय यज्ञाय गन्धर्ऽाय न मम। पुनः भुज्युरिति प्रजापतिर्ऋषिर्यजुरछनदो दक्षिणा अप्सरसस्तावादेवता होमे विनियोगः। ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वतस्य दक्षिणा अप्परस्तावा नाम ताभ्यः स्वाहा इदं दक्षिणाभ्योप्सरोभ्यस्तावाभ्यो न मम । प्रजापतिरितिर्ऋषिर्यजुश्छन्दः प्रजापतिविंश्वकर्मा मनो गन्धर्वो देवता होमे विनियोगः। ॐ प्रजापतिर्विश्वकर्मा मनो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् । इदं प्रजापतये विश्वकर्मणे मनसे गन्धर्वाय न मम। पुनः प्रजापतिरिति प्रजापति र्ऋषिर्यजुरश्छन्द; ऋवसामान्प्सरस

एष्टयो देवता होमे विनियोग। ॐ प्रजापतिर्ऽिश्वकर्मा मनो गन्धर्वस्तस्य ऋवसामान्यप्सरस एष्टयो। नाम ताभ्यः स्वाहा इदमृक् सोमेभ्यो रोभ्य एष्टिभ्यो न नम ।।12।।

दक्षिणादानम्

अद्येह अमुकशर्मा सवधूकोऽहं कृतैतद्राष्ट्रभृद्धोमस्य साङ्गफलप्राप्तये साद्गुण्यार्थं च इमां दक्षिणां आचार्य ब्रह्मभ्यां विभज्य दास्ये ॐ तत्सत् ।।

मन्त्रपाठः

गन्धर्वाप्सरसश्चैव प्रयच्छन्तु यशः श्रियम् । दीर्घायुर्धनमारोग्यमुभयोः स्त्रीकुमारयोः।।

इति राष्ट्रभृद्धोमः

अथ जय होमः

चित्तं चेत्यादीनां द्वादशमन्त्राणां परमेष्ठीऋषिर्यजूंषि चित्तादयो मन्त्राम्नाता देवता प्रतिमंत्रं होमे विनियोगः।

ॐ चित्तं स्वाहा । इदं चित्ताय न मम 1 ॐ चितिश्च स्वाहा । इदं चित्यै न मम 2 ॐ आकूतं च स्वाहा । इदमाकूताय न मम 3 आकूतिश्च स्वाहा । इदमाकूत्यै न मम 4 ॐ विज्ञातं च स्वाहा । इदं विज्ञाताय न मम 5 ॐ विज्ञातिश्च स्वाहा । इदं विज्ञातये न मम 6 ॐ मनैश्च स्वाहा । इदं मनसे न मम 6 ॐ शक्वरीश्च स्वाहा । इदं शक्वरीभ्यो न मम 8 ॐ दर्शश्च स्वाहा । इदं दर्शाय न मम ॐ पौर्णमासं च स्वाहा । इदं पौर्णमासाय न मम 10 बृहच्च स्वाहा। इदं बृहते न मम 11 ॐ रथन्तरं च स्वाहा । इदं रथन्तराय न मम 12।

प्रजापतिरिति मन्त्रस्य परमेष्ठीऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता जयहोमे विनियोगः।

ॐ प्रजापतिर्ज्जयानिद्राय वृष्णो प्रायच्छदुग्रः पृतनाजयेषु। तस्मै विशः समनमन्त सर्वाः सऽउग्रः स ऽइ हव्यो बभूव स्वाहा । इदं प्रजापतये न मम 13 उदक स्पर्शः।।

दक्षिणाप्रदानम्

अद्येह अमुकशर्म्मासवधूकोऽहं चित्तादिजयहोमकर्म्मणः साङ्गफलप्राप्तये साद्गुण्यार्थं च इमां दक्षिणां आचार्य ब्रह्मभ्यां विभज्य दास्ये ॐ तत्सत् न मम ।

मन्त्रपाठः

चैरञ्जीव्यं महातेजश्चित्ताद्याश्च दिवौकसः। प्रयच्छन्तु करे वाञ्छामुभयोः स्त्रीकुमारयोः।।

।। इति जय होमः।।

अथाभ्यातान होमः

अग्निर्भूतानामधिपतिरित्यादीनां पितरः पितामहा इत्यन्तानामष्टादश मंत्राणां प्रजापतिर्ऋषिः पंक्तिश्छन्दो मन्त्रास्नाता अग्न्यादिदेवताः प्रतिमन्त्रं होमे विनियोगः ।

ॐ अग्निर्भूतानामधिपतिः स मा ऽवत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याऀस्वाहा ।

इदम् अग्नये भूतानामधिपतेय न मम 1

ॐ इन्द्रो ज्येष्ठानामधिपतिः समा.।

इदम् इन्द्राय ज्येष्ठानमधिपतये न मस 2

ॐ यमः पृथिव्या ऽअधिपति स मा.

इदं यमाय पथिव्या अधिपतये न मंम 3 पित्र्यत्वादुदकस्पर्शः ।

ॐ वायुरन्तरिक्षस्याधिपतिः स मा.। इदं वायवे ऽन्तरिक्षस्याधिपतये न मम 4

ॐ सूर्यो दिवोऽधिपतिः स मा. । इदं सूर्याय दिवोधिपतये न मम ॥5॥

ॐ चन्द्रमा नक्षत्राणामधिपतिः स मा.

इदं चन्द्रमसे नक्षत्राणामधिपतये न मम 6

ॐ बृहस्पतिर्ब्रह्मणोऽधिपतिः स मा.

इदं बृहस्पतये ब्रह्मणोऽधिपतये न मम 7

ॐ मित्रः सत्यनामधिपतिः स मा.।

इदं मित्राय सत्यानामधिपतये न मम 8·

ॐ वरुणोऽअपामधिपतिः स मा. इदं वरुणयापामधिपतये न मम ॥9॥

ॐ समुद्रः स्त्रोत्यानामधिपतिः स मा.।

इद समुद्राय स्त्रोत्यानामधिपतये न मम

ॐ अन्नऀसाम्राज्यनामधिपति तन्मा.

इदमन्नाय साम्राज्यानामधि पतये न मम

ॐ सोमऽऔषधीनामधिपतिः स मा.

इद सोमायौषधीनापधिपतये न मम 12

ॐ सविता प्रसवानामधिपतिः स मा.

इदऀसवित्रे प्रसवानामधिपतेय न मम 13

ॐ रुद्रः पशूनामधिपतिः स मा.।

इदऀरुद्राय पशूनाधिपतये न मम 14

प्रणीतोदकस्पर्शः ।

ॐ त्वष्टारूपाणामधिपतिः स मा.।

इदं त्वष्ट्रे रूपाणामधिपतये नमनः ॥15॥

ॐ विष्णुः पर्वतानामधिपतिः स. मा. ।

इदं विष्णवे पर्वातानामधिपतये न मम ।

ॐ मरुतो गणनामधिपतस्ते माऽवन्त्वस्मिन्. इदं मरुद्भ्यो गणानामधिपतिभ्यो न मम ॥17॥

ॐ पितरः पितामहाः परे ऽवेरे ततासपितामहाः । इह मा वन्त्वविस्मन्नब्रह्मण्य-स्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहत्याᳪस्वाहा इदं पितृभ्यः पितामहेभ्यः परेभ्यो ऽवरेभ्यः ततेभ्यस्ततामहेभ्योन मम॥18॥ प्रणीतोदकस्पर्शः॥

अद्येहेत्यादि अमुकशर्मासवधूकोऽहमभ्यातानहोमस्य साङ्गफल प्राप्तये साद्गुण्यार्थ च इमां दक्षिणां आचार्यब्रह्मभ्यां विभज्य दास्ये। ततः अनेन मंत्रेण आशीर्वादं दद्यात्

अथ आशीर्वादः

उत्सर्गे च तुरीये च प्रयच्छन्नत्वनलादयः । पुत्रान् लक्ष्मीं तथा कामानुभयो; स्त्रीकुमारयोः॥

अथ अग्न्यादि पञ्चकहोमः

अग्निरैत्वित्यादीनां चतुर्णा मन्त्राणां प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवता आज्यहोमे विनियोगः।

ॐ अग्निरैतु प्रथमो देवतानाᳪसोस्यै प्रजां मुंचतु मृत्युपाशात् तदयᳪराजा वरुणोनुमन्यतां यथेयᳪस्त्री पौत्रमघननरोदात्स्वाहा। इद मग्नये न मम ॥1॥

ॐ इमामग्निस्त्रायतां गार्हपत्यःᳪप्रजामस्यै नयतु दीर्घमायुः । अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुद्धय तामियᳪस्वाहा । इदमग्नये न मम। ओं स्वस्ति नोऽग्ने दिव आपृथिव्या विश्वानि धेह्ययथाय जत्र। यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रंᳪस्वाहा। इदमग्नये न मम ॥3॥

ॐ सुगं नु पन्थाम्प्रदिशन्न एहि ज्योतिष्मद्धेह्यजरन्न आयुः। अपैतु मृत्युरमृतन्न आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहा । इदम् वैवस्वताय न मम ॥4॥

मृत्योः आहुति मन्त्राः

परममृत्यविति संकसुकऋषिस्त्रिष्टुप्छन्दो मृत्युर्देवता होमे विनियोगः।

ओं परं मृत्योअनुपरेहि पन्थां यस्ते अन्य इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजा रीरिषो मोत वीरान् स्वाहा इदं मृत्यवे न मम ॥5॥

अथ सङ्कल्पः

अद्येह अमुकशर्मा सवधूकोहं कृतैतदग्न्यादि पञ्चहोमस्य सांगफलप्राप्तये साद्गुण्यार्थं च इमां दक्षिणां आचार्य ब्रह्माभ्यां विभज्य दास्ये। ॐ तत्सत् न मम ।।"

दक्षिणाप्राप्तिरन्तरं आचार्यः ब्रह्मा च निम्नलिखित मन्त्रेण आशीर्वादं ददाति। यथा–
"गोविन्दो गोकुले तिष्ठन्गोपीभिर्विहरन्सह । तुष्टिपुष्टिकरो नित्यमुभयोः स्त्री कुमारयोः ।।"

लाजाहोमः पाणिग्रहणम् च

तदनन्तरं कुमारी. कन्या हस्तं शूर्पाकृतिं कृत्वा अज्जलि मध्ये लाजां स्थापयेत् । कन्यायाः भ्राता लाजान् घृताभिधारितेन प्रोक्षितेन यज्ञपात्रे चर्तुषु भागेषु विभज्येत् । तेषु एकं भागं कुमार्याः अज्जलि मध्ये स्थापयेत् तदा कुमारी पूर्वाभिमुखो भूत्वा मन्त्रं पठित्वा लाजान् अग्निमध्ये पातयेत् यथा–

"ॐ अर्यमणं देवं कन्याऽअग्निमयक्षत ।
सनो अर्य्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा ।
इदमर्य्यम्णे न मम ।।"

पुन कुमारी अञ्जलिस्थितान् लाजान् अर्द्धभागं निम्नस्थ मन्त्रपूर्वकं वामभागे पार्श्वद्वारा अग्नि मध्ये क्षिपेत्–यथा–"ॐ इयं नार्युपब्रूते लाजावपन्तिका। आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा। इदमग्नये न मम ।।"

मन्त्रोच्चारणपूर्वकं तृतीय वारं सर्वान् लाजान् अग्नौ क्षिपेत् यथा–

"ॐ इमाँल्लाजानवपाम्यग्नौ समृद्धिकरणं तव ।
मम तुभ्यञ्च संवननं तदग्निरनुमन्यतामिय स्वाहा । इदमग्नये न मम ।।"

तदनन्तरं वरः वधूः अगुष्ठसहितं दक्षिण हस्तग्रहणं कृत्वा पाणिग्रहणस्य मन्त्रचतुष्टयं स्वयं पठेत् यथा–

"ॐ गृम्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः। भगो अर्य्यमा सविता पुरन्धिर्मह्यन्त्वादुर्गार्हपत्याय देवाः ।।

अमोहमस्मि सा त्व सा त्वमस्यमो अहम् ।
सामाहस्मिन ऋक् त्वंद्यौरहं पृथिवी त्वम् ॥
तावेब विवहावहै सह रेतो दधावहै।
प्रजां प्रजनयावहै पुत्रान्विदावहै बहून् ॥

ते सन्तु जरदष्टयः संप्रियो रोचिष्णू सुमनस्यमानौ पश्येम शरदः शतं जीवेम शरदः शतꣳश्रृणुयाम शरदः शतम् ॥

तदनन्तरं वरः अग्नेरुत्तरतः स्थितं पाषाणोपरिस्वदक्षिण हस्तेन वधूः. दक्षिण पादं ग्रहणं कृत्वा स्थापयेत् । मन्त्रं पठेत् यत्–

"ॐ आरोहेममश्मानमश्मेव त्वꣳस्थिरा भव
अभितिष्ठ पृतन्यतोऽव बाधस्व पृतनायंतः ॥"

तदनन्तरं वरः वधोः मस्तके हस्तं दत्वा वैदिकगाथामिमां वाचयेत् यत्–

"ॐ सरस्वती प्रेदमव सुभगे वाजिनीवति यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः।। यस्या भूतꣳसमभवद्यस्यां विश्वमिदं जगत्। तामद्यगाथां गास्यामिया स्त्रीणामुत्तमं यशः ।।

गाथा गानोपरान्तं वरमेव वधूं अग्रे कृत्वा निम्नस्थ मन्त्रोच्चारपूर्वकं अग्निः प्रदक्षिणां कुर्यात्–तद्यथा–

"ॐ तुभ्यमग्रे पर्य्यवहन्त्सूर्यां वहतु ना सह ।
पुनः पतिभ्यो जायां दाऽग्ने प्रजया सह ।।"

चतुर्थ परिक्रमात् पूर्वं कुमार्याः भ्राताशर्पस्य मध्ये स्थितान् सर्वान् लाजन् कुमार्याः अजलि मध्ये ददाति। कुमारी तान् लाजान् समन्त्रकं अग्नौ क्षिपति यथा–"ॐ भगाय स्वाहा ॐ इदं भगाय न मम ।।"

चतुर्थ परिक्रमां कृत्वा वर वधू स्वस्थाने उपविशेत् । तदा वरः ब्रह्मणा अन्वारब्धः सन् "प्रजापतये स्वाहा" इत्येतेन प्रजापतिं आहुति दत्वा स्रुवे शेषघृतं प्रोक्षणीपात्रे आदाय वधूम् कथयति–"सप्तपदानि प्रक्रमस्व इति। तदा कन्या उत्तरं दिशायाम् सप्तपदं गच्छेत्। वरः दक्षिण पस्थापनपर्यन्तं सप्त मन्त्रान् पठेत् । तद्यथा–

"एकमिषेत्यादीनां सप्तानां मन्त्राणां प्रजापतिऋषि र्यजुश्छन्दः लिङ्गोक्ता देवता सप्तपदीप्रक्रमणे विनियोगः । एकमिषे विष्णुस्त्वा नयतु ।।1।।

धनं धान्यञ्च मिष्टान्नं व्यञ्जनाद्यं च यद्गृहे । मद्धीनञ्च कर्त्तव्यं वधूराद्ये पदे वदेत् ।

द्वे ऊर्जे विष्णुस्त्वा नयतु ।।2।।
वधू–कुटम्बं प्रथयिष्यामि ते सदामञ्जुभाषिणी ।
दुःखे धीरा सुखे हृष्टा द्वितीये साब्रवीदिदम् ।।
"त्रीणि रायस्पोषाय विष्णुस्त्वा नयतु ।।3।।
ऋतौ काले शुचिः स्नाता क्रीडयामि त्वया सह ।
नाहं परपतिं यायां तृतीये साब्रवीद् वरम् ।।
चत्वारि मयोभवाय विष्णुस्त्वया नयतु ।।4।।
लालयामि च केशान्तं गन्धमाल्यानुलेपनैः ।
काञ्चनैर्भूषणैस्तुभ्यं तुरीये साब्रवीद् वरम् ।।
पञ्च पशुभ्यो विष्णुस्त्वा नयतु ।।5।।
सखी परिवृता नित्यं गौर्याराधन तत्परा ।
त्वयि भक्ता भविष्यामि पंचमे साब्रवीद् वरम् ।।

षड् ऋतुभ्यो विष्णुस्त्वा नयतु ॥6॥

यज्ञे होमे च दानादौ भवेयं तव वामतः ।

यत्र त्वं तत्र तिष्ठामि पदे षष्ठेऽब्रवीदिदम् ॥

सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयतु ॥7॥

तदनन्तरं वरः द्विज स्कन्धोस्थितं कुम्भेन जलं आम्रपल्लवद्वारा वधूः मस्तकें अभिषिंचयेत्। तद्यथा–

"ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम्।।

आपोहिष्ठा मयोभुवस्ता न ऊर्जे दधातन ।

महे रणाय चक्षसे ॥

यो वः शिवतमो रसस्तस्य भाजयतेहनः उशतीरिव मातरः।

तस्माअरङ्गमामवोयस्य क्षयाय जिन्वथ ।

आपो जन यथा च नः ॥

तदुपरान्तं वर वधूं सूर्यदर्शनं कारयेत् तदर्थं मन्त्राः–

ॐ तच्चचक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरद; शतॅं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ।।

तत्पश्चात् वरः स्वदक्षिण हस्तेन वधूः हृदयस्पर्शं कुर्यात् तदर्थं मन्त्रः यथा–

ॐ मम व्रते ते हृदयं दधामि मम चित्त मनुचित्तंतेऽ अस्तु। मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम् ।।"

तदनन्तरं शिष्टाचारानुसारं वरःपत्न्याः वामाङ्गे उपाविश्य वधूं दृष्ट्वा अभिमन्त्रणं (मस्तकस्पर्शं, सुमङ्गलीकरणम सिन्दूरदानम) कुर्यात् । वृद्धा स्त्रियः "सौभाग्यमस्तु-शुभं भवतु' इति आशीर्वादं दद्युः । तदर्थं मन्त्रोऽयम्–

"सुमङ्गलीरियं वधूरिमाॅं समेत पश्यत ।

सौभाग्यमस्यै दत्वा याथास्तं विपरेत् न ॥

तदनन्तरं वरः वधूं कक्षे नीत्वा गच्छेत् मन्त्रमपि पठेत् यत्–

"ॐ इह गावो निषीदन्त्विहाश्वाऽइह पूरुषाः ।

इहो सहस्त्रदक्षिणो यज्ञऽइह पूषा निषीदतु इति ॥"

तदुपरान्त वधूः वरस्य पादप्रक्षालनं, तिलकं, दधिगुड़ प्राशनं कारयति। पुनश्च लोकाचारानुसार ब्रह्मणः अन्वारम्भकरणे सति ब्राह्मणः दक्षिणा पूर्णपात्रं च दद्यात् । इति

।। विवाह संस्कारः ।।

चतुर्थी कर्म

विवाहस्य उपरान्तं चतुर्थे दिवसे अर्धरात्र्यां सूर्यादयात् पूर्वं पर वधूः स्नानं कृत्वा अलंकृतः सन् पूर्वाभिमुखं वरस्य दक्षिणभागे वधू उपविशेत। तदनन्तरं वरः स्वस्तिवाचनपूर्वकं संकल्प्य गणेशपूजनं कृत्वा प्रधान संकल्पं कुर्यात् ।

"अद्येह अमुकोऽहं ममास्या वध्वा; सोमाद्युपभुक्ति दोषपरिहृत्यै विवाहांग चतुर्थीकर्म करिष्ये। तत्रादौ समाचारात् पूर्वांग दिवसे स्थापितानां गणपति सहित गौर्यादि षोडशमातृणां पूजनं करिष्ये। इति संकल्प्य मातृपूजनं वसोर्धारा पातनं, पुण्याहवाचनं कारयित्वा पंचभूसंस्कारपूर्वकं विवाहाग्नि स्थापनं कृत्वा वेद्या ईशानकोणे स्थापित कलशोपरि ग्रहाणां आवाहनं पूजनपूर्वकं ब्रह्मवरणम् कुर्यात्। तदन्तरं प्रणीता स्थापनाद् पर्युक्षणान्त कुशकण्डिकां कृत्वा देवताभिध्यानं कुर्यात् यत्–

अद्येह वध्वाः सोमाद्युपभुक्तिदोषपरिहारार्थं चतुर्थीकर्मणा यक्ष्ये। तत्र प्रजापतिम्, इन्द्रम, अग्निं, सोमम् अग्निम् वायुं, सूर्यम्, चन्द्रं, गन्धर्व च आज्येन प्रजापतिं चरुणा-अग्नि स्विष्टकृतं चर्वाज्येन–अग्निं, वायुं, सूर्यं अग्नीवरुणौ, अग्नीवरुौ, अग्निं, वरुण सवितारं विष्णुं विश्वान् (देवान्) मरुतः स्वर्कान्,. वरुणं प्रजापतिश्चाज्येनाहं यक्ष्ये।। देवताभिध्यानात् पश्चात् शिखी नामक अंग्नेः प्रतिष्ठापनं कुर्यात्–"एतन्ते" ॐ भूर्भुवः स्व; शिखिनामाग्ने इहागच्छेह तिष्ठ सुंप्रतिष्ठितो वरदो भव।

सुप्रतिष्ठानन्तरं 'ॐ चत्वारिशृङ्गादि मन्त्रेण ध्यानं नीरजनान्तपूजनं रेखापूजनं जिह्वा पूजनं कृत्वा ब्रह्मणः अन्वारब्धः सन् आघारादि आहुतिं दद्यात् । यथा–

"ॐ प्रजापतये स्वाहा । इदं प्रजापते न मम ।
ॐ इन्द्राय स्वाहा । इन्दमिन्द्राय न मम ।
ॐ अग्नये स्वाहा । इदग्नये न मम ।
ॐ सोमाय स्वाहा । इदं सोमाय न मम ।"

अन्वारम्भं त्यक्त्वा घृतेन प्रधान होमः कुर्यात् -

अग्ने प्रायश्चित इत्यादीनां पञ्चानां मन्त्राणां परमेष्ठी ऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवता चतुर्थीकर्माङ्गाज्यहो मे विनियोगः । ॐ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै प्रतिघ्नीतनूस्तामस्यै नाशय स्वाहा 1 इदमग्नये न मम। ॐ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै प्रजाघ्नी तनूस्तामस्यै नाशाय स्वाहा 2। इदं वायवे न मम। ॐ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा 3। इद सूर्याय न मम । ॐ चन्द्रप्रायश्छित्ते त्वं देवानां प्रायश्चितत्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि

या ऽस्यै गृघग्री तनूस्तामस्यै नाशय स्वाहा ॥4॥ इदं चन्द्राय न मम। ॐ गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मस्त्वा नाथकाम उपधावामि या ऽस्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहा ॥5॥ इदं गन्धर्वाय न मम। घृतेन हवनं कृत्वा स्थालीपाके घृतं दत्वा स्रुवेण मनसा ध्यानपूर्वकं प्रजापतेः हवनं कुर्यात् – ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम। ॐ यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितं। वेदाहं तन्मं तद्विद्यात्पश्येम शरदः शतं जीवेम शरद; शत शृणुयाम शरदः शतम्। तदनन्तरं आचारानुसारं कलशस्य त्रिवारं प्रदक्षिणां कुर्यात। नवीन कंटकेन, वध्यूः ग्रन्थिबधनम् कंकणं च मोचयेत्।

कंकणमोचन मन्त्र :

कंकण मोचयाम्यद्य रक्षोघ्नं रक्षणं मम। मयि रक्षां स्थितं कृत्वा स्वस्थानं गच्छ कंकण।

तदनन्तरं. पाणिप्रतपनपूर्वकं मुखमार्जनं, अङ्गाप्यायनं, उत्तराङ्ग अग्नि पूजनं, होम दक्षिणाया संकल्पं कुर्यात्।

अद्येह अमुकशर्मा सपत्नीकोऽहं कृतस्यास्य चतुर्थीकर्मः साङ्गतासिद्ध्यर्थ इमां होमदक्षिणां आचार्याय भूयसीं चान्येभ्यो ब्राह्मणेभ्यश्च विभज्य दास्ये ॐ तत्सत् न ममं।

तदनन्तरं ब्राह्मणभोजनं संकल्प भूयसीं दत्वा अग्निविसर्जनं, त्यायुषं, रक्षाबन्धनं, घृतच्छादर्शनम्, अभिषेकः तिलकं, मन्त्रपाठः आशीग्रहणं, आचमनं कृत्वा 'यस्य स्मृत्या ॐ अच्युताय नमः इत्यस्य त्रिवारं उच्चारणं कृत्वा द्विजान् प्रणमेत्। आकृष्णेन रजसा इति मन्त्रेण सूर्यं प्रणमेत्। तदा गृहं प्रविश्य मित्रैः सह सुखपूर्वकं विहरेत्।

।। इति चतुर्थी कर्मः।।

संदर्भ-ग्रन्थ

1. सुश्रुत शा.अ. 2
2. मनु. 3/45
3. सुश्रुत शा.अ. 2
4. व्यासस्मृतौ
5. मनु. 3/45
6. सुश्रुतः
7. सुश्रुत शा.अ. 3
8. चरक शा.अ. 4
9. सुश्रुत शा.अ. 1
10. पद्मपुराणम्
11. शु.य.सं.- 40/2

12. पा.गृ.सू. - 1/11
13. शु.य.सं.- 13/41
14. ऋ.सं.- 8/2/2
15. ऋ.सं.- 8/8/42
16. शु.य.सं.- 1/27
17. शु. य.सं.- 19/76
18. पारस्करः
19. पा.गृ.सू.- 1/14
20. सुश्रुत-2 शा.अ.-2
21. शु.य.सं.- 13/4
22. शु.य.सं.- 31/17
23. शु.य.सं.- 2/12
24. शु.य.सं.- 12/4
25. मनुः
26. पा.गृ.सू.- 6/1/17
27. शु.य.सं.- 36/24
28. शु.य.सं.- 2/12
29. विष्णुधर्मोत्तरे
30. शु.य.सं.- 33/43
31. शु.य.सं.- 36/24
32. पारस्करगृह्यसूत्रे
33. गदाधरः
34. सुश्रुतः
35. शु.य.सं.- 2/12
36. शु.य.सं.- 17/91
37. शु.य.सं.- 7/43
38. पारस्करगृह्यसूत्रे
39. जैमिनीः
40. मनुः
41. तत्रैव
42. मनुः 2/27
43. श.ब्रा.
44. पारस्करः
45. पारस्कर गृह्यसूत्रम्
46. यजुर्वेदः

47. सं.सं. विधिः
48. शु.य.- 3/60
49. शु.य.- 11/50
50. ऋग्वेदः
51. यजुर्वेदः
52. पारस्करः
53. " "
54. शु.य.- 11/50
55. शु.य.सं.- 36/16
56. शु.य.सं.
57. पारस्करः
58. पा. गृ. सूत्र कां 1 कं. 1.

चतुर्थोऽध्यायः

अथ षड्गशतरुद्रियः

सहस्तोमाः सहछन्दसऽआवृत्तः सह प्रमाऽ ऋष्यः सप्तदेव्याः ।
पूर्व्वेषां पन्थामनुदृश्य धीराऽ अन्वालेभिरेरथ्यो न रश्मीन् ॥1॥

(34/49

उवट भाष्य—सहस्तोमाः । ऋषि सृष्टि प्रतिपादिका। त्रिष्टुप् । सहस्तोमा स्तोमसहिताः। सहछन्दसः छन्दः सहिता आवृतः। आवृच्छब्देन कर्माभिधीयते। श्रद्धा सत्य प्रधानानां कर्मणआमनुष्ठातारः। सहप्रमाः प्रमाणं प्रमा। शब्दप्रमाणपरीक्षण तत्पराः ऋषयः सप्त। सप्तऋषय इति प्राप्ते व्यत्ययः । भरद्वाज कश्यप गौतमात्रिविश्वामित्रजगदग्निवसिष्ठाः। दैव्याः प्रजापते प्राणाभिमानिनः एते अभिव्यज्यमानाः । पूर्वेषां अधस्तनकल्पोत्पन्नानां अवसिताधिकारणाम् । पन्थां पन्थानम् । अनुदृश्य अवलोक्य। धीराः अन्वालेभिरे अन्वालभन्तः सृष्टवन्तः सृष्टियज्ञम्। कथमिव। रथ्यो न रश्मीन् रथे साधुः रथ्यः सारथिः। नकार उपमार्थीयः । यथा सारथिरिष्टदेश प्राप्त्यर्थं प्रथममश्वरश्मीनालभते स्पृशति एवं तेऽपि सृष्टियज्ञं सृष्टवन्तः ।

शा.भा- अयं मन्त्रः ऋषिसृष्टिप्रतिपादकस्त्रिष्टुप् । सप्त ऋषयः भारद्वाजविश्वामित्र-कश्यपगौतमा-त्रिजमदग्निवसिष्ठा पूर्वेषां कल्पान्तराधिकारिणां पन्थां[1] पन्थानम् अनुदृश्य-अवलोक्य अन्वालेभिरे-अन्वारभन्त सृष्टिं कृतचवन्तः। ऋषयः किम्भूताः? सहस्तोमाः स्तोमसहिताः कारणस्तोमसहिताः। सहछन्दसः छन्द;सहिताः। आधृतः आवृच्छब्देन कर्मोच्यते। श्रद्धासत्यप्रधानानां कर्म्मणामनुष्ठातार इत्यर्थः। सहप्रमाः प्रमाणं प्रमा तया सहिताः प्रमाणपरीक्षकाः। धीरा धीमन्त इत्यर्थः। दैव्याः[2] फ्रजापतिप्राणाभिमनिनः । कथमित्यन्वलाभिरे? रथ्यो न रश्मीन्। रथे साधुः रथ्यः सारथिः । नकार उपमार्थीयः। तथा च यथा सारथि इष्टदेशाप्राप्त्यथरम् अश्वनियमानाय रश्मीन् प्रग्रहान् आलभते, एवं तेऽपि सृष्टियज्ञं सृष्टवन्त इत्यर्थः ।।1।।

शिव संकल्प सूक्त

शतरुद्रियस्य प्रथमाध्याये शिव-संकल्पं-सूक्तं वर्णितं विद्यते। सूक्तेऽस्मिन् यन्मदीयं मनः तत् परमेश्वरात् श्रीरुद्र प्रसादात् शान्त-संकल्पमस्तु इति प्रार्थ्यते। इत्यत्र "यान्येकादशेन्द्रियाणि" तेषु मनः चञ्चलम् । परमात्मनि तावदवधानं सुस्थिरं भवेत्, यावन्मनसो निग्रहः न स्यात् । "मन एव मनुष्याणां कारणं बन्ध मोक्षयोः इति बिन्दूप-निषद् वचनाद्गम्यते यत् बन्ध-मोक्षयोःमूलं

कारणं मन एव। यदि जगत्यस्मित् मनसः प्रभावात् प्राणिनः सांसारिकेषु पदार्थेषु मनसः मोहं जनयन्ति, प्राप्तये च सर्वविधोपायं कुर्वन्ति, तदा सांसारिकात् बन्धनादविनिर्मुक्ताः एव जायन्ते। पुनः पुनः जन्म गृहीत्वा ते जागतिक कष्टमनुभवन्तीति। अतएवः मनसः निग्रहः अपरिहार्य एव विमुक्तये। एतदर्थमस्माकम् ऋषयः प्रार्थयन्ति-

"तन्मे मनः शिव संकल्पमस्तु।"

यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तुस्य तथैवेति ।

दुरङ्गमञ्ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥1॥

उबटभाष्य—यज्जाग्रतः षट्कण्डिकास्त्रिष्टुभो मनोदेवत्याः। अस्मिन्नध्याये लैङ्गिको विनियोगः। लिङ्गम् च सामर्थ्यमुच्यते अभिधानशक्तिः । यन्मनः जाग्रतः पुरुषस्य दूरं उदैति उद्गच्छति चक्षुः प्रभृतीन्यपेक्ष्य। यच्च दैवम् देवो विज्ञानात्मा सोमेन गृह्यत इति दैवम् । उक्तं च "मनसैवानुद्रष्टव्यमेतदप्रमयं ध्रुवमिति। तदु सुप्तस्य। तदः स्थाने यदोवृत्तिः। उकारः समुच्चयार्थीयः। यच्च दूरगमं दूरं गच्छतीति दूरंगमम् अतीतानागवर्तमान व्यवहित विप्रकृष्टग्रहीतृ। ज्योतिषां श्रोत्रादीनां विज्ञाननेतृणां मध्य एकमेव ज्योतिः। तत् मे मनः शिव संकल्पम् । संकल्प काममूल पदार्थस्य स्त्र्यादेः सरूपता ज्ञानवतः कामप्रभृति शान्तसंकल्पम् अस्तु भवतु।

श. भाष्य—"ततः शिवसङ्कल्पव्याख्या ।। तन्मनः मे मम शिवसङ्कल्पमस्तु। शिवः सङ्कल्पोऽभिलाषो यस्य तत् शिवसङ्कल्पम् । तत्किम्भूतम् ? दैवम् अद्भुतशक्तिमत् ।[3] तत्किं? यत् जाग्रतः पुरुषस्य दूरम् उदैति दूरं गच्छति नाना विषयेषु सञ्चरतामिन्द्रियाणां सहकारित्वेनेतस्तत; सञ्चारत्वादित्यभिप्रायः। उ अप्यर्थे। तन्मनः सुप्तस्य तथैव एति स्वल्पविषयमपि भवति। इन्द्रियप्रसाराभावात् । मनः किम्भूतं? ज्योतिषामिन्द्रियाणां मध्ये एकम् अद्वितीयं ज्योतिः। इन्द्रियमुख्यमित्यर्थः। तदधीनत्वात्सर्वेन्द्रियाणामिति भावः। पुनः किम्भूतम् ? दूरङ्गमम् इन्द्रियाणां मध्ये दूरगन्तृ। व्यवहिताव्यषहितविवयसाधारणत्वा-दित्यर्थः ।।2।।

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।

यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥2॥

उवट भाष्य—येन कर्माणि। येन मनसा सता कर्माणि। अपसः अप इति कर्मनाम तद्धितलोपः। अपस्विनः कर्मवतः । मनीषिणः मेधाविनः। यज्ञे कृण्वन्ति कुर्वन्ति। विदथेषु वेदनेषु यज्ञविधि विधानेषु धीराः धीमन्तः। यच्च अपूर्वम् न विद्यते पूर्व मिन्द्रियं यस्मात्तदपूर्वम्। यद्वा अपूर्वमनपरम् । यच्च यक्षं पूज्यम् । यच्च अर्न्तमध्ये प्रजानामास्ते। तन्मे मन इति व्याख्यातम् ।।

श. भाष्य—येन मनसा अपसः अपस्विनः कर्मिणो ननीषिणो यज्ञे कर्माणि कृण्वन्ति कुर्व्वन्ति 'अपस् इति कर्मनाम' (निघं. 2/1/1) । मनीषिणः मेधाविनः मनीषः किम्भूताः विदथेषु यज्ञेषु यज्ञसाधनज्ञानेषु का धीराः पण्डिताः। यत् मनः किम्भूतम् ? अपूर्वं न विद्यते

पूर्वमिन्द्रियं यस्मात् 'कारणं वा यस्य तत्, नित्यमित्यर्थः । अद्भुतं वा । पुनः किम्भूतं? यक्षं पूज्यं, भोक्तृ वा, प्रजानां प्राणिनामन्तः अन्तर्वर्त्ति, तन्मे मन इति व्याख्यातम् ।।6।।

विशेषस्तु ऋष्यादिकन्तु पूर्वकण्डिकायामेवोक्तम् । इह तु व्याख्यामात्रं प्रदश्र्यते। तद्यथा तन्मे मम मन; शिवसङ्कलपमस्तु शान्तसङ्कल्पं भवत्वित्यर्थः श्रीरुद्रप्रसादादितिशेषः। तत्किं मन इत्यपेक्षायामुच्यते येन मनसा सता धीराः धीमन्तः बुद्धिमन्तः अपसः 'अप इति कर्मनमेति निघणअटुः' अपो विद्यते येषां ते अपस्विन कर्मवन्तः सदा कर्मनिष्ठाः मनीषिणो मेघाविनो विद्वांसः विदधेषु विद्यन्ते ज्ञायन्ते तानि विदद्यानि तेषु विदधेषु यज्ञसंबकन्धेनां हविरादिपदार्थानां ज्ञानेषु सत्सु यज्ञे यजनकर्मणि कर्माणि कृणअवन्ति कुर्वन्तीत्यर्थः। सर्वेषां मनः स्वास्थ्ये सति ज्ञानोपलब्धेः कर्मप्रवृततेश्रच दर्शनात् मनः स्वास्यं विना केषान्चिदपि ज्ञानं कर्मप्रवृत्ति न संभवती ति सकललोकवेदप्रसिद्धिर्जनानुभवसिद्धिश्च दृष्टिपथमायातीत्याशयः । अतश्च 'स्वस्थे चित्ते बुद्धयः सन्चरन्ती'ति शिष्टा अपि समागनन्ति। तथा यच्च मन अपूर्वं न विद्यते पूर्वमिन्द्रियं यस्मात्तदपूर्वम् 'उद्ववर्हात्मनश्चैव मन; सदसदात्मकम्। मनसश्चाप्यङ्कारममि-मन्तारमीश्वरम् । महान्तमेव चात्मानं सर्वाणि त्रिगुणानि च। विषयाणां ग्रहीतृणि शनैः पञ्चेन्द्रियाणि च।' इति मनूक्तश्लोकाभ्यामिन्द्रियेभ्यः पूर्वं मनसः सृष्टिप्रतिपादनच्चक्षुरादीन्द्रियेभ्यः प्रागुत्पन्नमिति भावः। यच्च मन यक्षं कृष्टुं शक्तिमितिशेषः। इतरेन्द्रियाणि बहिःष्ठानि मनस्त्वन्तरिन्द्रियमित्यर्थः। तत् तादृशं मे मन; शिवसङ्कलप्मस्तु शान्तसङ्कल्पं भवत्वित्यर्थः। धीर्विद्यते येषां ते धीरा इत्यत्र रो मत्वर्थीयः। दधते श्रुतमर्थमिति धीराः ददति विद्याः शिष्येभ्यस्ते धीरा इति वा तत्र दधातेर्ददातेर्वा हलो व्यत्यनेन 'सुसूधागृधिभ्यः क्रन्' इति कन्प्रत्ययः, 'घुमास्थागापा.', 'कर्मण्यण्' इत्यग् प्रत्ययोऽनुसन्धेयः। पुर्वन्तु यास्कमतेनोक्तमिह तु क्षीरस्वामिमतेनामिहितमित्यवगन्तव्यम् । इ अपस इत्यत्र 'अस्यायामेधास्रजो विनिः' इति विनप्रत्ययः 'विन्मतोर्लुक्' इतीष्ठाभावेऽपि छान्दसो विनो लुगवगन्तव्यः। "विदधेषु" इत्यत्र 'रुदिविदिभ्यां ङित्' इति वेत्तेरौणादिकोऽथ प्रत्यये ङित्वादगुणाभावश्च। प्रत्ययोदात्तत्वेन मध्योदत्त पदं 'प्रत्ययः परश्च आद्युदात्तन्च' इति पाणित्युक्तेः। करोतेः प्रथमपुरुषबहुवचने' व्यत्ययो बहुलम्' इति विकरणव्यत्ययेन श्नुप्रत्यये शकारलोपे 'हुश्नुवोः' इति यणि कृते कृण्वन्तीति रूपम्। यक्षमित्यत्र यजतेरौणादिकः सन्प्रत्ययः 'न्रित्यादिर्नित्यम्' इत्याद्युदात्तत्वे प्राप्ते कृत्तद्धितेति प्रातिपदिकत्वात् 'प्रातिपदिकं पिट्' 'फिषोऽन्त उदात्तः' इति यक्षमित्यस्यान्तोदात्तता भवतीत्यकान्तव्यम् ।

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किंच न कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ।।3।।

उवट भाष्य–यत्प्रज्ञानम् । यत्रः प्रज्ञानं विशेषप्रतिपत्ति प्रज्ञाम् । उत अपि च। चेतः सामान्यप्रतिपत्तिचेतः। धृतिश्च प्रसिद्धा। यन्मनः अन्तर्ज्योतिरमृतं च प्रजासु। यस्मान्न ऋते येन च विना न किंचनकर्म क्रियते। तन्मे मनः इति व्याख्यातम् ।।

श. भा.—यन्मनः प्रज्ञानं प्रकृष्टं ज्ञानं यस्मात्तत् । उत समुच्चये। अपि च यत् चेतः चेतनाया; उपलब्धेर्हेतुः। धृतिश्च। यत् प्रजासु अन्तः हृदये अमृतं ज्योति सुखहेतूनां प्रकाशक, यस्मात् ऋते बिना किञ्चन कर्म न क्रियते "केनापी"ति शेषः। तन्मे मनः शिव, इति व्याख्यातम् ।।3।।

विशेषस्तु तत मे मनः शिवसङ्कल्पमस्तु शान्तसङ्कल्पं भवत्वित्यर्थः, श्रीरुद्रप्रासादादितिशेषः। तत् किं मन इत्यपेक्षायामुच्यते यत् मन; प्रज्ञानं प्रकर्षेण ज्ञायते येन तत्प्रज्ञानं प्रकृष्टज्ञानजनक मित्यर्थः उत शब्दोऽप्यर्थे। उत अपि च यन्मनः चेतः चेतयति सम्यक् ज्ञापयतीति चेतः सामान्यविशेषज्ञानजनमित्यर्थः। तथा यच्च मनः धृति, धैर्य्यस्वरूपमित्यर्थः मनस्येव धैर्य्योतपत्तेर्मनसि धैर्यमुपचर्यते। तथा 'प्रजास्यात्सन्ततौ जने' इत्यभिधानदर्शनात्प्रजासु जनेषु अन्तर्मध्ये वर्त्तमानं सत् यन्मनः ज्योतिः सर्वेन्द्रियाणां प्रवर्त्तकमित्यर्थः। 'ज्योतिषां ज्योतिः अन्तः प्रजानामिति पूर्वमुक्तत्वादिह पुनरभि धानमादरातिशयद्योतनार्थम् ।' 'अभ्यासे भूयांसमर्थ मन्यन्ते' इति यास्कोक्तेः। तथा यच्च मन अमृतम् आत्मरूपत्वादविनश्वरमित्यर्थः। तथा यस्माच्च मनसः ऋते यन्मनो विना किन्चन (चन शब्दोऽप्यर्थे) किमपि कर्म न क्रियते कैश्चिदपि नरैरितिशेषः। प्राणिमात्रस्य मनः पूर्वककर्ममात्रप्रवृत्तिमत्त्व-सद्भावत्वान्मनः स्वास्थ्यं विना कर्मामावच्च सर्वप्राणिनां प्रवर्त्तकं यन्मन इत्यर्थः। तन्मे मनः शिवसङ्कल्पमस्तु। तन्मदीयं मनो दुर्वासनारहितं सद्धार्मिकविषयकं भवत्वित्याशंसावाक्यार्थः। प्रज्ञानमित्यत्र 'ज्ञा अबबोधने' इत्यस्मात् 'करणाधिकरणयोश्चे' ति करणे ल्युट्प्रत्ययः। चेत इत्यत्र 'चिती संज्ञाने' इत्यस्मात् ण्यन्तादसुन्प्रत्ययः। 'अन्यारादितरर्तेः इत्यादिना यस्मादिति ऋते योगी पञ्चमी।'

येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम् ।
येने यज्ञस्तायते सप्तहोता तन्मे मनः शिव संकल्पमस्तु ।।4।।

उ. भाष्य—येनेदम् । येन मनसा इदं भूतं भूतकालम्, भुवनं वर्त्तमान कालं, भविष्यत् भष्यित्कालं च। परिगृहीतम् अमृतेन सर्वम् । येन च मनसा यज्ञस्तायते तन्यते। सप्त होता। सप्तहोतारो ह्यग्निष्टोमे भवन्ति। तन्मे मनः इति व्याख्यातम् ।

श. भा.—येन मनसा इदं विद्यमानं भूतमतीतं, भविष्यत् भावि च, सर्वं भुवनं लोकं परिगृहीतं आक्रान्तम् येन किम्भूतेन ? अमृतेन-नित्येन सुखहेतुना वा। येन च सप्तहोता अग्निष्टोम स्तायते विस्तार्यते। तन्मे मनः शिवसङ्कल्पमस्तु ।।4।।

तत् मे मनः शिवसङ्कल्पमस्तु श्रीरूद्रप्रसादादितिशेषछ । तत्किं मन इत्यपेक्षायाभुच्यते। अमृतेन अविनश्वरेण आत्मरूपात्वान्मुक्तिपर्य्यन्तस्थायिना येन मनसा इदं प्रत्यक्षं यथा स्यात्त्था भूतं भूतकालीनं, तथा भुवनं भवतीति भुवनं (भवतेः क्युटप्रत्ययः) वर्त्तमानकालीनं, तथा भविष्यत् भविष्यतीति भविष्यत् ('लूट्; सद्धे' ति भवतेर्ल्टः स्थाने शतृप्रत्ययः 'तौ सदि' तिपाणिन्युक्तेः)। भविष्यतकालीनं, सर्वं प्रत्यक्षाप्रत्यक्षवस्तुजातं प्रगृहीतं परसर्वतो भावेन ज्ञातमित्यर्थः।

'स वा अयमात्मा ब्रह्मविज्ञानमयो मनोमयः (बृ. 4/4/151)' इत्यादि श्रुते मनस आत्मरूपत्वादविनश्वरत्वं स्पष्टतया प्रतीयते। अतोऽविनश्वरत्वान्मन एव भूतमविष्यद्वर्त्तमनकालेषु विद्यमानं सत्कालत्रयसम्बन्धि प्रत्यक्षाप्रत्यक्षवस्तुजातं परिगृह्णाति। श्रोत्रादीन्द्रियाणि तु प्रत्यक्षमेव वस्तु परिगृहवन्ति व त्वप्रत्यक्षं कालान्तरे नश्यन्ति च तानीन्द्रियाणि अतच्चुरादीन्द्रियापेक्षया मनोवैशिष्ट्यं श्रुत्याऽभ्युक्तं 'येनेदं भूतं भुवनं भविष्यपरिगृहीतममृतेन सर्वम्' इति। येन च मनसा सप्तहोता यज्ञः सप्तहोतारो देवानामाह्वातारो होमकर्त्तारश्च होमृमैत्रावरुणादयो यत्र च मनसा सप्तहोता अग्निष्टोख्यो यागस्तायते विस्तार्य्यत इत्यर्थः। 'तनोवेर्यकी'ति पाणिनीयसूत्रेणाकारः। अग्निष्टोम एव सप्तहोतारो भवन्तीति प्रसिद्धेः। येन मनसाऽष्टोमो यज्ञः सम्पाद्यत इत्याशयः। तनमे मनः शिवसङ्कल्पमस्तिवि पूर्ववत् दुर्वासनादिराहित्यन मदीयं मनो धर्म्मविषयकं भवत्वित्याशंसावाक्यार्थः।।

यस्मिन्नृचः साम यजूꣳषि यस्मिनप्रतिष्ठिता रथनाभाविवाराः ।

यस्मिꣳश्चित्तꣳसर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥5॥

उवट भाष्य—यस्मिन्नृचः यस्मिन्नमनसि ऋचः प्रतिष्ठिताः। यस्मिन् सामानि प्रतिष्ठतानि। यस्मिन् यजूंषि प्रतिष्ठितानि। कथमिव। रथनाभौ इव आराः। यस्मिन् चित्तं संज्ञानम् सर्वम् तस्य तस्यार्थस्य। ओतं निक्षिप्तम् तन्तुसंततमिव कृतं प्रजानाम् । तन्मे मन इति व्याख्यातम्।

श. भाष्य—यस्मिन् मनसि ऋचः ऋग्वेदः प्रतिष्ठितः । यस्मिश्च साम सामवेदः, यजूंषि यजुर्वेदश्च। एवं सर्वे वेदा प्रतिष्ठिता आश्रिताः । कुत्र क इव। रथनाभौ रथमध्ये (चक्रे) अरा इव। यस्मिंश्च प्रजानां सर्वं । **चित्तं संज्ञानमोतं सम्बद्धं[4] तन्मे मन इति ॥5॥**

इच्छाशक्त्याः विविधं उपयोगाः विशेषस्तु मनसः वाक्शर्क्ते विकासः तत्सत्यता, त्रिकालदर्शिता, मनकर्मणोः समन्वयः, सर्वेभ्य सौमनस्यंश्चेति विमृश्यन्ते प्रमुख विषया; सन्ति। तत्पश्चात् मनसा चिन्तिता इच्छाशक्तिः, सौभाग्यप्रदातृ मनसः इच्छाशक्तेः प्रबलं संचालकं अभेधं कवचम् चेति मनोविज्ञानस्य विचार विषयाः सन्ति। अनन्तरं वैदिक मंत्राणाम् अर्थचैतन्य द्वारा मनसा इच्छशक्त्याः विविध विकासः, श्रेष्ठता, विचार चारूता मंत्राणाम् सम्यग् उपयोग अस्ति।

वेदेषु इच्छशक्त्याः कृते आगृतिः काम शब्दं च प्राप्यते। इच्छाशक्तिः सौभाग्यस्य देवीमस्ति। एतद् मनसा तिष्ठति, एषाः विचारस्य, चिन्तनस्यन्च जननी अस्ति। इच्छाशक्तिरेव ऐश्वर्यस्य स्त्रोतऽस्ति। एषा एव मानवीय साफल्यं दत्त्वा समृद्धिं प्रददाति। मानवीय उद्देश्याणां साफल्यार्थ इच्छाशक्तिरेव आध्यक्ष्यं वहति। इच्छाशक्ति सुदृढ़ं, अभेध कवचमिव कार्यं करोति। अस्याः संरक्षणम् सर्वोत्कृष्टत्वं भजते। एषा अस्माकं च त्रिविधं रक्षणं करोति- आधिभौतिकं, आधिदैविकं, आध्यात्मिकं विपत्तिनां प्रकोपेन मानवानां रक्षां करोति। एतदर्थ इच्छाशक्तिः ब्रह्मधर्म अर्थात् ज्ञान-कवचं आत्मबलरूपी कवचम् अपि नाम्नाभिधीयते। अस्या; माध्यमेनैव सर्वेषां विपत्तिनां कष्टानां शत्रुणामुपरिजयं च प्राप्तुं शक्यते।

इदं कामनारूपी इच्छाशक्तिः स्थावरं-जंगमं-समुद्रानां अपेक्षयमि महत्तरास्ति। यत् कार्यं इच्छाशक्तिः कर्तुं शक्नोति तत् कोऽपि कर्तुं न शक्यते। अस्याः इच्छाशक्ते आद्य-अन्तंञ्च नास्ति। एतदेव मानवमात्रस्य कामनां पूरयति अभीष्टसाधकं च अस्ति।

इच्छाशक्त्येव जीवने श्रेष्ठतां आगच्छति। अस्यैव उपयोगेन देवा; श्रेष्ठाः अभवन्। अतएव देवाः, 'कामज्येष्ठाः' प्रोच्यते । इच्छाशक्तिः कामधेनु कथ्यते। इच्छाशक्त्या एव विचाराः उद्भूताः भवन्ति। विचाराणां अभिव्यक्तिः वाणी माध्यमेन भवति। अतः विराट् वाक्तत्व कामस्य पुत्रीरूपेण स्तूयते।

इच्छाशक्तिः उत्साहः च परस्परं संबद्धम् अस्ति। अतएव एकस्मिन् मंत्रे पति-पत्नीरूपेण इच्छाशक्तिः उत्साहस्य च वर्णनं प्राप्यते। संकल्पस्य पुत्री इच्छाशक्ति, अस्याः मन्युः (उत्साहेः) सह विवाहं अभवत् । संकल्पेन विचारेण वा इच्छाशक्तिः उत्पन्ना भवति पुनश्च उत्साहेन सह सा कार्ये प्रवृत्तां भवति।

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मन; शिवसंकल्पमस्तु ॥6॥

उवट भाष्य—सुषारथिः । यन्मनः मनुष्यान् । नेनीयते अत्यर्थं नयति। कथमिव। सुषारथि; कल्याण सारथिः अश्वान् इव यन्मनुष्यान् । यच्च मन सुषारथिरिव। अभीशुभिः प्रग्रहैः वाजिन इव वेजनवतोऽश्वानिव यमयतीति शेषः। द्वे उपमे एकत्र नयनमन्यत्र नियमनमर्थः। यच्च हृत्प्रतिष्ठम् । तत्रोपलब्धेः। यच्च अजिरं जरारहितम् । यच्च जविष्ठम् अतिशयेन गन्तृ। तन्मे मन; शिवसंकल्पमस्तु ।

श. भाष्य—मनुष्यन्नेनीयते हितहितविषये प्रवर्त्तयति निवर्त्तयति च।[5] क इव सुषारथिः सुष्ठु हयारोहः अभीशुभी रस्मिभिरश्वानिव। प्रयोक्तृसारथिः अश्वान् हिताहितविषये प्रवर्त्तयति निवर्त्तयति च। अश्वान् किम्भूतान् ? वाजिन वेगशालिनः। मनः किम्भूतं? हृत्प्रतिष्ठं हृदि प्रतिष्ठितम् । तत्रैव ज्ञानोत्पत्तेः यंच्च तत् अजिरमजीर्ण नित्यं प्रौढं, जविष्ठं जवशालि वेगवत्। तनमे मन इति ।।6।।

विशेषस्तु तत् मे मम मनः शिवसङ्कल्पमस्तु शान्तव्यापारं भवतु श्रीरुद्रप्रसादादितिशेषः। तत्किं मन इत्यपेक्षायामुच्यते। यत् मन मनुष्यान् नरान् नेनीयते अत्यर्थमितस्ततों नयति (नयते क्रियासमभिहारे चङ्)। मनुष्यग्रहणं प्राणिमात्रोपलक्षकं यतो मनसा प्रेरिता एव प्राणिन सर्वव्यवहारषु प्रवर्त्तन्ते अत एवमुक्तमित्यर्थः। तत्र दृष्टान्तद्वयं प्रदर्श्यते तद्यथा सुषारथिरश्वानिव वक्षयेति शेषः। शोभनः सारथिः सुषारथिः शोभनो यन्ता यथा वक्षया आश्वान् नेनीयते इतस्ततोऽश्वान् धावयन् स्वाभिमतप्रदेशं प्रति गन्तुमभिप्रवर्तयति तथैव मनोऽपि अश्वस्थानिनः सर्वप्राणिनो नानाव्यवहारेषु वासनारूपया वक्षया इतस्ततो धावयत् स्वाभिमतप्रदेशस्थानीयपदार्थ प्रति प्रवर्त्तयतीत्याशयः। अपि च अभीशुर्भिर्वाजिन इव, यथा सुसारथिः शोभनोऽश्ववाहकः अभीशुभि प्रग्रहैः

मुखस्थितकविकाख्यरज्जुविशेषैः वाजिन वेगवतोऽश्वान्नेनीयत इत्यनुपङ्गः, रश्मिमिर्नियच्छतीत्यर्थः। तथैव मनोऽपि यत्र नियन्तुमिच्छति तत्रैव प्रवर्त्तयति नियच्छति च नरानित्याशयः। एतदुपमाद्वयं तत्र प्रथमया प्रवर्त्तनं द्वितीयया नियमनमभिहितम् । तथा यच्च मन हृत्प्रतिष्ठं हदि प्रतिष्ठा स्थितिर्यस्य तत् हृत्प्रतिष्ठं हृद्यैव मन उपलभ्यते, 'यज्ज्योतिषां ज्योतिरि' तिश्रुतेर्हृद्यवस्थानं मनसोऽभिगम्यते तस्मात् हृत्प्रतिष्ठं हृदयावस्थितं यन्मन इत्यर्थः। यच्च मनः अजिरं जारहितं बाल्ययौवनस्थविरेषु मनसस्तदवस्थत्वात्। अत उक्तं केनचित् 'शिरः शुक्लं चक्षुस्तिमिरपटलैरावृतमहो विशीर्णा दन्तालिं; श्रवणरहितं कर्णयुगलम् । वपुः कुब्जीभूतं गतिरपि शनैर्यष्टिशरणा मनो मे निर्लज्जं तदपि न विषयेभ्यः स्पृह्याति'।। इति। तथा यच्च मनः जविष्ठं जवोऽस्यास्तीति जववन् अतिशयेन जववदिति जविष्ठं। 'विन्मलोर्लुगी'ति इष्ठानि परे मतोर्लुक् (अतिशयेन जववत् वेगवदित्यर्थः।) 'न वै वातात्किन्चनाशीयोऽस्ति न मनसः किन्चनाशीयोऽस्ती'ति श्रुतेः। यदीदृशं मदीयं मनस्तन्मे मन; शिवसङ्कल्पमस्तु शान्तव्यापारं भवत्वित्यर्थः।

पुरुषसूक्तम्

पुरुषस्य सूक्तमिति पुरुष-सूक्तम् । इत्यत्र पुरुष शब्देन "ईश्वर" एव ज्ञायते । पुरे ओषति प्रकाशयतीति पुरुषः । दाह प्रकाशयोरेकाधिकरणत्वादिति । अव्यक्त महदादिविलक्षणश्चेतनो यः निमित्त कारण-स्वरूपः पुरुषः "पुरुषान्न परं किञ्चित्" इति श्रुति-प्रसिद्धिस्य ईश्वरस्य महद् वर्णनं सूक्तेऽस्मिन् समुपलभ्यते । पूः शरीरं बद्धिर्वा तत्रासौ विषयोपलम्भनाय सीदतीति पुरिषादः सन् पुरुष इत्युच्यते । यद्वा पुरि शरीरे शेते इति पुरिशयः सन् पुरुष इत्युच्यते । पूरयतेर्वा तेनेदं पूर्ण पुरुषेण सर्वमिति श्रुतिबचनात् पुरुषेण सर्व जगत् पूर्णमिति ।

"पृ पालन पूरणयोः" जुहोत्यादि परस्मैपदी धातोः "पुरः कुषन्" इति सूत्रेणौणादिक कुषन् प्रत्यये "उदोष्ठ्य पूर्वस्य" इत्यनेने उत्वे, "उरण रपरः" इति रपरत्वे कृते पुरुष शब्दस्य सिद्धिर्भवति । पिपर्त्ति पालयति सर्वं जगदिति पुरुषः । पिपर्त्ति पूरयति सर्व-कामानिति पुरुषः।

"ब्रह्म सत्यं जगन्मिथ्या" इति अद्वैत-दर्शनस्य सिद्धान्तमुद्घाटयन् उपनिषदि सर्वत्र ईश्वरस्यैकत्वं वर्णितं विद्यते। यथोक्तं वृहदारण्यकोपनिषदि—"स्वयं ब्रह्मा स्वयं विष्णु स्यमिन्द्रः स्वयं शिवः । स्वयं विश्वमिदं सर्वं स्वस्मादन्यन्नकिञ्चन।।"

निखिले ब्रह्माण्डे सर्व-प्राणि-समष्टि-रूपो ब्रह्माण्ड देहो विराडाख्यः अवयवी स्वरूपः चतुर्दश-भुवनं वर्तुलाकारं कृत्वा व्याप्तः तिष्ठतीति भावः । अस्यां सृष्टयां यत्किञ्चित् विद्यते तत्सर्वं पुरुष एवं। पुरुषमन्तरेण जगन्मिदं मिथ्या स्वरूपं स्वप्रवत् दरीदश्यते इति। तथैव लोके जना घटाकाश-मठाकाश-जन्यं व्यभिचारी ज्ञानमाप्नुवन्ति न तु तज्ज्ञानं वास्तविकं, तथैव पुरुषेण व्यतिरिक्तं एवं व्यभिचारी ज्ञानम् । एतेन सुस्पष्टं यत् वेदेषु अद्वैत-दर्शनस्य बीजं सर्वत्र सुवर्णितम् । वेदानामनुशीलनादेव उपनिषदि तन्मतस्य विस्तारः दृष्टिगोचरो भवति। यथोक्तं

तैत्तिरीयोपनिषदि– "एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन । वासुदेवः परं ब्रह्म विराट् पुरुष इत्यसौ ।।"

पुरुषः अशब्दमस्पर्शरूपमव्ययं अरसं नित्यमगन्धवच्चेत्यभिलक्ष्यअमृतानाद् उपनिषद्युक्तम्–

"अघोषमव्यञ्जनमस्वरं च अकण्ठताल्वोष्ठमनासिकं च ।
अरेफ जातमुभयोष्ठवर्जितं यदक्षरं न क्षरते कदाचित् ॥"

अक्षरं परमनादः शब्द ब्रह्मेति कथ्यते" इति योगशिखोपनिषद्वाक्यात् प्रणवः तस्य अनाहतध्वन्यात्मकस्य अनादि नादस्य वाचकः वाच्यस्तु रहस्यात्मको नादः परमात्मनः वाचकः। अयं हि परमोनादः सन्त-वाण्यां विविधैः रूपैः समुपलभ्यते इति । यथाह्येवमुक्तम्:-

"आदि नाम पारस अहै, मन हैं मैला लौह ।
परसत ही कंचन भया, छूटा बन्धन मोह ॥
राम-राम सब कोई कहै, नाम न चीन्है कोई ।
नाम चीन्ह सतगुरू मिलै, नाम कहावै सोई ॥"

अयं हि परमात्मा पुरुषः अजरः, अमरः, निर्विकारः, निर्विकल्पः, कर्तुमकर्तुमन्यथा कर्तुं समर्थः सन् समेषां ब्रह्माण्डे व्याप्तः ।

The Call of the vedas नामके ग्रन्थे A : C. Bose महाभागेनाप्युक्तम्–The idea of The divinity as an all pervading Being has been expressed in grand Language in the "Purusha" hymun of the veda. And in that hymun the mystical conception of the many in one fields a remarkable illustration page : 147.

पुरुष-सूक्ते वर्णितस्य पुरुषस्य असंख्यकानि अनन्ताः शीर्षाणि विग्रह रूपाणि सर्वाणि शरीराणि जातानि। तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायु वायोरग्निः, अग्नेरापः अद्भयः पृथिवी इति सर्वाणि पञ्चमहाभूतानि, तेषां पञ्च तन्मात्राश्च तस्मात् विराड् रूपात् पुरुषादेव उत्पन्नाः समभवन् ।

ऐश्वर्यस्य समग्रस्य वीर्यस्ययसः श्रियः ज्ञान वैराग्ययोश्चैव षण्णां भग इतिरणा इति स्मृतिवाक्यात् स एव पुरुषः भगवतः स्वरूपः । समेषां ब्रह्माण्डानां यानि वस्तूनि, ये च पदार्थाः ते सर्वे तस्मिन्नेव विराजमानत्वात् पुरुष एव । तानि सर्वाणि वस्तून्येवं तस्य शरीराणीति बोध्यम् । महाप्रलये सर्वस्यास्य जगतः शरीराणां वा ब्रह्मणि विलीयमानत्वेन पुरुषमन्तरेण न तु केषाञ्चिदपि पदार्थानां स्थितिः विद्यते। एवं रूपेण सर्वेषु पदार्थेषु स्थितो भूयते। सजीवं निर्जीवञ्च सर्वं जगत् तस्य शरीरं ज्ञेयम् । पृथिव्यां स्थितः सन् पृथिवी रूपं शरीरं, जले निवसन् जलात्मकं शरीरमात्मनि तिष्ठन् आत्मारूपं शरीरं विभतीर्ति पुरुषः । इन्द्रादयः नर-पशुपक्षिगणादयः

स्थावर-जङ्गर्मामकं यावत् तस्यैव ऐश्वर्यम् । अनेन शरीरी शरीरयोर्मध्ये अभेदसम्बन्धः दृष्टिगोचरो भवति। यथैव लौकिके व्यवहारे एवमुच्यते–स्थूलकायोऽहं कृशकायोऽहमित्यत्र अहमिति पदं जीवात्मनोपलक्षकं न तु शरीरोपलक्षकम्। परञ्च जीवात्मा कदाचिदपि न स्थूलः कृशकायो वा भवति। इति तु शरीरस्य विकारः । शरीरे यस्मिन् यः शरीरी, तस्य शरीरस्य सुखदुःखदीनां धर्मः शरीरेणैवानुभूयते। स्थूलोऽहं कृशोऽहमिति व्यवहार-वाक्यानि आबालवृद्धाः सर्वे जानन्तीति। परञ्च सुखदुःखादिभिः आत्मनः निर्लेपत्वात् कर्म-जन्य फलं भोक्तुं शरीराणि परमेश्वरेण विरचितानीति ज्ञेयम्।

सृष्ट्युत्पादने त्रिविधं कारणं दार्शनिकैः स्वीक्रियते। निमित्त-उपादन सामान्यञ्चेति। कारणाभावात् कार्याभावः इति सिद्धान्तानुसारेण त्रिविधं कारणं विना कार्योत्पत्तिः कदाचिदपि भवितुं न शक्नोति । कार्योत्पत्तये कारणमपरिहार्य-रूपेणापेक्ष्यते। यथैव लोके घटपटादि निर्माणाय कुम्भकार-रूपं निमित्तकारणं, मृद रूपमुपादानकारणं चक्ररूपञ्चेति सामान्य कारणमपेक्ष्यते, तथैव सृष्ट्युत्पादने ईश्वर-प्रकृति-स्थान रूपात्मकं त्रिविधं कारणं नितरामावश्यकम्।

पुरुष-सूक्तेऽस्मिन् एतस्यैव निमित्तोपादानरूपस्य कारणस्य व्याख्यानं विद्यते। ईश्वरः कीदृशः ? तस्य स्वरूपं किं ? तस्मात् सृष्टिरियं केन विधिना किमर्थञ्च प्रादुर्भूतेति सर्वं सुवर्णितं पुरुषसूक्ते। एतेषां सम्यक् विश्लेषणत्वात् पुरुष-सूक्तस्य वैशिष्ट्यं नितरां परिलक्ष्यते।

सूक्तमिदञ्च चतुर्षु वेदेषु समुपलभ्यते, यस्मात् अस्य महत्ता अतीव रूपेण चमत्कृता सञ्जायते। सत्त्व-रजस्तमो गुणात्मिकाया प्रकृतेः सकाशाद् रजो गुणं गृहीत्वा, तेन च महत्त्वाभिमानिनं चतुर्मुखं ब्रह्माणं ससर्ज । स च चतुर्मुखश्चतसृषु दिक्षु किमप्यनवलोक्य भीतस्सन् किंकर्त्तव्यतामूढ़ आस । "तपः, तद्धि तपः" इति नभो वाणीमाकर्ण्य परमेश्वरः आत्मन्यात्मानमाविश्य, परार्ध यावत्तपस्तप्त्वा लोकान् स्रष्टुमारब्धवान् । निस्सारयुक्तां तां सृष्टिं विज्ञाय आत्मानमकृतार्थ मन्वानो तपः पूतचेतसा सनकादीन् सृष्टवान् । तदनु च सर्गविस्ताराय विराट् पुरुषः तपस्तप्त्वा दशप्रजापतीन् सृष्टवन् । यथोक्तं मनुस्मृतौ–

"मरीचिमत्र्याङ्गिरसो पुलस्त्यं पुलहं क्रतुं ।
प्रचेतसं वसिष्ठञ्च भृगुं नारदेव च ॥"

अव्याकृतस्य च ब्रह्मणा सह भेदाभेद स्वीकाराद् ब्रह्माद्वैतं, शक्त्यात्मना च ब्रह्म जगद्रूपतया परिणामत इत्युभयमप्युपपद्यते। तेन ब्रह्मणा पञ्चमहाभूतेषु प्रथमं जल-सृष्टिः कृता इति स्मृतिशास्त्र मतम् । सृष्ट्वा च जले शक्ति रूपं बीजमारोपितवान् । विराट् पुरुषेच्छया तद्बीजं हैममण्डमभवत् । तस्मिन्नण्डे असंख्य आदित्य तत्तुल्यप्रभं हिरण्यगर्भो जातवान् ।

स पुरुषः हैमवदण्डे संवत्सरमेकमुषित्वा स्वमेवाण्डं द्विधा कृत्वा भूमिमाकाशं दिशश्च सृष्टवान् । तदनन्तरं स ब्रह्मा सदसदात्मकं रूपं मनः मनस;, पूर्वमहंकार तत्वं रचयामास। तस्मादेव सत्वरजस्तमोगुण युक्तानि विषयाणां शब्दस्पर्शरूपरसगन्धानां ग्राहकाणि शनैः क्रमेण

वेदान्त सिद्धेन श्रौत्रादीनि पञ्च ज्ञानेन्द्रियाणि, पञ्च पश्वादीनि कर्मेन्द्रियाणि शब्दतन्मात्रादीनि च पञ्चोत्पादितवान् । तत आकाशादि पंचभूत सूक्ष्माणि क्रमेणोत्पन्नानि तत तेभ्य एव स्थूलान्युत्पन्नानि पञ्चमहाभूतानि सूक्ष्म स्थूल क्रमेणैव कार्योदय दर्शनात् । अव्याकृत गुणत्वेऽपि सत्वरजस्तमसां सर्वाणि त्रिगुणानि जातानि । ततः तेषां षण्णामहंकारसस्य तन्मात्राणां ये सूक्ष्मावयवास्तान् स्व विकारेषु योजयित्वा मनुष्यादि तिर्यक् स्थावरादीनि-सर्वभूतानि परमात्मना निर्मितानि । सृष्टि-क्रमस्य विकासाय परमात्मना यज्ञसिद्धयर्थं वेदाः समुत्पादिताः ।

अथ च प्राप्तोपदेशः चिदानन्दैकघन-स्व-स्वरूप प्रत्यभिज्ञज्ञानत प्रहीणपशुस्वभावः सहजमालानन्द निर्भरः शिवस्वरूपं पुरुष परनिन्दचिच्चमत्कार विस्फारेण प्रकाशमानो जगदाभासयति निखिलमिदं जगत् महेश्वरादेव निर्भासते । स्वात्मन्येव विकास्यति स्वात्म महेश्वरेच्छयैव च प्रकाशते। स्वात्म महेश्वररूप पुरुष एव भासमानस्य विश्ववेद्यस्यात्मा। एष हि महेश्वरः निर्भासमानेऽपि विश्वस्मिन् अनाच्छादित स्वरूपः स्वेच्छयैव स्वानधिकमपि विश्वाधिकमिव प्रत्येति।

किञ्च स्वात्माभिन्न संविदमन्तरेण भावनां सत्वासत्त्वादि प्रतिष्ठानुपपत्या संविद्विश्रान्तत्वमभ्युपेयम्। तत् एव चैषां तदभिन्न प्रकाशमानंत्वं (तदनतिरिक्तत्वेपि ततोऽतिरच्यामानत्वं) स्वतन्त्र्यादेवावभासते । ततश्च सकलो वेद्य प्रपञ्चः स्वात्ममहेश्वरभिन्न संविद्रूपमदभिन्नो भवन् भारतीयो विश्वं भासयतीत्यहं भामि, अहं भामीति विश्वं भातीति स्वात्मप्रकाशो विश्वप्रकाशः स्वरूप एवेति । यथैव न्यग्रोध बीजे शक्ति रूपेण महाद्रुमो विद्यते एवं स्वात्ममहेश्वरः समस्ते विश्वे शक्तिरूपेण विराजते । यथोक्तम्–

"शक्तोऽस्य जगत्कृत्स्नं शक्तिमान् शिव एककः।" इति ।

जड विलक्षणः प्रकाशविमर्शमयः स्वात्ममहेश्वरः स्वातन्त्र्यशक्त्या शिवादिधरान्तं विश्वरूपं भजते। यदुक्तं महामहोपाध्यायैर्महेश्वर स्तोत्रे–

"शिवादि पृथिव्यन्तं समस्त विश्वरूपेण चेकोऽपि विभासियत्वम् ।" इति । अयमात्म महेश्वरो न निष्क्रियतो निर्गुणः शान्तो मुकुटवद् जडकल्पः, प्रत्युत् प्रकाश विमर्शमयः संविद्रूपः प्रतिक्षणमुच्छलच्चैतन्य स्वभावो वर्गीकृत विचित्रतनुकरणभुवन सन्तानः प्रमातुप्रमाण प्रमेता स्वरूपः प्रकाशमानता संसारेश्चकास्ति। यदुक्तम्–

"अस्थास्यदेक रूपेण वपुषा चेन्महेश्वरः ।
महेश्वरत्वं सवित्वं तदत्यक्षद् घटादिवत् ॥" इति ।

वेदेषु पुरुषस्य व्यापकत्वं सर्वत्र दृष्टिगोचरं भवति । पुरुषसूक्ते एव "स भूमिं सर्वतः स्पृत्वा" इत्युक्त्वा पुरुषस्य व्यापकत्वं न्यगदितम् । यः पुरुष प्राणेषु व्यापकानां प्रकृतीनां परमाणुषु लोकेषु वा गर्भ इव प्रच्छन्नः, यः किरणेषु मध्ये सूर्य्य इव सेव्यमानमैश्वर्यं स्वाधीनं

करोति यश्च स्थावरेषु पदार्थेष्वन्तर्व्यापकः, स जङ्गमात्मकेषु पदार्थेष्वपि व्यापकः सन् राजते। स पर्वत इव अभेद्यः, कंठोरेषु पदार्थेषु स्थितः सन् छिद्र युक्तेषु पदार्थेष्वपि राजते इति ।

पर्यालोचनेन इदम् ज्ञायते यत् प्रकृत्याः परमाणुषु पुरुषः परिव्याप्तः । तस्य व्यापकत्वात् परमाणवोऽपि ब्रह्मतत्त्वेन निर्मितःइति मन्यते । तात्त्विक रूपेण पुरुषात् प्रकृतिः अभिन्नेत्यवगम्यते। यथैव सविता इमे अहनी अप्रयुच्छन् पुरः एति तथैव सर्वोत्पादकः पुरुष सर्वान् प्रकाशयन् उत्तमेन रीत्या प्रकृतौ जगति संस्थाप्य प्रकृति-जीव रूपयोः पदार्थयोः पुरः प्रयुच्छन् प्रमाद रहितः सन् सर्वसाक्षी रूपेण व्याप्तो भवति यथाहि ऋग्वेदेमुक्तम्–

''य इमे उभे अहनी पुर एत्य प्रयुच्छन् ।
स्वाधीर्देवः............................ सविता ॥

मन्त्रेऽस्मिन् पुरुषस्य स्थितिः प्रकृतिजीवयोः पूर्वमेवेत्युक्तम् । आदि रूपयोः प्रकृति जीवयोः पूर्व-काले ईश्वरस्य स्थितिः अनादेः आदित्वं द्योतयति । एतदर्थं बंगला योगसङ्गीते "अनादि आदि परम कल्याण इत्युच्चार्य अनादे आदित्वं ध्वनयति । प्रकृतिस्तु देश-काल ज्ञानात् अनादि स्वरूपां इमामन्तरेण देश कालयो निर्माणसम्भवम् ।

त्रिगुणात्मकेयं प्रकृतिः पुरुषादेव समुत्पन्ना संज्ञातेति । ज्ञान सङ्कलनीतन्त्रेऽप्येवमुक्तम्ः–

''अक्षराः प्रकृतिः प्रोक्ता अक्षराः स्वयमीश्वराः ।
ईश्वरान्निर्गता सा हि प्रकृतिर्गुण बन्धना ॥''॥९९॥

स एव प्रथमं विद्यमानत्वात् सर्वविधिना परिपूर्णः सूर्यादिलोकस्योपरिअपि व्याप्तः। अति शुक्लः तेजोमयः, अद्भुतः बलशाली, गतिशीलः प्रभुः सर्वेषां प्रेरकः सन् सर्वान् लोकान् प्राकृत्यानुरूप परमाणुं प्रकाशं च अतिदूरदेशपर्यन्तमपि प्रकाशयति। सर्वत्र व्याप्तः सन् आनन्दयतीति आनन्दं जनयतीति भावः। यथाहि-

"स पूर्व्यः पवते यं दिवस्परिश्येनोमथायदिषितस्तिरोरजः।
स मध्व आ युवते वे विजान इत्कृशानोरस्तुर्मनसासह विभ्युषा ॥"

अनेन मन्त्रेणापि सुस्पष्टं यत् प्रकृति-जीवाभ्यां पूर्वं पुरुषस्य स्थितिः विद्यते प्रथमं विद्यमानत्त्वात् । इत्यत्रापि पुरुषस्य वैशिष्ट्यं समवलोक्यते सन्त-वाण्यामपि एष एव भावः। यथा–

''प्रथम एक जो आपै आप । निराकार निर्गुन निर्जाप ।
नहि तब पाँच तत्त गुन तीनी । नहि तन सृष्टि माया कीनी ॥
नहि तब आदि अन्त मधितारा । नहिं तब अंध-धुंध उजियारा ॥
कहत कबीर विचारि के, तब कछु किरतम नाँहि ।
परम पुरुष तहँ आप ही, अगम अगोचर माँहि ॥''

"तदि अपना अपु आप ही उपाया।
नाँ किछु ते किछु करि दिखलाया॥"

सर्वजगतां प्रेरकः, सञ्चालकः मर्त्य-धर्महीनः, विनाशरहितः पुरुषः "विश्वानि भुवनानि आ तस्थौ" जगत्यस्मिन् सर्वत्र विद्यमान इत्यर्थः । यथैव सूर्य्यः उषां परिव्याप्नोति तथैव पुरुषेऽपि "तानि परि अर्षति" सर्वमुत्पाद्य व्याप्नोतीति भावः । पुनश्च उषां परिव्याप्य यथैव सूर्य्यः चतुर्षु दिक्षु व्यापनाय तमसः पृथक् कृत्वा प्रकाशयति, तथैव परमेश्वरः चन्द्र इव आह्लादकः भास्वान् इव देदीप्यमान सन् भूतानामभिष्टये जरामरणे बद्धानि भूतानि बन्धनात् मुक्तिं प्रददातीति ।

यः पूतः सन् (अव्यान् वारान्) प्रकृत्या निर्मितं समस्तमावरणं परिव्याप्य राजते, तस्यैव मधुरा ज्ञान युक्ता वाणी-सुखद रूपेण प्रादुर्भवति । भास्करश्च स्व विभूत्या तेजयुक्तिं करोति यथोक्तं ऋगवेदे :-

"प्रेतधारा मधुमती रसृग्रन्वारान्यत्पूतो अत्येष्यव्यान्।
पवमान पवसे धाम गोनां जज्ञानः सूर्यमपिन्वो अर्कैः॥"

अजन्मा रूपा पुरुषः उत्पादयितुं बीजमारोप्य तदनु च मेघवत् सित्त्वा अभिवर्धयति समस्तेषु जीव-सर्गेषु व्यापकः स एव । अस्यां सृष्ट्यां स एव सर्वान् विदारयति विभाजयति वा तस्य सर्वविद्यमानत्वात् पूर्णत्त्वाच्च । न तु केनेचित् अपरेण तं विदारयितुं शक्यते। अयं हि आकाश भूमि-जीव प्रकृतिमतिक्रम्य ब्रह्माण्डात् बहिरपि तिष्ठति। यथाहि ऋगवेदेः-

"अभूर्वौक्षीव्यं ? आयुरानड्दर्षन्नु पूर्वो अपरो न दर्षत्।
द्वे पवस्ते परि तं न भूतो यो अस्य पारे रजसो विवेष॥"

यः पृथिव्याः जनिता मूलप्रकृत्याश्च सृष्टिं रचयति स एव सत्यज्ञानमुत्पन्नं जगच्च विभर्त्ति । तस्मादेव सर्वाह्लादकारकं व्यापकञ्च विविधं तत्त्वं, प्रकृत्या; परमाणुञ्च उत्पादयामास। ऋग्वेदे यथोक्तम्:-

"मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान।
यश्चापश्चन्द्रा वृहतीर्जजान कस्मै देवाय हविषा विधेम॥"

अनेन मन्त्रेण सुस्पष्टं यत् परापरे रूपे द्वे प्रकृती उपन्यस्ते। नित्येश्वरत्वादीश्वरस्य तत्प्रकृत्योरपि युक्तं नित्यत्वेन भवितुम् । प्रकृति द्वयत्वमेव हीश्वरस्येश्वरत्वम् । याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिस्थितिप्रलय हेतुस्ते द्वे अनादी सत्यौ शिवस्य मूलं कारणम्। कार्यकारणानां कर्तृत्वमुत्पादकत्वं यत्तत्कार्यकरण कर्तृत्वं तस्मिन् कार्यकरण कृर्तृत्वेन जगतः कारणं प्रकृतिः। पुरुषोऽपि सर्वस्य जगतः निमित्तं कारणम् । यदा कार्य-कारण रूपेम हेतुफलात्मना परिणतया प्रकृति भोग्यया पुरुषस्य तद्विपरीतस्य भोक्तृत्वेनाविद्या रूप; संयोगः स्यात्तदा संसारः प्रादुर्भवतीति।

सर्वतो दृशिमात्र स्वरूपेणाविक्रियात्मना ईश्वरेण माया त्रिगुणात्मिकाऽविद्यालक्षणा प्रकृति सूयत उत्पादयति स चराचरं जगत् ।

तथा च मन्त्रं वर्णः–

"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।

कर्माध्यक्षः सर्वभूताधिवास; साक्षी चेता केवलो निर्गुणश्च ॥" इति ।

अनेन हेतुना निमित्त कारणेन पुरुषेण चराचरं सर्व जगत् व्यक्ताव्यक्त रूपेण सर्वावस्थासु विपरिवर्त्तते। दृशिकर्मत्वापत्ति निमित्ता हि जगतः सर्वा प्रवृत्तिरहमिदं भोक्ष्ये पश्यामीदं शृणोमीदं सुखमनुभवामि दुःखमनुभवाामि तदर्थमिदं करिष्याम्येतदर्थमिद करिष्य इदं ज्ञास्यामीत्याद्यवगतिनिष्ठाऽवगत्यवसानैव । "योऽस्याध्यक्षः परमेव्योमन्" इत्यदयश्च वैदिकमन्त्रा एतमर्थं द्योतयन्तीति। प्रकृतिपुरुषावुभाभावप्यनादीं नित्येश्वरत्वादीश्वरस्य तत्प्रकृत्योरपि युक्तं नित्यत्वेन भवितुम् । प्रकृतिद्वयत्वमेव हीश्वरस्येश्वरत्वम् । याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिस्थितिप्रलय हेतुस्तते द्वे अनादी सत्यौ संसारस्य कारणम् ।

महेश्वरः सर्वात्मत्वात्स्वतन्त्रत्वाच्च महानीश्वरश्चेति महेश्वरः। परमात्मा देहादीनां बुद्ध्यन्तानां प्रत्यगामत्वेन कल्पितानमविषयाः परम उपद्रष्टत्वादि लक्षण आत्मेति परमात्मा शब्देन चाप्युक्त कथितः श्रुतौ । पुरुषस्य दिव्यानां विभूतीनां विस्ताराणां नान्ततोऽस्ति । न हीश्वरस्य सर्वात्मनो दिव्यानां विभूतीनामियत्ता शक्या वक्तुं ज्ञातुं वा केनचित् । स च विशेषतः स्तम्भन दृढ़ं कृत्वेदं कृत्स्नं जगदेकांशेननैकपादेन सर्वप्राणि स्वरूपेण स्थितोऽभूत् मुमुक्षुभिः अक्षरं परमं ब्रह्म इति वेदितव्यम् । स एव समग्रस्य जगतः प्रकृष्टं विधानमवलम्बमित्यर्थः। नित्यः अव्ययः पुरुषः शाश्वतस्य धर्मस्य गोप्ता रक्षकः तस्य चिरंतनत्वात् । तेन द्यावापृथिव्यन्तरिक्षं परिव्याप्तम्, दिशश्च सर्वापि व्याप्ता । तस्य च बहूनि वक्त्राणि चक्षूंषिबहुबाहूरूपादं बहून्युदराणि बहवीभिर्दंष्ट्राभिः करालं विकृतं रूपमवलोक्य लौकिकाः प्राणिनः प्रव्यथिताः सञ्जाताः। ये तस्य महदतिप्रमाणं रूपमवलोक्यते । नभः स्पृशं, प्रज्वलितमनेक वर्णव्याप्तानिलं दीप्त विशाल नेत्रं सर्वमपरिमितम्। लौकिकाजना; तस्यैवं महद् स्वरूपमवलोकयितुं क्षमाः। एतानि सर्वाणि भूतानि च प्रलये स्रवन्तीनां नदीनाम्बुवेगः तस्यैव मुखानि प्रविशन्ति। यथोक्तं गीतायाम्–

"यथा नदीनां वहवोऽम्बुवेगाः

समुद्रमेवाभिमुखाद्रवन्ति ।

तथा तवामी नर लोक वीराः

विशन्तिवक्त्रण्यभिविज्वलन्ति ॥"

द्वाविमौ पृथग्राशीकृतौ पुरुषावित्युच्येते लोके संसारे क्षरश्चाक्षरश्चेति । क्षरश्च क्षरतीति क्षरो विनाश्येको राशिपरः पुरुषोऽक्षरस्तद्विपरीतो भगवतो मया शक्ति; क्षराव्ययस्य पुरुषस्योत्पत्ति

बीजमनेक संसारि जन्तु-कामकर्मादि संस्काराश्रयोऽक्षरः पुरुषः उच्यते। स्वयमेव भगवान्क्षरः सर्वाणि भूतानि समस्तं विकारजातमित्यर्थः–सहस्त्रशीर्षा....इति ।

सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात् । स भूमि ᳪ
सर्वतः स्पृत्वात्यतिष्ठद् दशाङ्गुलम् ॥1॥

उव्वटभाष्य–परमात्मविज्ञानानन्दादिगुणाभ्यात्मनि प्रभूत; पुरुषमेधो यज्ञः प्रजापतिः लोककलाभ्वादिवपु; पुरुषोत्पत्तिस्थितिसंहतीनां हेतुः खर्गापवर्गैश्वमोक्षदो ज्ञानकर्मसमुश्चय कारणं शरीरं 'यज्ञो वा अख्यात्मा भवतीति' इति। सहत्रशीषा पुरुष इत्यनुवाकेन षोडशचेनानुष्टुमेन विहुदस्त्येन ब्रूहमणे ब्राह्मणमित्यामूतपुरुषद्वारेणावचरी स्दयते। हृदानी निर्वचन्द्वारेण द्रवियतुमाद। 'अथ यषपुरुषमेघो नाने मे वै लोकाः पूरयमेव पुरुषो योषं पचते सोऽस्यां पुरि शेते तस्मापुरुषः। तस्य यदेषु लोकेष्वश्रं तदस्वात्रं मेघस्तदसोतदने मेघस्तमापुरषमेघः'। पुरुषसूक्तस्य नारायणऋषिः पुरुषो देवतानुष्टुप्छन्दः अन्त्या विष्टुप् मोक्षे विनियोगः। अस्य भाष्यं शौनको नाम ऋषिरकरोत्। प्रथमं विच्छेदः क्रियाकारसंबन्धः समासः प्रमेयार्थव्यास्येति सर्वमेतजनकाय मोक्षार्थ कथयामासेति। सहस्त्रशीर्षा पुरुषः सहस्त्रनाक्षः सहस्त्रपात् । सः भूमिम् सर्वत; भुवनकोशस्य भूं स्पृत्वा व्याप्य दशाङ्कुलम् अत्यतिष्ठत। दश च तानि अङ्गुलानि दशाङ्गुलानीन्द्रियाणि। कतेचिदन्यथा रोचयन्ति दशाङ्कुलप्रमाणं हृदयस्थानम् । अपरे तु नासिकाग्रंदशाङ्कलमिति। किंभूतोऽसौ सहस्त्रशीर्षा । अनेकपर्याय; सहस्त्रशब्दः। अनेकानि शिरांसि यस्य स सहस्त्रशीर्षा पुरुषः। सहस्त्राक्षः सहस्त्राण्यक्षीणि नेत्राणि यस्यासौ सहस्त्राक्षः। सहस्त्रापात् पादानामङ्गानां सहस्त्राणि यस्य स सहस्त्रपात् । एतद्गुणछ पुरुषः तद्व्याप्य अतिक्रम्य स्थित इति ।।1।।

श.भा. सहस्त्रशीर्षेति । पुरुष ईश्वरः दशाङ्गुलं नाभेरूर्ध्वं व्यतिक्रम्य। अर्तात् हृत्पद्येऽतिष्ठत् स्थितोऽभूत् । अर्थऽशाद्धृत्पद्मोपरि ज्ञानात्मकपुरुषरूपेण स एवान्तर्यामी कर्मफलोपभोजक इत्युच्यते। किं कृत्वा भूमि सर्वतः स्पृत्वा-व्याप्य। "स्पृङ् व्यायमे" (तु आ.) सर्वतस्पृत्वा इति कस्कादित्वासत्वम् । भूमिशब्दोऽत्र भूम्यारब्धप्राणिदेहवचनः। तेन सर्वभावेन त्रैलोक्यवर्तिनः पार्थिवदेहान् व्याप्यत्यर्थः। भूमिशब्दः पञ्चभूतोपलक्षक इति केचित। भूमिशब्दोऽत्र आधारोपलक्षकः। तेन तिर्यगूर्द्ध्वाधोव्यापक इत्यर्थः। क ईश्वरः? सहस्त्रशीर्षा-सहस्त्रशब्दोऽसङ्ख्यातवाचकः। तेनासङ्ख्यातशिरा[6] इत्यर्थः। पुन किम्भूतः? सहस्त्राक्षः सहस्त्रपात्। अत्राशब्दः बुद्धीन्द्रियोपलक्षकः। तानि च पञ्च। तथा च त्रैलोक्योदरे वर्तमानानि शिरांसि बुद्धीन्द्रियाणि कर्मेन्द्रियाणि[7] च तानि सर्वाणि अस्यैवेत्यर्थः। अत्र नाभेरुद्र्ध्वं दशाङ्गुलम् अतिक्रम्य हृदयं भवतीति सकललोकानुभवसिद्धमेव। तत्र पुरि तिष्ठतीत्यत्र श्रुतिः प्रमाणं, तत्र हि "कत्तम आत्मे" त्युपक्रम्य "सोऽयं विज्ञानमयः पुरुषः, प्राणिषु हृदये ज्योति" रिति श्रुतिः। "एतौसुपर्णावि" ति च। "यमो वैवस्वतो देवो यस्तवैष हृदि स्थित' इति मनुवचनम् । स्पृत्वेति "स्पृङ् व्यायामे" इत्यस्य त्त्वान्तं रूपम्। अत्रात्मा ब्रह्माण्डोदरं वप्य ब्रह्माण्डोपरि दशाङ्गुलं व्यतिक्रम्यातिष्ठत्। दशाङ्गुलमित्युपलक्षकं ब्रह्माण्डाद् बहिरपि व्यापयिदत्यर्थ इति शङ्कराचार्यटीका।।1।।

विशेषस्तु–सहस्त्रशीर्षत्यादिषोछशार्च्चस्य नारायण ऋषिराद्यानां पन्चदशानामनुष्टुप्छ-नदोऽन्त्याया स्त्रिष्टुप्छन्द; पुरुषो देवता रुद्रशिरः स्नपने विनियोगः। मन्त्रार्थस्त्वेवं तत्र मन्त्रेऽस्मिन्नुत्तरार्ध स इति तच्छब्दश्रवणआत्पूर्वार्धे यच्छब्दोऽप्याहर्त्तव्यःयत्तदोर्नित्यसम्बन्धत्वात्, तथा हि योऽयं विज्ञानमयः पुरुषो "यस्मात्परं नामरमसित् क्रिन्चिद्यस्मान्नाणीयो न ज्यायोऽस्तिकश्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्ण पुरुषेण सर्वम् ।।[8] "समाने वृक्षे पुरुषो निमग्नोऽनोशवा शेचति गृह्यमानः, जुष्ट यदा पश्यत्यन्यमोशमस्य महिमानमिति वीतशोकः। यदा पश्य पश्यते रूक्मवर्ण कर्त्तारमोशं पुरुषं ब्रह्मयोनिम्, तदा विद्वान्पुण्यपापे विधूय निरन्जनः परमं साम्यमुपैति।।[9]

एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चनः ।
वासुदेवः परं ब्रह्म विराट् पुरुष इत्यसौ ।।[10]
स ब्रह्मा स शिवः सेन्द्र; सोऽक्षरः परमः स्वराट् ।
स एव विष्णुः स प्राणः स कालाग्निः स चन्द्रमाः ।।
स एव सर्व यद्भूतं यच्च भव्यं सनातनम् ।
ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये ।।[11]
स्वयं ब्रह्मा स्वयं विष्णु स्वयंमिन्द्रः स्वयं शिवः ।
स्वयं विश्वमिदं सर्व स्वस्मादन्यत्र किन्चन ।।[12]

इत्यादि श्रुतिषु प्रसिद्धो यः पुरुषोऽव्यक्तमहदादिविलक्षण श्चेतनः, अष्टाभिर्धाथुभि पूर्य्यते इति पूः शरीरं बुद्धिर्वा तत्रासौ विषयोपलम्भार्थ सोदतीति पुरिषादः सन् पुरुष इत्युच्यते। पूरयतेर्वा "तेनेदं पूर्ण पुरुषेण सर्वमिति "श्रुतेः पूर्णमनन पुरूषेण सर्वगतत्वाज्जगदिति पुरुषः।।" "पूरयत्यन्तरित्यन्तरपुरुषमभिप्रेत्येतियास्योक्तेः पुरुषः सर्वान्तर्यामी सर्वथीसाक्षी पुरुष इत्युच्यते।" पृश पालनपूरणयोः" जुहोत्यादिः परस्मैपदी, इत्यस्मात् पुरः कुषन्" इति सूत्रेगौणादिककुषन्प्रत्यये" उदोष्ठ्यपूर्वस्ये" त्युत्वे तस्य च" उरण् रपरः" इति रपरत्वे पुरुष इति सिद्धयति। एवं पिपर्त्ति पालयति सर्वमिति पुरुषः पिपर्त्ति पूरयति सर्वकानानिति पुरुषः, पूर्णमनेन पुरुषेण सर्वमिदमिति पुरुषः, पुरि सोदतीतिं पुरुषादः सन् पुरुषः पूरि होते इति पुरशिय; सन् पुरुषः-इति पुरुष शब्दार्थः। ततोऽयमर्थः।" तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः पुरुषः सर्वानुप्रविष्टों विज्ञानथानानन्दमयो ब्रह्मविष्णुरूद्रादिस्वरूपः सर्वाधिपः सर्वकामपूरकः सर्वान्तर्यामी सर्वधीसाक्षी एवं भूतो विराड्देहो यः परमात्माऽस्तोति शेषः। सः पुरुषो भूमि ब्रह्माण्डलरूपा पृथिवीं सर्वतः स्पृत्वा तिर्य्यगूर्द्धवमधश्चव्याप्य दशाङ्गुलामत्यतिष्ठत् दशा च तानि अङ्गुलानि दशाङ्गुलानि दशोन्द्रियाणि अतिक्रम्य वसीकृत्य अत्यतिष्ठत् स्थितोऽभूत् । अङ्गुलशाब्दोऽत्र इन्द्रिवाचो तस्य समाहारद्वन्द्वे सत्येकवचनं दशानामङ्गुलानां समाहारो दशाङ्गुलम् । ब्रह्माण्डदेहं व्याप्यसर्वद्वाराणि सर्वेन्द्रियाणि संयम्य स्थितस्तपश्चरेत्त्वर्थः। तथा च श्रुतिः "एकोऽहं बहुस्यां प्रजायेयं स तपोभूमिमर्थात्पन्चभूतानि व्याप्य दशाङ्गुलं दशाङ्गुलपरिमितं देशमत्यतिष्ठन् अतिक्रम्य स्थित

इत्यर्थः। दशाङ्गुलीमत्युपलक्षणं तेन ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्य स्थिति इति भावः।" तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः"[13] इति श्रुतेः। स एव सर्वस्यास्य जगतोऽन्तर्बहिश्च नहि तद्भिनन; क्वचित्कश्चित्प्रदेश इत्यभिप्रायः। तथा च श्रुतिः" यच्च किन्चिज्जंगत्सर्व दृश्यते श्रूयतेऽपि वा। अन्तर्बहिश्च तत्सर्व व्याप्य नारायणः स्थित । इति यद्वा भूमितर्थात्पन्चभूतोपलक्षितं जीवशरीरं सर्वतः स्पृत्वा (पृङ् व्यायामे) इत्यस्मात्क्तान्तं रूपं कस्कादित्वात्वत्वच) "स्पृणोतिर्व्याप्तिकर्मेति" यास्योक्तेः सर्वतोभावेन व्याप्य "तपस्तप्त्वा इदं सर्वमसुजत् यदिदं किं च तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः पन्चभूतोपलक्षितं जीवशरीरं सृष्ट्वा तत्र जीवरूपेण प्रविश्य च दशाङ्गुलमत्यतिष्ठत् नाभेः सकाशाद्दर्द्धध दशाङ्गलुमतिक्रम्य हृदयं भावतीति प्रसिद्धेः "कमऽआत्मेत्युपक्रम्य सोऽयं विज्ञानमयः पुरुषाः प्राणिषु हृद्यन्तर्ज्योति; प्रविष्टः" इति श्रुतेरात्मनोहृधबस्थान श्रवणाच्च नाभोरुपरि दशाछ. गुलं दशाङ्गुलपरिमितंहृदयमतिक्रम्य तत्र जीवरूपेण स्थितोऽभूदित्यर्थः। साधकोऽपि स्वदेहं ब्रह्माण्डं भावयित्वा ब्रह्माण्डोपरिनाभेः सकाशादूर्द्धवं दशाङ्गुलपरिमितप्रदेशमति क्रम्यस्वहृत्पद्ममध्ये परमात्मानमनुचिन्तयेदित्याशयः। तदुक्तं च श्रुत्वा– "सर्वकर्म्मर्स सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदगभ्यात्तोऽवाक्यनादर एषम आत्माऽन्तर्हृदय एतद् ब्रह्मेतमितः प्रत्येकभितंभाविताऽस्मीति यस्य स्यादद्धा न विचिक्साऽस्तीति ह स्माऽह शाण्डिल्यः शाण्डिल्य।[14] इति अपि च "आत्मा श्रमस्थः सकलेन्दिरयाणि निरुध्य भक्त्या स्वगुरूं प्रणभ्य। हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्यमध्ये विशदं विशोकम् । अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशांन्तमृतं ब्रह्मयोनिम् । तथादिमध्यान्त विहोनमेकं विपुं चिदान्दतरूमद् भुतम्!।[15] दि आत्मनो हृद्यवस्थानं कर्मफलोपभोगाय, अन्तर्यामिणोऽवस्थानं तु तन्नियतृत्वेन चेति तदुक्तं श्रुत्या–

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यपिप्पलं स्वाद्वत्त्यनन्नन्यो अभिचाकशीति ॥"[16]
"अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनाने कृते सन्निविष्टः॥"[17]

इति च। अतो भगवताऽप्युक्तम्–"ईश्वरः सर्वभूतानां हृददेशेऽर्ज्जुन तिष्ठति। भ्रामयन्त्सर्वभूतानियन्त्रारूढ़ाभिनमायया। इति, एतदंभिप्रायेणैव मनुनाप्युक्तं "यमोवैवस्वतो देवो यस्तदेष हृदि स्थितः। तेन चेदविवादस्ते माङ्ग्यां मा कुरून्नामः' इति, सर्वप्राणिषु हृयन्तः प्रविष्टो यः परमात्मा जीवेश्वररूप स एव पुरुष इति। तदुक्तं श्रुत्या" इमे वे लोका; पूरयमेव पुरुषो योऽयं पवते सोऽस्यां पुरि शेषे तस्मात्पुरुषः[5] इति। एवं हि सर्वप्राणिनां हृदवस्थितः सर्वान्तर्यामी सर्वधीसाक्षी यः परमाया स एव रुद्राख्यः परमेश्वरोऽस्तीति शेष;।" स ब्रह्म स शिवः–इति श्रुतेर्य एवम्भूतः शिवस्तमनेन सूक्तेन अभिषिन्दामीति। विष्णोः षोड्शोपचारक्षे त एव विष्णुः स प्राणः" इति श्रुतेः य एवम्भूतो विष्णुस्तमहं पूजनार्थमिह आवाहयामीति वाक्यशेषः। वेदान्तप्रतिपाद्यः श्रुतिस्मृतिप्रसिद्धः स एव पुरुषों रुद्रों विष्णुर्वा स पुरुष; किम्भूत इत्यपेक्षायामुच्ते सहस्त्रशीर्षेति।

सहस्रशब्दोऽत्र बहुत्ववाची असंख्यावाचक इत्यर्थः। न तु संख्यावचकः संख्यावचकत्वे तु सहस्राक्ष इत्यनेन विरोध; स्यात् नेत्रसहस्रद्वयेन च सम्भावरुत्वात् तस्मान्नेह संख्यावाचकः सहस्र शब्द इत्यनुसन्धेयं तेनायमर्थः। असंख्यामा सहस्राणीत्यत्र सहस्रशब्दस्य बहुवचानन्तत्वेन हुतौ प्रतिपादनादिहाप्येवं बोध्यं सहस्राणि असंख्यानि शिर्षाणि शिरांसि यस्य स सहस्रशीर्षा" (शीषाश्छन्दसीति पाणिनीयसूत्रे शिरः शब्दस्य शीर्षन्नादेश;) शिरोग्रहणं सर्वावयवोपलक्षणं तेन असंख्य सर्वावयवोपेत इत्यर्थ;। तथा सहस्राक्षः सहस्रमक्षीणि नेत्राणि यस्य स सहस्राक्षः अक्षिग्रहणं सर्वज्ञानेन्द्रियोपलक्षकं तेन असंख्यसर्वज्ञानेन्द्रियोपेत इत्यर्थः। तथा सहस्रपात् सहस्नं पादा यस्य सः सहस्रपात (संख्यासु पूर्वस्येति पादस्यान्तलोपः) पादग्रहणं सकलकर्मेन्द्रियोपलक्षकं तेन असंख्य कर्मेन्द्रयोपेत इत्यर्थः। त्रैलोक्योदरवर्त्तिनां सर्वप्राणिनां यानि शिरांसि बुद्धीन्द्रियाणि कर्मेन्द्रिक्षाणि च तानि सर्वाण्यपि तद्दहान्तः पातित्वात्तस्यैवेत्याशयः। तथा च श्रुतिः–

> ''विश्वतश्चक्षुरुत विश्वतोमुखो विश्वोबाहुरुत विश्वतस्पात् ।
> सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमो जनयन्देव एकः॥''[18]

इति, एतदेव गीतायां श्रीकृष्णचन्द्रं प्रत्युर्जनेनोक्तं तद्यथा–"अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतो ऽनन्तरूपम् ।" इत्यादि, संजोक्तिरप्येव गीतायामेव 'अनेकवक्त्रनयनमेकाऽद् भुतदर्शनम् । अनेक दिव्याभारणं दिव्योनेकोद्यतायुधम् ।।1।। दिव्यमाल्वाबरधरं दिव्यगनधानुलेपनम्। सर्वाश्चर्य्यमत्र देवानन्तं विश्वतोमुखम् ।।2।। इति। यथा परमेश्वरः सर्वेन्द्रिवाणि संयम्य तपोऽप्यत तथैववोपातकोऽपि सर्वेन्दिरणीति संवस्य एकाग्रचित्तविहितेन समाधिना जपादिना वा परमात्मचित्तरूपं तपः कुर्यादित्याशय;, "त्रिरूनतं स्थाप्य समं शरीरं इन्द्रीन्द्रियाणि मनसा सन्निवेश्य। ब्रह्मोड़पेन प्रतरेतविद्वान् स्रोतांसि सर्वाणि भयावहानीस्थादितैत्ततरीयश्रुतेः" सर्वद्वाराणि संयम्य मनो हृदि निरुद्धय च।" इत्यादि भगवदुक्तेश्च। "सर्वतस्पृत्वा" इत्यत्र तु संहितायां विसर्गलोपश्च छान्दसो ज्ञेय ।।1।।

> पुरुषएवेद ँ सर्व यद्भूतं यच्च भाव्यम् ।
> उतामृतत्वस्वेशानो यदन्नेनातिरोहति ॥2॥

उ.मा. पुरुष एव। पुरुषः एव इदम् सर्वम् यत् भूतम् यद च भाव्यम्। उत अमृतत्वस्य ईशानः यत अन्नेन अतिरोहति। स एव पुरुष; पूर्वपर्यायविशेषित एवा शब्दो नान्यः । इदं वर्तमानकं सर्वम् यश्च भूतमतीतम् यच भाव्यम् भविष्यत् तस्य कालत्रस्य ईशानः। न केवलं कालत्रयस्य ईशानः। उत अमृतत्वस्यापि मोक्षस्यापि। उतशब्दोऽपिशब्दार्थे। कस्मात् कारणात्। यत अन्नेन अमृतेन अतिरोहति अतिरोधं करोति । सर्वेस्वेश्वर इति ।।2।।

श. भा. इदं यत्किचिद्वर्त्तमानकालीनं, यद्भूतं यदतीतकालीनं, यच्च भाव्यं भविष्यत्कालीनं तत्सर्व पुरुष एव। तथा च वर्त्तमानभूतभविष्यत्कालस्वरूपो भगवानधिकृतरूप इति दर्शितम्।

उत किंच न केवलमेव किं तु यदन्नेन अदनीयेन भक्तादिना अतिरोहति-अतिशयेन जन्म स्थितिं च लभते तत्सर्व पुरुष एव। तथा च ये स्थावरजङ्गमा भक्ताद्याहारेण जन्म स्थितिं च लभन्ते, ये च स्थावरवृक्षशिलादयो जलपर्णरूपेणाहारेण जन्म स्थितिं च लभते तत्सर्वं पुरुष एव। तथा च ये स्थावरजङ्गमा भक्ताद्याहारेण जन्म स्थितिं च लभन्ते, ये च स्थावरवृक्षशिलादयो जलतर्पणरूपेणाहारेण जन्म स्थितिं च लभन्ते, सर्व एव ब्रह्मादिस्तम्बपर्यन्ताः पुरुषरूपा इत्यर्थः। तथा च श्रुतिः ''सर्व खल्विदं ब्रह्मे''ति। पुरुषः किम्भूतः? अमृत्वस्य ईशानः प्रभुः। मोक्षदातापि स एव पुरुष इत्यर्थः । यद्वा वर्त्तमानकालीनादि यद्वस्तुजातं तत्सर्व पुरुष एव परमेश्वरः। किञ्च यदन्नेनातिरोहति तेपामेतद्वस्तु अमृतत्वस्य मोक्षस्येशानः। इत्यन्वयः।।2।।

विशेषस्तु-''पृ. पालनपूरणयोः (जु.प.) तस्मात् ''पुरः कुषन्'' इत्योणादिके कुषन्प्रत्यये उदोष्ठपूर्वस्य इति उत्वे तस्य च उरणपरः इति रपरत्वे पुरुषाः इति पदं सिद्धयति। पिपर्ति पालयति सर्वमितिमुरूकाः, पिपर्ति पूरयति सर्वान् कामानिति वा पुरुषः, पूर्ण मनेन पुरुषेण सर्वमिदं जगदितिवा पुरुका; तदुक्तं श्रुतत्व ''यस्मात्परं नापरमस्ति किन्चियस्मान्नाछीयो न ज्यासइस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्ण पुरूशोण सर्वम् ।। इति अतोऽयमर्थः। योऽयं मगपतिरन्योवाऽमुकदेवः स पुरुष एव परमात्मस्वल्प एवेत्यर्थः। किन्च यदिदं दृश्यमानं वर्त्तमानकाली नं जगत् यच्च भूतं भूतकालीनं जगत तथा यच्च भाव्यं भविष्यतत्कालीनं जगत् तत्सर्व पुरुषा एव अष्टाभिर्धातुभिः पूर्यते इति पू. शरीरं तत्र पुरिशेते इति पुरिशयः पुरुषः सर्वगतः सवाधिपः सर्वपालकः सर्वकामपूरकश्च मम पूज्यः गणपति देवता इत्याशयः। ननु-यद्यय पुरुषो भूतभौतिकादिविश्वमिदमतोत्य स्थितो नदीमिव कूलं तथा चायमस्मात्तदूदेव भिन्नस्स्यादित्याशङ्क्य सर्वविश्वाभिन्नत्वेन पुरुषं प्रतिपादयति–यति = इदं-वर्त्तमानं विविधप्रत्ययगम्यं निखिमपि जगत, तत्सर्वं पुरुष एवं, न ततो भिन्नम्। यत् भूतं = अतीततं जगत् यच्च भाव्य=भविष्यं जगत् तदपि पुरुष एव न ततोऽन्यम् । न चैवमनित्यदुःखामयादिरुपनिखिलप्रपन्चेन सह पुरुषस्याभेदबोधने सति पुरुषस्याप्यनित्यदु;खाद्यात्मकतापत्तिरितिवाच्यम्–प्रपन्चस्य बाधे श्रुतेस्तात्पर्यात्, अतोऽत्र जगत्पुरुषयोर्बाधसमानाधिकरण्यमेवाभिप्रेयते, न तु मुख्यसामानाधिकरण्। तथाहि सर्पोऽयं रज्जुरेव इत्युक्ते न हि रज्जु; कृष्णवर्णो विषधरो भवति, तथा सर्वाधिष्ठानभूतेन पुरूषेण ब्रह्मणा प्रपन्चस्याभेदे प्रतिपादिते न हि पुरूषः प्रपन्वरूपो भवत्यपि तु पुरुषामात्रावशेष प्रपन्चस्य तु बाध एवावगतो भवति। कुत एतादशो व्यवस्था स्वीकृतेति चेत् ध्रुतिम एव।'' तत्सत्यं स आत्मा[19]'' सत्यस्य सत्यम्''[20] अस्तोत्येवोपलब्धव्यः''[21] असन्नेव स भवंति, असद ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेदसन्तमेनं ततो विदुः।[22] इत्यादि श्रुतिशतैस्सच्चिदानन्दस्य ब्रह्मपुरु,स्यैवास्तित्वप्रतिपादनात् । प्रपन्चस्य–''नेति नेति''[23] नेह नानस्ति किन्चन''[24] अतोऽन्यदार्त्तम्''[25] ''सलिल एको द्रष्टाऽद्वैतो भवति'' इत्यादि वाक्यशतैर भावबोधनात् । तथा च यदि स्रुतिप्रामाण्य स्वीकरोषि, तहयुक्तव्यवस्था त्वयाऽङ्गोकन्नव्या। अतएवापातप्रतिपन्नं एव

न तावच्छ्रूत्यर्थोवङ्गीकर्त्तव्यः । "कश्छन्दसां योगमावेद धीरः"[26] इति स्वयं श्रुत्या" छिनेत्यल्पस्रुताद्वेदः इति महाबारतस्मृत्या च वेदार्थस्वातिगहनत्वेन प्रतिपादनात् श्रुतिमन्वयमीमांसयैव तदर्थो निर्गीय ग्रहीतव्यः। तस्मादारम्भणाधिकरणन्यायेन पुरु,काव्यतिरेकेण सर्वस्व जगतोऽभावातु अपुरुषाप्रत्ययस्सर्दोवविद्यात्रः रज्जवामिव सर्पप्रत्ययः पुरुष एवैकः परमार्थसत्यः पूर्णद्विते न तद्यतिरिक्ति किन्चिदिति वेदानुनासनम् ।

उत = अपि चायं पुरुषंः, अमृतत्वस्य = अमरण धर्मकस्य-स्वस्वरूपावस्थानलक्षणस्य मोक्षस्य ईशानः = ईश्वरोऽधिपतिस्स्वामी। किन्थ यत – जीवदजातं, अन्ने = अदनीयेन हेतुना कृत्वा, अतिरोहति = उत्पद्यते, अधिवां वृद्धिं गच्छति वा, तस्य सर्वस्य ब्रह्मादिस्तम्बपर्यन्तस्य भूतग्रामस्य पेशानः = ईशन्धोलो नियन्ता पुरुषोऽस्तीति शेषः। "इतः प्रदानाद्धि देवा उपजीवन्ति।' इति श्रुत्या ब्रह्मादिदेवस्याप्यन्नेनैव स्थित्यवगमात् श्रद्धा यत् = यस्मात्, अन्नेन = प्राणिनां भोग्येन फलेन निमित्तभूतेन, अतिरोहति स्वीयां कारभाव तथामतिक्रम्य परिदृश्यमानां कार्यभूतां जगदवस्थां प्राप्नोति, तस्मात् पुरुष एवेद सर्वमित्युपपद्यते। ननु–एवं कार्यात्मना सम्भूतत्वात् पुरुषस्य परिणामित्वं स्यादित्याशङ् कथाह–अमृतत्वस्य = अमरण धर्मस्य – नित्यशुद्धबुद्धमुक्ता ननदानन्ताविकृतस्वभावस्य ईशानः = स्वामी, सदा तदमृतत्वं स्वशेऽतिष्ठते न तस्मादविद्याविजृम्भितकार्यावस्थायामपि जातुचिद वियुज्यते। अतएव 'मृत्तकेत्येव सत्यम्" इत्यादि श्रुतिभिः परमकारणस्यैवेकस्य सत्यत्वेनाविृता खण्डेकरसत्वं, "वाचारम्भण विकारो नामथेयम् इत्यादिश्रुतिभिः कार्यात्मकस्य विकारजातस्य वाचारम्भणत्वेनानृतत्वन्च प्रतिपाद्यते । अतस्तस्याः कार्यावस्थायाः कादाचित्कत्वेन काल्पनिकत्वेन चावस्तुत्वमवगम्यते। यद्यपि तत्त्वान्यत्वाभ्यामनिर्वचनीयेनाति धाकल्पितेन नामरूपलक्षणेन द्वैतप्रपन्पेण पुरुषः परिणामादिर्सर्वव्यवहारास्पदत्वं प्रतिपद्यमान इव प्रतिभाति, तथाप्सयं पारमार्थिके न स्वेन रूपेण सदा सर्वव्यवहारातोतोऽपरिणत एवातिष्ठते। नहि तिमिररोगोपहतनयेनानेक इव दश्यमानश्चन्द्रमा अनेक एव भवति। अतः पुरुषस्य वलतुतो न परिमामित्वाङ्घागन्थोऽपि प्रसज्यत इति भावः।

यद्वा अमृतत्वस्य = अपवर्गस्यमोक्षस्वेशान; प्रभुः, तत्प्रदातृत्वात् । यः परमेश्वरो मोक्षस्यापि प्रभुस्तस्याज्य्यप्रभुत्वे किं वक्तव्यम् । ननु – अस्ति किल स्वर्गादिलक्षणमप्यमृतत्वम्। तथा चात्र कस्या मृत्वस्यायं प्रभुर्वण्यते? किं स्वर्गाधमृतत्वस्याथवा तस्मात्दुत्कृष्टस्यापवर्गल-क्षणस्यामृतत्वस्येत्येकेतर निश्चयाभावात्तत्यां विचिकित्सायामाह-यत् - अमृत-त्वं अन्नेन=अन्येन वर्णविकारादिलक्षणमिरुक्तत्वभ्युपगमादत्र यकारस्य नकार प्रतिभासः। स्वर्गादिलक्षणं देवानाममृतत्वमधिखं, किं वेदमपवर्ग लक्षणमित्यन्येन स्वर्गादिलक्षणेन सह विवक्षायां तदति = अतिक्रम्येदममृतत्वं अपवर्गमोक्षलक्षणं रोहति–अर्ध्व उत्कृष्टं भवति।

अथवा–इदमिति दृश्यत्वात् भूतं भ्वयमिति विभक्तत्वाच्च हेतोर्भतमाविवर्तमानात्मकस्यास्य निकिलस्यापि द्वैतप्रपन्वस्य पुलषविद्याविलसिततया रज्जुसर्पवदविद्यात्मकत्वात् पुरुष्काविद्यावि

या बादे सति "अधिष्ठानवशेषो हि नाशः कल्पित वस्तुन;" इति न्यायेन सर्वकल्पनाथिष्ठानपुरुषात्रमेवेदमिति विज्ञेयम्। अतएव-उत अपि, अमृतकत्वस्य = प्रतिभासमात्रसंसार-तत्कारणाविद्यानिवृत्तिलक्षणस्य मोक्षस्पेशानः-अहं ब्रह्मा स्मीति महावाक्य निदिध्यासनजनिताखण्डब्रह्माकारवृत्त्यारूढ़स्सत्यसुखसंविन्मात्र व पुरीश्वरोऽविद्या तत्कार्यसंसारभ्रमनिवर्तकत्वादमृतत्वस्पेशान इत्युच्यते। यत् = दृश्यजातं अन्नं = अज्ञानं अद्यते = बाधते सम्यक् ज्ञानेनेति व्युतपत्त्याऽन्नमत्र दृश्यकारणमज्ञानमित्युच्यते । तेन = अज्ञानाक्येनात्रे हेतुना कृत्वा रोहति = जायते उत्पद्यते, किंरूपेम रोहतीत्यत आह–ति= अतीत्य वस्तुस्वाभावमतिलङ्घयाच्छाय सच्चिदानन्दाद्वैतवस्तु विपरीततासज्जऽदुःखद्वैतरूपेण तस्वापि दृश्यप्रपन्चस्य सत्तास्फुरणप्रदत्वेनाधिष्ठान्तदीशानो नियन्ता परमेश्वर एव। यद्वा यत् = पुरुषतत्वं, तत् अज्ञानाख्येनाऽन्नेन अति – स्वीवपरीतवियदादिकार्यरूपेण रोहति = जायते स एवामृतत्त्वस्येशान इत्यन्वयः।

एतावानस्य महिमातो ज्यायंश्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपाददस्यामृतं दिवि ।।3।।

उ. भा. ॐ एतावानस्य । एतवान् अस्य महिमा कतः गया मान् च पुरुषः पादः अस्य विश्वा भूतानि त्रिपात् अस्य अमृतं दिवि। अस्य पुरुषमस्य पूर्वोक्तविशेषणविशोषितस्य एतवान महिमा एतदेव महत्त्वमस्य । अत कारणात् ज्यायाँ, पुरुषः महानित्यर्थः। कस्मान्महत्वामयाताम्। यस्मा त्पादः एकोंशः अस्य पुरुषस्य । विश्वा भूतानि विश्वानि चतुर्दशभुवनसमूहे यानि चतुर्धा भूतानि तान्येकोशः। त्रिपात्पुनः त्रयोंशाः अस्य पुरुषस्य अमृतम् ऋग्यजुः सामलक्षणम् आदित्यलक्षणं वा दिवि द्योतते इति ।।3।।

श. भा. अस्य पुरुषस्य एतावान्महिमा यत्पूर्वकण्डिकोक्तवत्सर्वदेशकालव्यापित्वं संसारापवर्गप्रभुत्वं नाम। मनोरमात्कारणात्पुरुषः ज्यायान् ज्येष्ठः पुरुषोत्तमः। किञ्च अस्य एकः पादः विश्वा भूतानि। चरांचरात्मकानि सर्वाणि भूतानि। अपरं च त्रिपात् पादत्रयम् अस्य दिवि स्वर्गे आकाशे वा पादत्रयं ऋग्यजुः सामात्मकम् । पादचतुर्थादि अस्य पुरुषास्यावांशष्टम् । त्रिपाद्स्वरूपम् किम्भूतम् ? अमृतं विनाशरहितं मोक्षद्वारं सूर्यमण्डलभेदनाद्वारेण गच्छतां मुमुक्षूणां परमात्मनि लयान्मोक्षद्वारम् - इत्यर्थः। यद्वा त्रिपाद्विज्ञानमयानन्दरूपं दिवि विद्योतने स्वमहिम्नि स्वर्गे द्वारे व्याप्य तिष्ठतीत्यर्थः। यद्वा योगिध्येयं तदेव त्रिपात् दिवि सत्यसङ्कल्पादौ गुणे स्थितिमित्यर्थ ।।3।।

विशेषस्तु-अतीतानागतवर्त्तमनकालसम्बद्धं जगधावदस्ति, एतावान् सर्वोवपि प्रपन्चः अस्य पुरुकास्य ब्रह्मणः महिमा = विभूतिविस्तारोविवर्त्तः-स्वकीय सामर्थ्यविशेषाद्विलसितः, न तु वास्तवं स्वरूपम् । वास्तवपुरुषस्तु अतः = अस्मात्, महिम्नो जगज्जालात् वाचाररम्भाणमात्रात्, ज्यायान् = अतिशयेनाधिको महत्तरः परमार्थरूपोऽविकारः, पूरुषः=पुरुषः,

सर्वपूरणआत्पुरिशयनाच्च। तदुभयं स्पष्टीक्रियते–तस्यास्य पुरुषस्य पादः-चतुर्थांशः सर्वाणि भूतानि कालत्रयवर्तीनि पृथिव्यादीनि स्थावरजङ्गमानि। अस्य परिशिष्टं स्वरूपं त्रिपात्-त्रयः पादा अस्य तत् । अमृतं = अविनाशि दिवि = द्योतनवति-स्वप्रकाशे स्वात्मस्वरूपेऽवस्थित-मित्यर्थः। यद्यपि सत्यं ज्ञानमन्तं ब्रह्म'' इत्यादिश्रुतिभिराम्नांतस्यानन्तस्य परब्रह्मणो निरंशस्य इयत्ताया अंशक्तायाश्चाभावात् पादचतुष्टयं निरूपयितु मशक्यं, तथापि तदिदं जगत् कृत्स्ने ब्रह्मणि तदेकदेशे वावर्त्तते? इति निष्प्रदेशेऽपि प्रदेशभागमारोप्य पृच्छशिशष्यस्याभिप्रायानुसारिण्या भाषया जगदिदं शुद्धब्रह्मरूपा पेक्षयाऽत्यल्पं जगदपेक्षया तद् ब्रह्मणात्यधिंकां निरवधिकमिति विवक्षया, वथा कर्षापण श्चुर्था विभज्य एकस्मात्पादात् पादत्रयीकृतो महान् एवं पुरुषार्थरूप; पुरुषा एकपादत्वेन कल्पतातप्रमपन्चात् पादत्रयोपलीक्षतो महानिति विवहाया वा श्रुतेः पादत्वोपन्यास इति भावः।

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः। ततो विष्वङ्ग व्याक्रामत्साशनानशने अभि ।।4।।

उ.भा.- त्रिपादूर्ध्वः । त्रिपात् ऊर्ध्वः उत् ऐत् पुरुषः पादः अस्य इह अभवत् पुनः। ततः विम्वङवि अक्रामत् साशनानशने अभिम यस्मादयं पुरुषः त्रिपात् त्र्यंशभूतः उर्ध्वः उरिष्टात् उदैत् देदीप्यमानस्तिष्ठति। अस्य च पुरुषस्य पादः एकोंशः इह त्रैलोक्ये बीजभूतं चतुर्षु भूतेषु अमृत् भूतम् । ततः तस्मात्कारणात् विष्वङ भुवनकोशं व्यक्रामत् उत्पन्नमित्यर्थः। तस्यादेव पुरुषात् । साशनानशने अभि साशनं स्वर्गम् अनशनं मोक्षम् सर्व जगत्स्वर्गं प्रति मोक्षं प्रति च तस्मादेवोत्पन्नमित्यर्थः।।4।।

श. भा. अस्य चतुष्पादलक्षणस्य पुरुषस्य योऽसौ त्रिपात् पादत्रयस्वरुप; ऋग्यजु; सामलक्षणो भगवानादित्य; सोऽभ्युदैत् उदितः किम्भूतः? ऊदर्ध्व; दिविस्थः। यद्वा कर्मबन्धनिबन्धनानां स्थावरजङ्गमादीनामुपरि भूत इत्यर्थ;। किञ्चास्य चतुष्पादलक्षणस्य पुरुषस्य पादो लेशः जगद्रूपश्चतुर्थाश; हिरण्यगर्भतया जगति अभवत् प्रथमं सत्तामात्रेणावस्थानमकरोदित्यर्थः जगति किम्भूते? साशनानशने-भोक्तरि अभोक्तरि च। येषां च सुकृतदुष्कृतेषु अधिकारस्ते भोक्तार; ब्राह्मणादयः । येषामनधिकारस्तेऽभोक्तारो वृक्षकृमिकीटादयः। तदेवं कर्माधिकारिणि अनधिकारिणि च सर्वत्र जगति अपरपाद; सभागात्रेणानिदित्यर्थः। ततस्तदनन्तरं विष्वङ् व्यक्रामत् व्याप्तवान सर्वशरीराणि व्याप्यावस्थानमकरोदित्यर्थः। यद्वा प्रथमं जगति सत्तामात्रेणाभवत्। ततः। स्पष्ट सर्वत् साशनानशने भोक्तारमभोक्तारं च व्यक्रव्याप्तवान् प्राप्तवान्। तत्र विपुशब्दपूर्वोद् अञ्चु गतिपूजनयो'' रित्यस्माद्धातोः क्विचि विष्वङ्गिति रूपम् । अग्निशब्देन व्यपदितेनोदै-त्यन्वेति ।।4।।

विशेषस्तु-योऽवं त्रिपातुपुरुषसंसारसंस्पर्शरहित; पूर्णो निर्ऽिकारो ब्रह्स्वरूपः, ऊर्ध्वः-असमादज्ञानात्तक्कार्यत्संसाराच्च बहिर्भूतोऽत्रत्यैर्मुगदोषैरस्पृष्टस्सन् उदैत्-उत्कर्षेण तिष्ठति ।

तस्यास्य पुरुषस्य पादः =- लेखा-अंशः-जगद्रुपः, इह = मायायामधटघटनापटोयस्यं तदाश्रयविषयायां पुनः अभवत् = पुनः पुनस्सृष्टि संहाराभ्यां प्रादुर्भावति तिरोभवति च । सर्वस्य जगतः परमात्मलेशत्वं भगवान् व्यासोऽपि स्मरति भगवता श्रीकृष्णेन गीतास्वभिहितं विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् । इति । ततः मायायामामत्यानन्तरं, विष्वङ्विषु सर्वत्रान्चतिप्रादुर्भाऽतीति विष्वङ् देवमनुजर्तिगादिरूपेण स्वयमेव विविधो भूत्पा, आशानाशने = अशनेन-भोजनेन सह वर्त्तमानं साशनं अशानादिव्यवहा–पेतं चेतनप्रणिजातं, अनशनं=तद्रहितमचेतनं गिरिनधादिकं जडसमुदायं ते = उभे, अभि = अभिलक्ष्य व्याक्रामत् = स्वयमेव विविधो भूत्वा व्याप्तवानित्यर्थः। अत्र 'विष्वङ् व्यक्रामदिति वीनर्देशात् सर्वस्य जगतः पुरुषकात्वेन पुरुषस्य तदध्यासाधिष्ठानत्वेन तद्वयतिरेकेगाभावात् "पुरुष एवेद सर्वमिति सर्वाभेदपरं केवलाद्वेतनिबन्धनमेव समानाधिकरण्यं प्रत्येतव्यम् ।" न तु तद् द्वितीयमस्ति" "मायामात्रमिदं द्वैतमद्वैतं परमार्थत;"। नेह नानास्ति किन्चन" अकथैवानुद्रष्टव्यम् । इत्यादि श्रुतुभिः–

"सर्वोपाधिविनिर्मुक्तं चैतन्यं सर्वगं शिवम् ।
तदेवेदमिदं विश्वं तस्मादन्यन्न विद्यते ॥
तत्त्वरूपातिरेकेण न किन्चदिह विद्यते ।
तत्स्वरूपातिरेकेण न किन्चिदिह विद्यते ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥
इत्यादिस्मृतिभिश्चतदेव विनिर्णोतमस्त ।

ततो विराडजायत विराजो अधि पुरूषः । स
जातो अत्यरिच्यत पश्चाद्भमिमयो पुरः ॥5॥

श. भा. ततः पुरुषात् हिरण्यगर्भात् विराट् ब्रह्मा अजायत। तस्माद्विराजः ब्रह्मणः सकाशात् पुरुषो मनुरभ्यजायत। स मनुर्जात; सन्पुराऽग्रे पूर्यन्ते सप्तभिर्द्धातुभिरिति पुरः शरीराणि वा ससर्ज । पश्चाद्यपि भूमिम अन्यरिच्यत अतिरिक्तो भूमासक्तोऽभवत्। भूमिपदं देशोपलक्षणार्थं, पुरः पश्चादिति जीवनभावादूर्ध्वकालोपस्थापकं तेन कचिदपि देशे काले वा तस्य मनोः पुत्रपौत्रादिसंबन्धिभिः सदृशी नोभूदित्यभिप्रायः ।।5।।

उ. भा.-ततो विराट् । ततः विराट् अजयात विराजः अधिपुरुषः । स जात; अति अरिच्यत् पश्चात् भूमिं अथो पुरः । तस्मादेव पुरुषात् विश्वोत्पत्तिः । तत्र पूर्वं विराट् अजायत्। विराजः अधिपूरुषः प्रधानं तेजः । स क्षेत्रज्ञः ब्रह्मा सृष्टिकृत् जातः सन् अतिरिच्यते । सोऽभितः पश्चात् अस्मात क्षेत्रज्ञात् ब्रह्मणः भूमि पृथिव्यादौ जाता उत्पन्ना इति। अथोऽनन्तरम् पुर; शरीराणि पुराणि चर्तुविधानि भूतानि अजयान्त । पुत्रादीनि तेनैवोत्पादितानि एवमेंकोशः तैनेव सर्व विश्वमुत्पादितमस्ति ।।5।।

विशेषस्तु-ततः तस्मात् आदिपुरुषात्–परमेश्वरात् विराड = ब्रह्माण्डेहः, आजायत = जतः विविधं राजन्ते वस्तून्यत्रेति विराट् । विराजः-अधि-विराडदेहस्वोपरि तमेव देहमथिकरणं कृत्वा, पुरुषः = तद् देहाभिमानी, एक एव पुमान् अजायत = योऽयं सर्ववेदान्तवेद्य; परमात्मा स एव स्वमायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवदित्यर्थः। एतच्चार्थवर्णनृसिंहोत्तरतापनोये स्पष्टमुक्तम्..." स वा एका भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्टता प्रविश्यामूढ़ों मूड़ इव व्यवहरन्नास्ते माययैव। इति । किन्च च जातो विराट् पुरुषः अत्यरिच्यत = अतिरिक्तों देवतिर्यङ्ग मनु-ध्यादिरूपोऽभूत्। पश्चात् देवादिजोवभावादूर्ध्य भूमिं ससर्जेति शेषः। अथो=भूमि-सृष्टेरनन्तरं तेषां जीवानां पुरः ससर्ज। पूर्यन्ते सप्तभिर्धातुभिरिति पुरः शरीराणोत्यर्थः।

केचन् स पुरुषों जातमात्र एव भूमिं = भूयादोर लोकान् पश्चात् पुरः = पुरस्ताच्च व्याप्य अत्यरिच्यत = अतिक्रान्तवान् इति व्याचक्षते । मानवे च धर्मशास्त्रे विराज उत्पत्तिरेवं, प्रकारा प्रतिपाद्यते तद्यथा–

"द्विधा कृत्वाऽऽत्मनो देहं अर्धेन पुरुषोऽभवत् ।
अर्धेन नारी तस्यां च विराजमसृजत्प्रभुः ।। इति ।।

तदेतत्परिगीयते–"अवधूतो शिवेन्द्र स्वामिना–

"खोलति पिण्डाण्डे भगवान् खोलति पिण्डाण्डे ।
हंसस्सोऽहं हंसस्सोहं हंसस्सोऽहं सोऽहमिति ।।
परमात्माऽहं परिपूर्णोऽहं ब्रह्मैवाहमहं ब्रह्मेति ।
बुद्धिमनिश्चितत्ताहंकारे भैंजलतेजोगगनसमीरे ।।
इत्यादिकमिति ।

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूंस्ताश्चक्रे वायव्यानाराण्याग्राम्याश्चये ।।6।।

उ. भा.–तस्माद्यज्ञात् । तस्मात् यज्ञात् सर्वहुतः संभृतं पृषदाज्यम् । पशून् तान् चक्रे वायव्यान् आरण्याः ग्राम्याः च ये । यथा अग्निष्टोमाख्यात्तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्। तेन वायव्यान् पशून् आरण्या ग्राम्याश्च ये तान् कृतवन्तः । एवमात्मयज्ञात् सर्वहुतात्पूरितात् उपन्नेन योगिनः सर्वान् पशून् सर्वाणि भूतजातानि करतलवत्पश्यन्ति । पश्यन्ति किल ज्ञानतेजसा भूतजातानि ।।6।।

श. भा.–तस्मात्पूर्वोक्त पुरुषमेधाख्ययज्ञात् सर्वव्यापकात्तपुरुषचतुर्थपादात् सर्वहुतः सर्वैर्हयमानत्वाद्ययज्ञस्वरूपात् पृषपादज्यं हविः सम्भृतं समुत्पन्नं ततपृषदाज्यं तान् चक्रे पशूंश्चकार। तान् कान् ? ये आरण्या ग्राम्याश्च । आरण्यामृगादयः । ग्राम्याश्छागादयः। तान् किम्भूतान्? वायव्यान् वायुदैवत्यान् ।।6।।

विशेषस्तु–सर्व हूयते यस्मिन्सः सर्वहुत् तस्मात्पुरुषमेधाख्यात् यज्ञात पृषदाज्यं दधिमिश्रामाल्यं सम्भृतम् सम्पातिं दध्वाज्यादि भोग्यजातं सम्पादितमित्यिर्थः पुरुषेणेति शेषः। तथा स पुरुषः वायव्यान्वायुदेवतान तान् प्रसिद्धान् प्रशून् चक्रे उत्पादितवान्'' अन्तरिक्षदेवत्या; खलु वै पशव'' इति श्रुतेः। अन्तरिक्षस्य च वायुदेवतवात्पशूनां वायु देवत्वम् । तान् मान् ये चारण्याः अरण्ये भवाः हरिणादयः ये च ग्राम भागवाशपादयस्ता न्यशूनश्चक्रे ।।

तस्माद्यज्ञात्सर्वहुतऋचः सामनि जज्ञिरे ।

छन्दासिँजज्ञिरे तस्माद्यजुस्तस्मा दजायत ।।7।।

उ.भ.–तस्माद्यज्ञात। तस्मात् यज्ञात् सर्वहुत; ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्मात् यजुच तस्मात् अजायत। तस्मादेव यज्ञात्सर्वहुतः प्रज्वलितात् यथा ऋचः सामानि यजूंषि च देवा उत्पादयन्ति छन्दांसि च। एवमात्मयज्ञे प्रणवेन दीपिते स्वयमेव ज्ञानादधिधिष्ठतानि भवन्ति। एवं येन परमामनि ज्ञायते सर्वे जग्धाः (?) सर्वं वाङ्मयं ज्ञानं भवतीति ।।7।।

श. भा.–तस्मात्सर्वहुत; सर्वैर्हूयमानयद्यज्ञपुरुषात् ऋचः ऋग्वेदाः समानि सामवेदाः जज्ञिरे जाताः तस्मादेव च्छन्दांसि गायत्री प्रभृतीनि । जज्ञिरे-जातानि । तस्मादेव यजु अजायत आसीदित्यर्थः ।।7।।

विशेषस्तु–सर्वहृतः तस्मात् यज्ञात् यज्ञपुरुषात् परमात्मन सकाशात् ऋचः नियताक्षराः नियत पादावसानाः सामानि प्रगोतानि मन्त्रवाक्यानि च जज्ञिरे प्रादुबभुवुः। तथा छन्दांसि 'दाछनच्छन्द इत्युक्तं वाससौ इव चाकृतेरि ति योगियाज्ञवल्क्वचनाद्वस्त्रवदाच्छादकानि गायत्रादीनि च तस्मात् यज्ञादेव जज्ञिरे तस्मादेव यज्ञपुरषात्परमात्मनः सकाशादुत्पन्नोत्यर्थः किन्धु तस्मादेव यज्ञपुरुषात्परमात्मनः सकारादेव यजुः अनियताक्षरमनियतपादावसानमपिसकल मन्त्रजातम् अजायत उत्पन्नम् द्वदित्यर्थः। ऋग्युजः सामभि श्छन्दोभिश्च विना नहि यज्ञा सम्पद्येरन् अतएव यज्ञसम्पादनार्था तानि सर्वाणि स्वतंपसः सामर्थ्येन स्वत एवोत्पादितवानित्याशयः'' स अकामयत स तपोऽअतप्यत तपस्त्वा इद सर्वभसृजत् यदिदं किन्चन स्वयं विश्वमिद सर्व स्वस्मादन्यत्र किन्चन् इति, एवं वा अरेऽस्य महतो भूतस्य निश्वसितमेतयदृग्वेदो, यजुर्वेदः सामवेदः इत्यादि च श्रुतेः ।

तस्मादश्वा अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ।।8।।

उ. तस्मात् । तस्मात् अश्वाः अजायन्त ये के च उभयदतः । गावः इ जज्ञिरे तस्मात् तस्मात् जाताः अज़ावयः। तस्मायज्ञात् अश्वाः अज़ायन्त उत्पन्नाः। तथा ये के चाश्वातिरिक्ता गर्दभादयोऽश्वतराश्च च उभयादतः उभोर्मा गयोर्दन्ता येषां ते उभयदतः। छान्दसं दीर्घत्वम्। ऊध्वाघोमापगोर्दन्तयुक्ताः सन्ति तेऽप्यजायन्त। तथा ह स्फुटं तस्मायज्ञात् गाव; च जज्ञिरे। किंच तस्मात्द्यज्ञात् अजावयः अजाः अवयश्च ज़ाताः । नहि पशुभिर्विना यज्ञः सिध्येत्।।8।।

तस्माद्यज्ञात्सर्वयज्ञरूपान् अश्वाः अजायन्त । न केवलमश्वा; किन्तु ये के चोभयादतः। ये के चन[27] उभयतो दन्ताः पशवः अश्वादयः तेऽप्यजायन्त-जाताः। तस्मादेव गावः जज्ञिरे-जाताः। तस्मादेव अजा अवयश्च जाताः। अज्ञाः छागाँ अवयो मेषाः उभयादत इति 'अन्येषामपि दृश्यते'' (पा. 6/3/137ः इति दीर्घः। गावो ह। हकारः समुच्चयार्थः । अत्र कण्डिकात्रये यत्किकिञ्चिद्धविरात्मकं विध्यर्थवादमन्त्राश्रया वेदाश्च पुरुषोत्तमात्मपुरुष मेधयज्ञस्वरूपादेव सर्व जातमिति वाक्यार्थः ।।8।।

विशेषस्तु–तस्मात् पूर्वोक्तात् प्रसिद्धात् यज्ञा त ज्ञपुरुषात् व्यापकात् परमात्मन ततसकाशात् अश्वा अजायन्त उत्पन्न बभुवुः। तथा ये च अश्वव्यतिरिक्ता भयादतः उभयतो दन्ताः उभयभागयोर्दन्ता येथां ये उभयदन्त इति विग्रहे ''छन्दसि चेति'' दतन्तस्य दत्रादेशो दीर्घश्च छान्दसो बोध्यः। उर्द्धाधोभागयोर्दन्तयुक्ता ये गर्दभादयोऽश्वेतराश्च सन्नतीति शेषः । तेऽपि पशवस्तसत् यज्ञपुरुषात् परमात्मन; सकाशादेव जज्ञिरे सन्जाता इत्यर्थः। अपि च अजावयः अजाश्चक अवयश्च इति अजावयंः छाशादेव जज्ञिरे सन्जाता इत्यर्थः। अपि च अजावयः अजाश्चक्र अवयश्च इति अजावयः छाशमेषा अपि पशवः तस्मात् यज्ञात् यज्ञपुरुषात् व्यापकात्परमात्मन सकाशात् जाता उत्पन्ना बभूवुरित्यर्थः। न चेभिः पशुभि–र्विना यज्ञः संपद्येत। अतएव यज्ञसम्पादनार्थ परमे वरः स्वशक्तितः स्वयंमेतान् पशुनूत्पादितवान् इत्यर्थः।

तं यज्ञं बर्हिषि प्रोक्षन्पुरुषं जातमग्रतः।
तेन देवा अयजन्य साध्या ऋषयश्च ये ।।9।।

उ. भा.- तं यज्ञम् । तम् यज्ञम् बर्हिषि प्रौक्षन् पुरुषम् जातम् अग्रतः । ते देवाः अयजन्त साध्या; ऋषयः च ये । यथेन्द्रेण तत्र यज्ञे अग्निष्टोमाख्ये बर्हिया प्रोक्षितः पुरुषो जातः तद्वदात्मयज्ञे बर्हिषा प्राणायामेन दीपितेन तस्मिन्पुरुषो जातः। ज्ञानमुत्पद्यते दिव्यम् । अग्रतः प्रथमतः। तेन देवा इन्द्रादयः साध्याश्च ऋषयश्च यथा अयजन्त। तथा देवा योगिनः कपिलादयश्च साध्याश्चापरे ऋषयः। ऋषयश्चाप्येतेनैव प्रणवाधिष्ठितेन पुरुषेमात्मयज्ञं कृतवन्त इति ।।9।।

श. भा.–तं पुरुषं यज्ञ साधनभूतं बर्हिषि संस्थाप्य देवा ब्रह्मप्रभृतयः साध्याः साध्यानामानः गणदेवताः ऋषयः मरीचिप्रभृतय; प्रौक्षन प्रोक्षितवन्तः। किम्भूतम् ? अग्रतः सृष्टे पूर्वजातं पुरुषत्वेनेत्यर्थः। प्रागुक्तं प्रथमत; जातं तस्मात्तदानीममन्यहविरभावे स्वयमेव हविरासीदित्यर्थः। न केवलं प्रौक्षन् किं तु तेन पुरुषेण यज्ञेन यज्ञसाधनभूतेन अयजन्त यागं कृतवन्तः । अत्र कारणे कार्य्योपचारात् यज्ञेन यज्ञसाधनभिधीयते। प्रौक्षन् ग्रहणं सकलसंस्कारोपलक्षणार्थम्। तथा च पुरुषं पृषदाज्यादिरूपं यज्ञसाधनभूतं प्रोक्षणादिसंस्कारैः संस्कृत्य तेन पृषदाज्यादिरूपेण देवा यागं कृतवन्त इति वाक्यार्थः ।।9।।

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत्कि बाहू किमूरू पादा उच्येते ।।10।।

उ. भा.—यत्पुरुषम् । यत पुरुष व्यदधुः कतिधा व्यकल्पयन् । मुखम् किम् अस्य आसीत् किं बाहू किम् उरू पादौ उच्येते। यत्पुरुषम् देवा इन्द्रादयः तस्मिन् यज्ञे व्यदधुः कृतवन्तो यथा। तद्वत् योगिनः आत्मनयज्ञे पुरुषं ज्ञानम् यत् ज्ञानान्तं तत्कृतवन्त कतिप्रकारं विकल्पितवन्तः। तस्यैवंविधस्य किं कौ बाहू कौ उरू पादौ उच्येते उच्यन्तमित्यर्थः। ब्राह्मणक्षत्रियवैश्यशूद्राः स्थिता इत्यर्थः ।।10।।

श. भा.—प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्ना उच्यन्ते। प्रजापते; प्राणरूपादेव यत् यदा पुरुषं व्यदधु कालेनोदपादयन् । तदा कतिधा कतिभि; प्रकारैर्व्यकल्पयन् विविधं कल्पितवन्तः । अस्य पुरुषस्य मुखं किमासीत् ? किं बाहू उरू चास्तां? किं च पादावपि किमास्तामित्यर्थः।।10।।

विशेषस्तु—तं यज्ञमिति त्राणा वै देवाः इति श्रुतेः । दीव्यन्तीति देवाः तपसा द्योतमाना; साध्याः सृष्टिसादन योग्याः मरीच्यादयः तथा ऋषयश्च ये अन्येऽपि कपिलादयो मनुषोय ये तदानीमासन् तेऽयीत्वर्थः अग्रतो जातं सृष्टेः पूर्वं प्रथमोत्पन्नं "सत्यं ज्ञानमनन्तं ब्रह्म, नेह नानास्ति किन्चनेत्यादिश्रुतिप्रसिद्धं तंयज्ञं यज्ञसाधनभूतं प्रणवाधिष्ठितं पुरुषंबर्डिषी प्रकृतौ नियायेति शेषः। प्रोक्षन् प्रोक्षणसंस्कारवत्संस्कृतवन्तः । तेन संस्कृतेन प्रणवाधिष्ठितेन पुरुषेण अयजन्त आत्मायं कृतवन्तइत्यर्थः । तद्वदुपासका अपि प्रणवाधिष्ठितं पुरुषं बर्डिषि आत्मयज्ञसाधनभूते हृत्कमलमध्ये निधाय प्रोक्षणसंस्कारवत संस्कृत प्रणवाधिष्ठितेन पुरुषोणात्मयज्ञं कुर्युरिति तात्पर्यार्थः । आत्मोपासकाः यस्मिन्पुरुषो पशुत्वाभाव्यतेन प्रगवाधिष्ठित पुरुषेणात्मयागं कुर्वन्ति इत्याशयः ।

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । उरू
तदस्य यद्वैश्यः पद्भ्या ँ शूद्रो अजायत ॥11॥

उ. भा.—ॐ ब्राह्मणोऽस्य। ब्राह्मणः अस्य मुखम् आसीत् बाहू राजन्यः कृतः। अरू तत् अस्य यत् वैश्यः पदभ्याम् शूद्र; अजायत। अस्य यज्ञोत्पन्नस्य पुरुषस्य के केचिब्राह्मणाः: ते मुखम् आसीत् । ये क्षत्रिया; ने बाहूकृताः। ये वैश्याः तें अस्य उरू कृताः । ये शूद्रा ते पदभ्याम् अजायन्त इति कल्प्यन्ते तद्स्योत्पन्नत्वादिति। एवमेतेऽवयवाः शिरः प्रभृतय; पुरुषस्य विद्यन्ते नान्ये इति ।।11।।

श. भा.—ब्राह्मण इति। पूर्वकण्डिकायां स्तुत्यर्थं विकल्पः कृतः आकाङ्क्षोत्यापनाय। अत्र स्तुतिमाह-अस्य पुरुषस्य मुखं ब्राह्मण आसीद्बभूव। बाहू राजन्यः क्षत्रियः कृतः । आर्थादीश्वरेणैव अस्य उरू यत्तद्वैश्यः कृतः। एतेन ब्राह्मणादयः अस्य मुखादिभ्यो जाता इति बोद्धव्यम् । अग्रे तथा दर्शनात्पद्भ्यां शूद्रः अजायत। अयमेव ब्राह्मणादिचतुष्टयरूप इति वाक्यार्थः।।11।।

विशेषस्तु–अस्य-पुरुषस्य प्रजापतेर्मुखं आसीत, राजन्यः=क्षत्रियः बाहुकृतः = बाहूरूप आसीत्। अस्यपुरुषस्य यौ उरु = तद्रूपो वैश्य आसीत्, पद्भ्यां शूद्रोऽजायत इति स्पष्टमेव,। अत्र प्रजापतेः पुरुषस्य मुखादिरूपेम प्रतिपाद्यमाना; ब्राह्मणांदयः के सन्ति? तत्र केचन मन्यन्तेयोऽयं ब्राह्मणत्वजातिविशिष्टः पुरुषोस्सोऽ्यमस्य प्रजापतेर्मुखामासीत्-मुखादुत्पन्न इत्यर्थः। योऽयं राजन्यः क्षत्रियजातिस्स बाहुत्वेन निष्पादितः-बाहुभ्यामुत्पादित इत्यर्थः। तद् = तदानीं यौ प्रजापतेरू, तद्रूपो वैश्यस्सम्पन्न; उरुभ्यामुत्पादित इत्यर्थः। तथा पद्भ्यां शूद्र उत्पन्नः इयं च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तितैत्तिरीय संहितायास्सप्तमकाण्डे–" स मुखातस्त्रिवृतं निरमिमीत" इत्यादौ स्पष्टमान्माता । अतः प्रश्नोत्तरे उभे अपिउत्पत्तिपरमतैव योजनोये। इति ।

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।

श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥12॥

उ. भा.– चन्द्रमा मनसः चन्द्रमाः मनसः जातः चक्षौः सूर्य; अजायत। श्रोत्रात् वायुः च प्राणः च मुखात् अग्निः अजायत। तस्यैवंविधस्य यज्ञोत्पन्नस्य पुरुषस्य। चन्द्रमाः मनसः चेतसः जातः अजायतेति कल्पना। मन एव चन्द्रमाः । चक्षो; नेत्राभ्यां सूर्यः। नेत्रे एव सूर्यः। यः प्राणो जीवः स एव वायु श्रोत्रात् अजायतेति कल्प्यते श्रोत्रमेव वायुः । योऽयमग्नि; स मुखात् अजायतेति कल्प्यते मुखमेवाग्निः अंशोत्पन्नत्वादिति ।।12।।

श. भा.– अस्य पुरुषस्य मनसः । सकाशाश्चन्द्रमा अजायत जातः चक्षे; चक्षुषः सूर्यः अजायत जातः । श्रोत्राद्वायुश्च प्राणश्च अजायत। मुखादग्निश्च। अन्यत्र चन्द्रमस्सूर्यौ च। बाहुभ्यो मनश्चक्षु; श्रोत्राणामुत्पत्तिरिति सृष्टिक्रमः । अत्र तु अचिन्त्यमहिम्नि पुरुषे मनश्चक्षुःश्रोत्रमुखेभ्यश्चन्द्रमः प्रभृतीनामुत्पत्तिक्रम इति विपरीतमर्थं स्तुतिरिति वाक्यार्थः ।।12।।

नाभ्या आसीदन्तरिक्ष ँ शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूर्मिदिशः श्रोत्रात्तथा लोकाँ ॥2॥ अकल्पयन् ॥13॥

शा. भा.– नाभ्या नाभितः अन्तरिक्षमाकाशम् आसीद् बभूव । शीर्ष्णः मस्तकात् द्यौः स्वर्गः समवर्त्तत समभवत् । पद्भ्यां पादद्वयाद् भूमिः समवर्त्तन्त। पदभ्यां पाद्वयाद् भूमिः समवर्तत श्रोत्रात्कर्णादि्दशः समवर्त्तन्त तथा-तेनोक्तेन विधिना स एव पुरुष; लोकान् देवमनुष्यादिनिखिलस्थावरजङ्गमादित्रैलोक्यम् अकल्पयन् अकल्प-यत्सृष्टवान्।।13।।

उ. भा.–नाभ्या आसीत् । ताभ्याः आसीत् अन्तरिक्षम् शीर्ष्णः द्यौः सम अवर्तत । दभ्याम् भूमिः दिशः श्रोत्रात् तथा लोकान् अकल्पयन् । तस्यैवं विधस्य पुरुषस्य यां नाभिः तदेवान्तरिक्षं नभः याद्यौः तत् शीर्षं शिरः । समवर्ततेति कल्पितम् । पादौ भूमिरेव । श्रोत्रे श्रवणौ दिशः । श्रोत्रावयवाः यस्मादि्दशः ब्रह्मणो जातः तथैव सर्वान् लोकान् पुरुषस्यावयवभूतान् अकल्पयदिति ।।13।।

यत्पुरुपेण हविषा देवा यज्ञमतन्वत ।
वसतोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥14॥

उ. भा.—यत्पुरुषेण। यत् पुरुषेण हविषा देवाः यज्ञम् अतन्वतः वसन्तः अस्य आसीत् आज्यम् ग्रीष्मः इध्मः शरत् इविः कथमन्नेनाधिरोहति । यत् यस्मात्कारणात् पुरुषेण हविषा हविर्भूतेन देवा इन्द्रादयः यथा यज्ञम् अतन्वतः विस्तारितवन्तः। तथा योगिनोऽपि पुरुषेवैवामृतभूतेन दीपितेनात्मना आत्मयज्ञं समधिकृतवन्तः। अत्र यज्ञे वसन्तः आज्यमासीत् ग्रीष्मः इध्मः शरद्धविरिति। इतरयागे वसन्तशाब्देन सात्विको गुण उच्यते। ग्रीष्मशब्देन राजसः शरच्छब्देन तामसः। त्रयो हि गुणस्तत्रात्मसज्ञे योगिनो जुह्वतीति ॥14॥

श. भा.— पुरुषेण हविषा हविर्भूतेन देवाः यत् यज्ञम् अतन्वत-कृतवन्तः। देवा इत्युपलक्षणं साध्या ऋषयश्च। अस्य वसन्त ऋतुविशेषः आज्यं घृतमासीत् । ग्रीष्म इध्मः समिद्विशेषः, शरद्धवि; योग्यतावशात् आज्यातिरिक्तं हविः पुरोडाशादि। अत्र कण्डिकाव्युत्क्रमोऽस्ति अस्या अनन्तरं तँय्यज्ञम् । ततस्तस्माद्यज्ञादिति तिस्र ऋचः क्रमेणैव। ततः सप्तास्यासन्निति सृष्टिक्रमोऽपेक्षितः ॥14॥

विशेषस्तु—दीव्यन्तीति देवाः प्रजापतेः प्राणावयवाः यत् यदा पुरुषेण हविषा सृष्टेः पूर्वं तदानीं द्रव्यान्तरस्यासम्भावत्वात्पुरुषमेव हविष्ट्वेन संकल्प यज्ञमतन्वत् अतनिषत् मनसा पुरुषमेव हविष्ट्वेन सम्भाव्य तेन मानसयांग कतवन्त इत्यर्थः । तत् तदानीं समये अस्य यज्ञस्य वसन्त आज्यमासीत् आज्यस्य रसेऽन्तर्भावत्वाद्रसस्य च वसन्ते प्राचुर्यादात् वसन्ते आज्यत्वोपचारः। वसन्तमृतुमेवाज्यवेन देवा निष्पादितवन्त तदानोमाज्यद्रव्यवस्थासम्भवा-दित्याशयः। तथा ग्रीष्म इध्म असीदितिशेषः। तदानीं ग्रीष्म एव ऋतुरिध्यत्वेन निष्पादित त्यिर्थः । इध्यते दीप्यते बह्वनर्येनासौ इध्मः अग्रे समिन्धन हेतुभूत काष्ठविशेषः ग्रीष्म इध्मत्वं श्रुतमिहितम् ग्रीष्मऽइध्म इति। तथा शारद्विविरासीदिति शेषः। ब्रोह्यादेर्हविष शरदि प्रादुर्भावत्वाच्छरदि हविष्टमारोपितं तदानीमन्यहविषोऽसम्भावादित्यशायः। य एवं सामान्य हविः स्वरूपो विशेष हवि; स्वल्पश्च यज्ञपुष्पाख्य; प्रजापतिः शिवाख्यः परमेश्वरस्तमनन मन्त्रेणा भिषिन्चमिति ॥4॥

सप्तास्या सन्परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञन्तन्वाना अबध्नन्पुरुषं पशुम् ॥15॥

उ. भा.- सप्तस्यासन् सप्त अस्य आसन् परिधय; त्रि;सप्तः समिधः कृताः। देवाः यत् यज्ञम् तन्वानाः अवध्न् पुरुषम् पशुम्। देवा इन्द्रादयः यथा यज्ञं पुरुषमेधाख्यं विस्तारयन्त; पुरुषः पशुम् अबन्धन् हतवन्तः अस्य पुरुषमेधयज्ञस्य सप्त समुद्रा; परिचयः आसन्। भारते हि वर्षे यागः प्रवर्तते। त्रिसप्त छन्दांसि गायत्र्यादीनि समिधः कृता आत्मयोगे परिधिशब्देन पृथ्व्यिापस्तेजोवायुराकाशं मनोवुद्धिरित्येते परिधयः कल्प्यन्ते। त्रि;सप्त समिधः पृत्वियादीनि। पचतन्माक्रणि रूपाबुद्धीन्द्रियाणि श्रोत्रादीनि। पंच कर्मेन्द्रिय मनश्च पुतनाः त्रिःसप्त सधि; तथा

देवा दीप्यमाना ज्ञानेन योगिनः समाध्याख्यंयज्ञं तत्वाना विस्तारयन्तः। पुरुष ज्ञानं पुरुषमेध पशुरूपेणावस्थितम् अवध्नन् अगृह्न् ।।15।।

श. भा.—अस्य पुरुषस्य यज्ञस्य परिधयः भूमिवेष्टानानि सप्त-अर्थात्समुद्राः आसन् बभूवुः। त्रिः सप्तःएकविंशतिसमि; कृताः इत्यर्थः। सप्त छन्दांसि सप्त उपच्छन्दांसि सप्त व्याहृतयश्च। एत नि समिध; कृता इत्यर्थः। अस्य कस्यः? यत् यं यज्ञं तन्वानांः कुर्वाणा देवाः पशुं पशुभूतं पुरुषम् अवध्नन् बद्धवन्त;। अत्र सप्तेति सङ्ख्यामात्रं श्रूयते न तु सङ्ख्येयं, तत्र सङ्ख्येये कल्प्यमाने यज्ञभूमिवेष्टकं कल्पनीयं यज्ञभूंमिश्च भारतवर्षम् । तद्वेष्टकाश्च लवणार्णवप्रभृतयः सप्त समुद्रा एव भवन्ति। त्रि; सप्त इत्यपि सङ्ख्येयक ल्पनायां छन्दांसि जज्ञिरे तस्मादित्यत्र यज्ञसाधनसृष्ट्यै एकविंशतिच्छन्दसामुक्तः त्वात्तेषामेव ग्रहणम् ।।15।।

विशेषस्तु—दीव्यन्तीति देवाः ज्ञानेन दीप्यमाना योगिन कपिलादयोमनुयः इति यावत् ते देवाः /यत् यदा यज्ञं तन्वाना समाधिरूपं यागं कुर्वाणाः पुरुषं पशुमबन्धनन् "यस्मात्परं नापरमस्ति किन्चित् तेनेदं पूर्णं पुरुषेण सर्वमिति" श्रुतेर्ऽज्ञानघनान्दस्वभावं श्रुतिप्रसिद्धं परमेश्वरं पशुं मेधपशुरूपेणावस्थितमबन्धनन् अगृह्णन्नत्यर्थः। तदास्यात्मयागस्य सप्त परिधयः आसन् पृथिव्यप्तेजोवाय्ताकाशमनोबुद्धिस्पाः सप्त परिधायोऽभवन् पृथिव्यादि बुद्धसन्ता एव सप्त परिधित्वेन देवैः कल्पिता इत्यर्थः। तथा द्विसप्तसमिधश्च कृता छिः सप्त एकविंशतिस्तावत्संख्यादिशिष्टा एव समिधोऽभवन्नित्यर्थः। पन्च महाभूतानि पृथिव्यादीनि, पन्चतन्मात्राणि रूपादीनि पनन बुद्दीन्द्रियाणि चक्षुरादीनि पन्च कर्मेन्द्रियाणि पाय्वादीनि, मनश्चैकम्, एतास्त्रिः सप्त एकविंशतिसंख्याविशिष्टाः समिथश्चकृताः सीमत् काष्ठविशेषत्वेन कल्पिता इत्यभिप्रायः। तद्धदिदानीमप्यात्मोपासका आत्मयागे आत्मज्ञानहीनत्वात्स्वाऽज्ञानमेव पशुत्वेनाऽऽभाव्य समाधिरूपं रूपं कुर्वाणा योगिनः पृथिव्यप्तेजोवाय्वाकाशमनोबुद्धीः सप्त परिधित्वेन सम्भाव्य पन्च महाभूतानि, पन्च तन्मात्राणि, पन्चरे ज्ञानेन्द्रियाणि, पन्च कर्मेन्द्रियाणि, मनश्चैकम्, इत्येकविंशतिसंख्या नि तान्येव समिधः समित्काष्ठ विशेषत्वेन विबाव्यात्मोपासनं कुर्यरित्याशयः । तत्र हि परितो श्रीयते इति परिधयः, सम्यगिध्यते दीप्येथविर्याभिस्ताः सीमधः एवं व्युत्पत्तिद्वयेन यद्यपि वस्तुद्वयं प्रतीयते तथापि परमार्थदशायामभेद एव उभयस्याग्निरक्षणार्धत्वादतोऽत्रादिऋपृथिव्यादि पन्चकस्य मनसश्च परिथिषु समित्सु च परिगणितत्वेऽपि सामान्यविशेषत्वभेदाद् दोष एवेति बोध्वः।

यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्व्वे साध्या सन्ति देवा ।।16।।

उ. भा.—यज्ञेन यज्ञम् । यज्ञेन यज्ञम् अयजन्त देवाः तानि धर्माणि प्रथमानि आसन्। ते ह नाकम् महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः । यथा इन्द्रादयो देवाः यज्ञेन ज्योतिष्टोमाख्येन यज्ञपुरुषं वासुदेवम् विधिना अयजन्त। यतः तानि यजनरूपाणि धर्माणि

प्रथमानि आसन् । ते ह महाभाग्ययुक्ताः नाकं सचन्त स्वर्गं सेवन्ते। यत्र पूर्वे साध्याः प्रथमे सुराः सन्ति विद्यन्ते देवा; तेजसा देदीप्यमानाः । एवं योगिनोऽपि दीपनाद्देवा यज्ञेन समाधिना नारायणाख्यं ज्ञानरूपम् अयजन्त । यतः तानि साधिरूपाणि धर्माणि प्रथमानयासन्। ते तु नाकं सनकादीनां स्थानं गच्छन्ति । ये तु योगिनो जन्मान्तरैर्निर्धूर्तगुणाः शुद्धाः ते नारायणाख्यं पुरुषमाविशन्ति । मुक्तिं गच्छन्तीत्यर्थः ।।16।।

श. भा.- देवा–इन्द्रादयः यज्ञेन-यज्ञसाधनभूतेन पुरुषेण-पश्वादिरूपेण यज्ञं पुरुषं-पुरुषोत्तमम् अयजन्त-पूजितवन्तः । अत्र दृष्टं पुरुषं पशुं कृत्वा हिंसात्मकेन च कर्मणा यज्ञः क्रियत इत्याह-तानि धर्माणि प्रथमान्यासन् । तथा च ते धर्माः प्रथमा मुख्या एवासन् । अन्यत्र तद्दर्शनमसम्भवितमेवेत्यर्थः। अत एव ते देवा एवंविधेनैव यज्ञेनेष्ट्वा नाकं-स्वर्ग सचन्त-सङ्गताः। यत्र नाके पूर्वे साध्यादयो देवाः सन्ति। महिमानः महात्मानः। ते ह नाकमित्यत्र हकारश्छान्दसः स्तोभः। सचन्त इति, "पचसमवाये" (भ्वा. आ.) इत्यस्माल्लङ प्रथमपुरुषबहुवनं "बहुलं छन्दस्यमाङ्योगेऽपि" (पा. 6/4/75) इत्यडागमनिषेधः।।16।।

विशेषस्तु–दीव्यन्तीति देवास्तपसा द्योतमानाः योगिन यज्ञेन समाधिलक्षणेन यागेन यश्रं नारायणाख्यं ज्ञानस्वरूपं परमेश्वरमयजन्त समाधिविधिना सम्यगनुष्ठितवन्त इत्यर्थः । तानि प्रसिद्धानि समाधिरुपाणि धर्माणि प्रथमानि मुखायनि आसन् अभयवन्नित्यर्थः । अत इदानीमपि ये योगिन समाधिना परमात्मनां यजन्ते इति शेषः। ते ह ते हु महिमानः महातमानं नाकं सनकादीनां स्थानं सचन्त सचन्ते सेचन्ते गच्छन्तीत्यर्थः । यत्र यस्मिन्नाके ब्रह्मख्यस्थाने पूर्वे पुरातनाः पूर्वकालीनाः कपिलादयो मुनयः साध्या कर्मदेवाः गणदेवता विशेषा; देवा; आजानदेवाश्च सन्ति तिष्ठन्तीत्यर्थः। ते नाकुं रुचन्हे सङ्गच्छते इत्यर्थः। इदानोन्तना अपि ये योगिन समाधिना नारायममनुस्मरन्ति ते महिमान महात्मानों जन्मान्तरैर्निर्धूतगुमआः शुद्धा भूत्वा नारायणाख्यं पुरुषं विशन्ति मुक्तिं गच्छन्तीत्याशयः । तथा च श्रुति; "एवं त्वीय नान्यथेतोऽस्ति न कर्मलिप्यते रे" इति यथा स्वर्गप्राप्तौ नानोपा यज्ञव्रतानुरूठानरूपा दरीदृश्यन्ते न तथा मुक्तवित्यर्थः। तस्मादात्मोपासनार्थ सैवर्यतितव्यं यैनात्यन्तदु चानिवृत्तिः स्वादितिभावः । तथाचोक्तं "भिद्यते हृदयग्रन्थिछद्यन्ते सर्वसंशयाः ।

क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" इति । अयमेवमोक्षोपायः। मोक्षे नान्यदुपायान्तरं दरीदृश्यते। तदुक्तं श्रुत्वा "नान्यः पन्था विद्यतेऽयनाय" इति।

अथोत्तर नारायणीम्

उत्तरनारायण सूक्तस्य अर्थपर्यालोचनम्ः

अस्योत्तरनारायण सूक्तस्यौपनिषदिक वर्णनेन ज्ञायते एत् एकस्यैवाद्वितीयस्य सर्वकारणस्य सर्वात्मनो भगवतोऽनेकानि रूपाणि अस्मिन् खलु ब्रह्माण्डे राजन्ते । प्रजापतिः परमेश्वर स्त्रिगुणात्मकमायागर्भभूते व्यष्टि-समष्टि प्रपञ्चे स्व प्रतिबिम्ब रूपं समर्प्यान्तर्यामित्वेन संचारति।

नाना जगदाकारेण परिणाममानमायाऽधिष्टानत्वेन नित्य शुद्धबुद्धमुक्तस्वभावोऽजोऽपि स नानाकारेण जायमानस्सन् प्रतीयते । अंजोऽस्य प्रपञ्चस्य स एक एवोपादनकारणं, अखिलाधि-पतित्वन्निमित्तमपिकारणं स एव। तमेतं मायोपहितं चराचर विश्वोद्भवस्थितिल-यानामाश्रयभूतमपि वस्तुतो मायाऽतिगं प्रपञ्चोपशमं विशुद्धं परमात्मनां सर्वात्मानं ध्यान परायण धीराः योगिन एवं परितो द्रष्टुं शक्नुवन्तीत्याह–

"ॐ प्रजापतिश्चरति गर्भेरन्तर्जायमानो बहुधाविजायते ।"

यस्सर्वात्मा एकएवाद्वितीयः प्रजापति परमेश्वरस्सर्वेषां प्राणिनामन्तर्हृदि स्थितस्सन् गर्भे चरति मायया गर्भभूते स तत्सृष्ट कार्यकरण संघाते पिण्ड ब्रह्माण्डरूपे स्व प्रतिबिम्बरूपं समर्प्य प्रविशतीत्यर्थः ।

अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवणीति श्रुतेः। वस्तुतोऽयं अनुत्पद्यमानो नित्यस्सन् बहुधा कार्य-कारण रूपेण विजायते मायया ब्रह्मविदो मनीषिणो योगिनः पारमार्थिकं सर्वाधिष्ठान लक्षणं स्वरूपं परिपश्यन्ति "सर्वं खल्विदं ब्रह्म' अहं ब्रह्मास्मि इति सर्वाभेदेन विजानन्ति । विश्वानि सर्वाणि भुवनानि भूरादयो लोकाः, तत्स्थानि चराचरभूतानि च तस्मिन् ह तस्मिन्नेव परमकारणे सर्वाधिष्ठातरि ब्रह्मणि स्वस्वरूपे तस्थुः स्थितानि । अतस्सर्वं तदात्मकमेव अहमपि तदात्मक एवेति ब्रह्माद्वैत भावनां सदा सर्वत्र काल्पनिकनामरूप भावना परित्यागेन दृढ़ीकुर्यादिति भावः ।

यदाह–

"आत्मन्यभेदेन विभायन्निदं च
जानात्यभेदेन ममात्मनस्तदा ।
यथाजलंवारिनिधौ यथा पयः,
क्षीरे वियद्व्योम्न्यनिले यथानिलः । इति ।।"

अथवा परमार्थतो यस्य सर्वव्यापकस्य निर्गुणस्य निराकारस्य सर्वान्तर्यामिरूपेण विद्यमानस्य नित्यस्याजस्य प्रकृति नियन्तुः प्रजापतेः परमेश्वरस्य स्वेच्छयैव स्वभक्तानामनुग्रहाय सज्जानानां बुद्ध्यारोहाय नास्तिकानां मुखभङ्गाय पापिष्ठानीं दुष्टानां विध्वंसाय चोपसनादि सौकर्य सिद्धये च सद्धर्मप्रतिष्ठायै च भक्तेप्सितचतुर्भज पञ्चमुखद्विभुजाद्या-कारविशेषाणामतिमा-नुषात्यद्भुतविविधदिव्य चरित्रशालिनां विशिष्टावतार विग्रहाणां प्रादुर्भावकरणं 'अत्यन्त दुर्लक्ष्यमपि मामन्तसुखनिधिममीमदारधकास्सुजना; भक्ताः पुरुष धौरेयास्साक्षात्पश्यन्तु'' इत्येवमादि बहुप्रयोजनकमित्याह-प्रजापतिश्चरतीति ।

प्रजापतिः परमेश्वरः रामकृष्णाद्यवतारविग्रहान् परिग्रणाय लोकदृष्टया कौशल्या देवक्यादिमातृणां गर्भेऽन्तश्चरति प्रविशतीव प्रतीयते ।

उत्तर–नारायण सूक्ते उपस्थान मन्त्राः विद्यन्ते। अत्र भगवत; भुवनभास्करस्य अपूर्वाणां क्रिया-काण्डानां वर्णन समुपलभ्यते। पृथ्वियादि पञ्चभूतादि तत्वानामुत्पत्तिः तस्मात् एव सञ्जातेति । स एव आदित्यः पञ्चभूतानां संबर्द्धकः विधातारूपेण ज्ञायते। स त्रिदेवस्वरूपः, यस्य-प्रत्यक्षीकरणं प्रातर्मध्याह्न सायंकालेष्वपि नूनमेव भवति। स त्रिगुनात्मकः अद्वितीयश्च। सः स्व प्रकर्ष तेजसा जगत; अन्धकारं-विनाश्य सर्वत्र प्रकाशयतीति। सः एव ज्ञानस्वरूपः, स्व ज्ञानरश्मिना सः सर्वत्र अज्ञानान्धकारं विनांश्य ज्ञानं प्रसारयति । स सर्वदा गमनागमन व्यापारेण प्राणिनां कर्म पश्यन् नितरां गच्छति। असौ सूर्यश्चित्रमाश्चर्यरूपं तथा एवमुदितो बभूव। स मित्रस्य वरुणस्याग्ने त्रयाणां देवानाम् अक्षिभूत; । जङ्गमस्य स्थावरस्य चासौ आत्मा।

ॐ अद्भयः सम्भृतः पृथिव्यै रसाच्च व्विश्वकर्मणः समवर्त्तताग्रे ।

तस्य त्वष्टा व्विदधद्रूपमेति तन्मर्त्त्यस्य देवत्वमाजानमग्रे ।।1।।

अस्य षड्ऋचात्मकस्य सूक्तस्योत्तरनारायण ऋषीराद्यनां तिसृणां त्रिष्टुप् छन्दः, तदनु द्वयोः मन्त्रयोरनुष्टुप्, अन्तिमस्य च त्रिष्टुप् छन्दः, आदित्यो देवता रुद्र शिखा जपे, स्नपने, हो च विनियोगः।

उ. भा.–संभृतः। अदभ्यः संभृत; पथित्वैय रसात् च विश्वकर्मणः सम् अवर्तत अग्रे। तस्य त्वष्टा विद्धत् रूपम् एति तत् मर्त्यस्य देवत्वम् आजानम् अग्रे ! त्वष्टा प्रजापतिर्ब्रह्मा यद्रूपमेकांशभूतं विदधत्कृतवान् तदेव मर्त्यस्य मर्त्ये भूलोके देवत्वं प्रभुत्वम् अजानमाप्तमित्यर्थः किं भूतोसौ । अदभ्यः सकाशात् संभृतः पिण्डीभूतः पृथिव्या रसात् च। विश्वकर्मणः अग्रे प्रथमतः समवर्थर्तत संयोगरुपेण कृतः। तस्यैव नान्यस्य तदेव कारणान्मर्त्ये प्राप्तवान् सतु पालनीयदानवादिविनाशनायेति ।।11।।

श. भा.–त्वष्टा आदित्यः अद्भ्यः जलात् पृथिव्या अपि अग्रे सम्भृतः बभूव। अत्र पृथिवीपदं पञ्चभूतोपलक्षणार्थं तेन पञ्चभूतोपत्तिपूर्वकाल एव सम्भृतः पुष्ट इत्यर्थः। न केवलं पञ्चभूतेभ्य एव पूर्व सम्भृत; किन्तु विश्वकर्मणो ब्रह्मणः सकाशात् जलेभ्य रसादिच्छातोऽपि पूर्वं समवर्तत यदा विश्वकर्मणो जगन्निर्माणेच्छाभूत्तदैव समवर्तत इत्यर्थः। तस्मात्तस्यादित्यस्य तद्रूपं मण्डलाकारं मर्त्यस्य मनुष्याणां सृष्टितोऽपि अग्रे पूर्वं देवत्वं विदधत् धारयत् एति एभिर्मनुष्यैः समेति समागच्छतीति अतिशयेन ज्ञातवान् ! देवा द्विविधाः–उत्कृष्टेन कर्मणा देवत्वं प्राप्ताः कर्मदेवाः। सृष्टयादावुत्पन्नाः प्रधानदेवाः।।1।।

व्वेदाहमेतम्पुरुषं महान्तमादित्यवर्णे तमसः परस्तात् ।

तमेव व्विदित्वाऽतिमृत्युमेति नान्यः पन्था व्विद्यतेऽयनाय ।।2।।

उ. भ.- वेदाहम् वेद अहम् एतं पुरुषम् महान्तम् आदि त्यर्णम् तमस; परस्तात् । तम एव विदित्वा अतिमृत्युम् एति न अस्यः पन्था विद्यते अयनाय। ऋषेः प्रतिवचनम् । अहमेतं पुरुषं वेद। महान्तं देशकालद्यवच्छेदरहितम् । आदित्यवर्ण स्वप्रकाशम् । तमसः परस्तात्

अविद्यायाः भेददर्शनम् । तमेव विदित्वा अतिमृत्युम् एति अतिक्रम्य मृत्युं तं पुरुषमनुप्रविशति। न अन्यः पन्था मार्गः तस्यायनाय गमनाय विद्यते ।।18।।

श. भा.—अहमेतं पुरुषं वेद जानामि अस्मादीनां सर्वेपामनुभवसिद्ध इत्यर्थः। एतं किम्भूतं? महान्तं सर्वव्यापकं, पुन किम्भूतम् ? आदित्यवर्ण ज्योतिर्मयमित्यर्थः । यथाऽऽदित्यः स्वप्रकाशकः परानपि प्रकाशयति तथाऽयमपि स्वप्रकाशब्रह्मरूपो जगदपि प्रकाशयति। तमसः परस्तात् अविद्यात्मकसंसारात् परमुत्तीर्णमित्यर्थः । तमेवादित्यरूपं पुरुषं विदित्वा ज्ञात्वा मृत्युम् अतिक्रम्य एति गच्छति अपुनरावृत्तये। नान्य इति—अयनाय मृत्युमतिक्रम्य गमनाय अर्थात् मोक्षाय अन्यः पन्था न विद्यते। तथा चायमेव पुरुषो ध्यानगम्यो ज्ञातो मोक्षं ददातीति वाक्यार्थः।।12।।

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते ।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्नह तस्थुर्भुवनानि विश्वा ॥3॥

उ.भा.—किंभूतं तं विशिष्यते,। प्रजापतिश्चरति। प्रजापति; चरति गर्भे अन्तः अजायमानः बहुधा विजायते। तस्य योनिम् परिपश्यन्ति धीराः तस्मिन् ह तस्थुः भुवनानि विश्वा। स एव पुरुष एकांशभूतः प्रजापतिः अस्य गर्भस्यान्तः अजायमानः चरति चतुर्विधेषु भूतेषु। स एव जायमान; बहुधाऽनेक प्रकारं विजायते। ये धीराः योगिनः ते तस्य योनिं परिपश्यन्ति संर्वत्यागेन परिहरन्ति। विश्वे त्रैलोक्ये भुवनानि तस्मिन्नतस्थुः ।।3।।

श. भा.—प्रजानां पतिः प्रजापतिः पुरुष एव सूर्यरूपः । अन्तश्चरति अर्थात्प्राणिनां देहमध्ये जीवात्मरूपतया वसतीत्यर्थः। किम्भूतः? गर्भे अजयामानोऽपि नित्यवदनुत्पत्तिधर्मा अपि बहुधा बहुप्रकारेण विजायते। स्थावरजङ्गमात्मकदेहेषु जन्म लभते। यद्वाऽजायमानोऽपि गर्भे बहुधा विजायते रामादिशरीरेणेत्यर्थः। तस्य योनिमुत्तपित्तिस्थानं धीरा ब्रह्मवादिनः परिपश्यन्ति। ध्यानेन सम्वगुपलक्षयन्तीत्यर्थः। तत्स्थानं ब्रह्मैवेति तात्पर्यम्। तस्मिन् प्रजापतौ विश्वा सर्वाणि भुवनानि भूतानि स्वर्गमर्त्यपातालादीनि तस्थुः स्थितानि। हकारः स्तोभार्थः। विश्वा इति निलोपश्छान्दसः (पा. 6/1/70) ।।3।।

यो देवेभ्य आतपति यो देवानां पुरोहितः ।
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥4॥

उ. भा.—यो देवेभ्यः । यः देवेभ्यः आतपति यः देवानां पुरः हितः । पूर्वं य देवेभ्यः जातः नमः रुचाय ब्राह्मये। अग्रे यो देवेभ्यः । योगिनस्तं नमन्ति ध्यायन्ति । यो देवेभ्यः सर्वेभ्यः आतपति अतिशयेन तेजसा तपति आदित्यरूपेणेत्यर्थः । यश्च देवानां पुरोऽग्रे इन्द्रत्वेन स्थितः । य़श्च पूर्वः अग्रे ब्रह्मरूपेण देवेभ्यो जातः तस्मै रुचाय तेजसे ब्राह्मये ब्रह्मपुरुषापत्याय नमः ।।20।।

श. भा.—यः सूर्यः आतपति—आसमन्ताद्भावेन तपति। किमर्थ? देवेभ्य देवानां प्रयोजनाय उदिते आदित्ये कर्मण्यधिकारो भवति। यः देवानां पुरः अग्रे हितः निहितः स्थापितः देवानां हविर्दानाय पूर्वमग्निरूपेणाधीयते इत्यभिप्रायः । यो देवेभ्यः सकाशात्पूर्व्वो जात उत्पन्नः। आदित्यो द्वादशादित्यः प्रथमः समुत्पन्न इत्यर्थः। तस्मै—आदित्याय नमः। किं भूतायः ? रुचाय रोचमनाय। ब्राह्मये—ब्रह्मभूताय ब्रह्मणः अपत्यं ब्राह्मिः तस्मै ।।4।।

रुचं बाह्मं जनयन्तो देवा अग्रे तदब्रुवन् ।

यस्त्यैवं ब्राह्मणो विद्याततस्य देवा असन्वशे ॥66॥

उ. भ.—रुचं ब्राह्मन् । रुचं ब्राह्मम् जनयन्तः देवा; अग्रे तत् अब्रुवन् । यः त्वा एवम् ब्राह्मणः विद्यात् तस्यदेवा; असन् वशे। रुचं देदीप्यमानं ब्राह्मं ब्रह्मण उत्पन्नं जनर्यतः सृष्टयर्थं देवा योगिनः तेजसा दीप्यमानाः यत् अब्रुवन् यद्ब्रूयुः अग्रे प्रथमतः किमूचुः । अपरोपि यो ब्राह्मण् स ब्रह्म विद्याजानीपात् तस्य देवा असन्वशे । सोऽपि सनकादीनां स्थानं गच्छतीत्यर्थः।।5।।

श. भा.—देवा ब्राह्मणादयः । जनयन्तः स्वयमुत्पद्यमानाः । तं ब्राह्मं ब्रह्मसुतं रुचं रोचमानं प्रकाशरूपमादित्यमग्रे पूर्वं प्रथममब्रुवन् । अयमेवास्माकं मुख्य इत्युक्तवन्त; । किं च हे पुरुषोत्तम ! त्वा त्वामेवमनेन प्रकारेण सूकोत्तोक्तविश्वरूपं यो ब्राह्मणो विद्याज्जानीयात् तस्य ब्राह्मणस्य देवा वशे इच्छायां असन् भवन्ति इच्छानुवर्तिनो भवन्ति। तथा च सहस्त्रशीर्षेत्यादिग्रन्थतोऽर्थतश्चाधीत्य यो ब्राह्मणः पुरुषोत्तमं जानाति तस्य ब्राह्मणस्य देवा ब्रह्मादयः अंभिलषितान् सम्पादयन्तीति वाक्यार्थः ।।5।।

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रुपमश्विनौ व्यात्तम् । इष्णन्निषाणामु म इषाण सर्वलोकम्म इषाण ॥22॥

उ. भा.— श्रीश्च ते । श्रीः च ते लक्ष्मीः च पत्न्यौ अहोरात्रे पार्श्वे नक्षत्राणि रूपम् अश्विनौ व्यात्तम् । इष्णन् इषाण अमुम् मे इषाण सर्वलोकम् मे इषाण । अस्य पुरुषस्यैतेऽवयवाः। श्रीश्च लक्ष्मीश्च पत्न्यौ भार्ये । अहश्च रात्रिश्च ते पार्श्वे । नक्षत्रणि रूपम्। अश्विनौ व्याप्तं मुखम्। इष्णन् इषाण स्वर्गस्य लोकस्य ईशानः । एतद्गुण विशिष्टः नाम मोक्षस्य ईशानः सर्वलोकसा च स एव देवानामीशान इति ।।6।।

श. भा.— हे पुरुषोत्तम ! तव श्रीः लक्ष्मीश्च पत्न्यौ सहचारिण्यौ त्वामालभत इत्यर्थः। चकारद्वयं तुल्यप्राधान्यज्ञापनार्थं, श्रीरैश्वर्यं, लक्ष्मीर्धनं, यद्वशात्पुरुषो लोकानामश्रयणीयो भवति सा श्री;, यद्वाशात्पुरुषः लोकानां दर्शनीयो भवति, सा लक्ष्मीः । "लक्ष दर्शनाङ्कनयोरि" त्यस्य (चु. आ.) रूपम् । अहोरात्रे पार्श्वे अह; रात्रिश्च पार्श्वद्वयम् । अहः शब्द परब्रह्मपरः। तस्य विद्यात्म्कत्त्वेन प्रकाशरूपत्वात्। रात्रिशब्दः संसाररूपत्वेन प्रकृतिपरः। तस्या अविद्यात्मकत्वेनाप्रकाशकत्वात् ! एतेन धमार्थकामात्मक; संसारः मोक्षश्च श्रीपरमेश्वरपार्श्वे द्वयमित्युक्तं भवति। नक्षत्राणि रूपं नारायणो मूर्तिरित्यर्थः। अस्विनौ द्यावापृथिव्यौ तव व्यापत्तं

विवृतं मुखमित्यर्थः। तथा च श्रुति "में हीदं सर्यमश्नुवाताम्" इति। एवम्भूतं त्वा पुरुषोत्तमं याचे। इष्णन् इच्छन्तं सकामम् इषाण इच्छा अनुगृहाण । निजोपासकं सत्वमनुगृहाणेत्यर्थः। किं च मे मम अमुं लोकं भार्यापुत्रजनादिकम् इषाण । न केवलममुं किन्तु मे मम सर्वलोकं भूरादिसप्तलोकम् इषाण। अयं वाक्यार्थ। यः कश्चित् स्वर्गपुत्रादिकामयमानोऽनेन सहस्त्र शीर्षाध्यायेन त्वां स्तौति पूजयत्युपतिष्ठते तमनुगृहाण।। मम पशुपुत्रादिधनयुक्तमिहलोकं स्वर्गमोक्षादिकमिषाण इच्छ। तव वाञ्छामात्रेणैव सर्वं सम्पाद्यते सत्येच्छत्वादित्यभिप्रायः। अत्र स्तुतिपूर्वं प्रार्थना महतीति स्तुत्वा प्रार्तना।।17।।

अप्रतिरथ सूक्त

अथाप्रतिरथसूक्तम्–

आशुः शिशानो वृषभो न भीमो
घनाघनः क्षोभणश्चर्षणीनाम् ॥
सङ्क्रन्दनोऽनिमिषऽएकवीर शतॅं.
सेनाऽअजयत्साकमिद्रः ॥1॥

उ. भा.–आशुः शिशानः अनुवाकः। अप्रतिरथ ऋषिः। ऐन्द्रोऽप्रतिरथोऽपशत् । मर्माणित इत्यन्तः। आदितो द्वादशे न्यस्त्रिष्टुभो ब्रह्मा दक्षिणतो जपति । आशुः शीघ्रः शिशानः। शोतनूकरणे । शिशानो वज्रम् । वृषभो न भीमः वृषभ इव भीमः भीमो बिम्भ्यत्यस्माद्विति। धनाधनः हनहनेत्व वक्ता । यद्वा घनशरीरः । क्षोभणश्चर्षणीतां संचालकः चर्षणीनां मनुष्याणाम्। संक्रन्दनः समाह्ता संग्रामकारिणाम् । आहूय चानिमिषः अप्रमादी। यद्वा अनिमिषो देवः । एकवीरः । एक एवासहायो विक्रान्तः। ईदृग्गुणविशिष्टः सः सतं बह्वयः सेना अजयत् जयति। साकं सहैव । इन्द्रः ।।1।।

श.भा.- इन्द्रं स्तौति–इन्द्र; शतं वह्वीः सेनाः साकं सहैव एकदैवाजयत् जितवान्। इन्द्रः किम्भूतः? आशुः शीघ्रः। शिशानः शातनकर्त्ता "शो तनूकरणे", (द. प.)।। वृषभो न भीमः। नकारः उपमार्थीय;, वृषभ इव भीमः। विभेत्यस्मादिति भीम; भयातकः। घनाघन; हनहनेत्येवं वक्ता, यद्वा, घनशरीरः। पुनः किम्भूतः? चर्षणीनां मनुष्याणां (निघं 2/2/8) क्षोभणः सञ्चालकः । सङ्क्रन्दन; सङ्ग्रामकारिणां समाहर्ता । अनिमिष; अप्रमादी अर्थादाहवे, यद्वा अनिमिषो दैवः। एकवीरः विक्रान्तः ।।1।।

सङ् क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण
दुश्च्यवनेन धृष्णुना ॥ तदिन्द्रेण जयत
तत्सहद्ध्वं युधो नर ऽइषुहस्तेन व्वृष्णा ॥2॥

उ.भा.—संक्रन्दनेन शब्दकारिणा अनिमिषेण एकचित्तेन अप्रमाधता वा । जिष्णुना जयनशषीलेन । युक्तकारेण "युध संप्रहारे" अस्य क्विपि युतं। संप्रहारकारिणआ दुश्च्यवनैन अप्रच्यात्रयेन अप्रच्युत स्वभावेन वा । धृष्णुना प्रसहनशीलेन। तदिन्द्रेण जयता ईदृग्गुणविशि,टेनेनन्द्रेण तूज्जयत् । दुर्जयमिति शेषः तच्च सहध्वम् तञ्चाभिभवत । हे युधः "युधसप्रहारे" इत्यस्यैतत्क्विपि बहुवचनम् । हे योद्धारः । पादादावभिमन्त्रितस्य च इत्यादिरुदात्तः। हे नरः मनुष्याः, इषुहस्तेनेन्द्रेण। कृष्णासेवत्रा वर्षणशीलेन ।।2।।

श. भा.- तदिन्द्रेण तादृग्गुणविशिष्टेनेन्द्रेण येन सैन्यं जितमिति शेषः। हे नरः! मनुष्याः! हे युधः! योद्धारः! तत्सहध्वं तद् जयताभिभवत । "युध संग्रहार" इत्यस्य क्विपि युध इति। कीदृशेनेन्द्रेण? सङ्क्रन्दनेन-शब्दकारिणा। अनिमिषेण-एकचित्तेन अग्रमाद्यता। जिष्णुना जयशीलेन। युत्कारेणसम्प्रहारिणा। दुश्च्यवनेन-अप्रच्युतस्वभावेन। घृष्णुना-प्रसहनशीलेन। पुनः किम्भूतेन? इपुहस्तेन-बाणपाणिना । वृष्णा-वर्पणशीलेन। यद्वा इन्द्रेण तत् जितमिति योजना ।।2।।

स इषुहस्तैः स निषङ्गिभिर्व्वशी स ꣳस्त्रष्टा
स युधऽइन्द्रो गणेन ॥ सꣳसृष्टजित्सोमपा
बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥3॥

उ.भा.—स इषुहस्तैः सः इन्द्रः इषुहस्तैः योद्धभिः संसृजति स इषुहस्तानेव योद्धन्। स निषङ्गिभिः स एवेन्द्रो निषङ्गिभिः खङ्गिभि; संसृजति विषङ्गिण एव योद्धन् स्वान् । किं च। वशीकान्तः सर्वजनप्रियो वा स्वतन्त्रोवा निगृहीता दिषङ्वर्गोवा ईश्वरोवा । स एवेन्द्रो युधः योद्धून् स्वान् शत्रुगणेन संसृष्टा । किंच संसृष्टजित् संसृष्टाञ्जयति शत्रुन । सोमपाश्चबाहुशर्धी च बाहुबलः सयोगिबलनिरपेक्षः। शर्थ इति बलनाम । उग्रधन्वा उधूतधनुः । प्रतिहिताभिरस्ता। शत्रुशरीरेषु प्रतिनिहिताभिरिपुभिः इन्द्रः अस्ता क्षेप्तेत्युनमीयते । लघुसंप्रधानो लक्षपातीचेत्। अभिप्रायः ।।3।।

श. भा.-स इन्द्रः इषुहस्तैर्योद्धृभिः संस्त्रष्टा-संसृजति मिलति। स एवेन्द्रो निपङ्गिभि; खङ्गिभिः संसृजतिं। किम्भूतः? वशी कान्तः सर्वजनप्रियः स्वतन्त्रो वा। निगृहीतारिपड्वर्ग ईश्वरो वा। स इन्द्रः युध्यतेऽसौ युध; युदधकर्त्ता गणेन शत्रुगुणेन संसृज्य संसृष्टजित्ससृष्टान् शत्रून् जयतीति संसृष्टजित् । पुनः किम्भूतः? सोमपाः। पुन; रिकम्भूतः? बाहुशर्द्धी-बाहुबली बाबुहुबलोपेतः। संयोगितनिरपेक्षः। शर्द्ध इति बलनाम (निघ. 2/9/7)। उग्रधन्वा उद्यतधनुः। पुन किम्भूतः? प्रतिहिताभिरस्ता शत्रुशरीरे प्रतिहिताभिरिपुभिः अस्ता क्षेता। शत्रुणामेवाग्रे, शत्रृणामेव वा एतेन लघुसन्तानत्वमुक्तम् ।।3।।

बृहस्पते परि दीया रथेन रक्षोहा मित्राँ2
ऽअपबाधमानः प्रभञ्जत्सेना प्रमृणो
युधा जयन्नस्माकमेध्यविता रथानाम् ॥4॥

उ.भा.–बृहस्पते । रे बृहस्पते, परिदीया । दीयतिर्गतिर्का । परियाहि रथेन । रथोहा रक्षसां हन्ता । अमित्रान् शत्रून् । अपबाधमानः । किंच प्रभञ्जनप्रमर्दयन् सेनाः प्रमृणो युधा जयन् । मृणातिहिंसार्धः तस्य क्विपि द्वितीयाबहुवचनम् । प्रमृणः हिंसकान् युधा युद्धेन जयन् अस्माकम् एधि भव। अविता गोप्ता रथानाम् । बृहस्पतिरपीन्द्रस्य पुरोहित इतीन्द्रसंबन्धनैव स्तूयते ।।4।।

श. भा.–इन्द्रपुरोहितत्वेन बृहस्पतिः स्तूयते-हे बृहस्पति ! रथेन परिदीय परिगच्छ। त्वं किम्भूतः? रक्षोहा। किं कुर्वन् ? अमित्रान् शत्रून् अपबाधमानः परिपीडयन् । किं च सेनाः शत्रुसेनाः प्रभञ्जन् प्रमर्दयन् सन् प्रमृणः प्रमर्दकान्युधा जयन् अस्माकं रथानाम् अविता गोप्ता रक्षकः एधि भव। असधातोर्लोटि (ध्वसोरेद्धा''विति लोपे) एधि ।।4।।

बलविज्ञायस्स्थविर प्रवीर सहस्वान्याजी

सहमानऽउग्र ॥ अभिवीरोऽअभिसत्त्वा

सहोजा जेत्रमिन्द्र रथमातिष्ठ गावित् ॥5॥

उ.भा.–बलविज्ञायः। यस्त्वं बलमाविषकुर्वन्विज्ञायसे अयमिन्द्र इति। स्थविरश्च सर्वानुशासकः सवमान्योवा चिरन्तनो वा। प्रवीरश्च अभीरः वीरं वीरमभि अभिवीरः। अभि सत्त्वा च सत्त्वमपि अभिसत्त्वा । सहोजाश्च. । सह इतिबलनाम बलात् जातः । नह्यन्यस्माज्जात इत्थं बलः स्यात् । स त्वं जैत्रं जेतारं हे इन्द्र, रथम् आतिष्ठ । गोवित् सन् स्तुतिवित्सन्। गो शब्दो वाग्वचनः ।।5।।

श. भा.–हे इन्द्र ! स त्वं जैत्रं जेतारं रथम् आतिष्ठ । त्वं किम्भूतः? गोवित् स्तुतिवित्। पुनः किम्भूतः? बलविज्ञाय; बलेन विज्ञायते इति विज्ञायः प्रसिद्धः। स्थविरः सर्वानुशासक सर्वमान्यो वा चिरन्तनो वा । प्रवीरः प्रकृष्टो वीरः । सहस्वान्-बलवान् (नघं. 2/9) वाजी-वाजवान् । वाजमन्नं (नि घं 2/4) सहमानः। उग्रश्च भीषणः अभि वीरः वीरं वीरमभिली कृत्य गच्छत्यभिचारः । अभिसत्वा सत्वा सत्वनाप् अभितिष्ठति सः। सहोजाः "सह इति बलनाम" (निघं. 2/9) बालात्रातः। नह्यन्यस्माज्जान एतादृशो भवति ।।5।।

गोत्रभिदङ्गोविदं व्वज्रबाहुंज्यन्तमज्म्

प्रमृणन्तमोजसा ॥ इमꣳ संजाता

ऽअनु वीरयध्वमिन्द्रꣳ सखायोऽ

अनु सꣳ रभध्वम् ॥6॥

उ.भा.–गोत्रभिदम् । असुरगोत्रं भिनत्तीति गोत्रभित् । यद्वा गोत्र इति मेघनामसु पठितम्। स हि गाः आपः त्रायते। तस्य गोत्रस्य मेघस्य भेत्तारं वृष्ट्यर्थम् । गोविदम् उपलब्धारम्। यद्वा वाग्विदं स्तुतिविदकम् पण्डितं वा वज्रपाणिम् । जयन्तम् । जयतेर्गत्यर्थस्य

अज्म । अज्मेति संग्रामनाम । संग्रामं गच्छन्तम् । प्रमृणन्तम्, ओजसा । मृणतिर्हिंसाकर्मा। प्रमर्दयन्तं बलेन । इममिन्द्रम हे सजाताः समानजन्मानो देवाः। अनुवीरयध्वम् वीरकर्म कुर्वाणं अनुगम्य वीरकर्मणैव प्रोत्साहयत् । हे सखायः समानख्याना देवाः, अनुसरभध्वम् अनुसंगम्य रभसं कुरुत ।।6।।

श. भा.—हे सजाताः! समानजन्मानो देवाः। इमम इन्द्रम् । अनुवीरयध्वं वीर कर्म कुर्वाणं वीरकर्मणैवाऽनुगम्य प्रोत्साहयत। हे सखायः! सखिभूताः देवाः! गोत्रमसुरकुलं भिनत्तीति गोत्रभित्तम् एनम् अनुसंरभध्वम् । अनुगम्य सरम्भं कुरुत । यद्वा गोत्रभिदं वृष्ट्यर्थ गोत्रं मेघ भिनति यस्तम् । वज्रबाहुं वज्रपाणि, गोविदम् गां वाचं वेत्तीनि गोवित्तं पण्डितम् । जयन्तमज्ज अजनशीलम् अज्ज-साग्रामं जयन्तम् । ओजसा बलेन प्रमणन्तं मर्दयन्तम् अर्थात् अंज्म एव। अजम् सङ्गाम; (निघं 2/17/43) ।।6।।

अभि गोत्राणि सहसा गाहमानोऽदयो व्वीर
शतमन्युरिन्द्र दुश्च्यवनः पृतनाषाड्यु-
द्ध्योऽस्माकꣳ सेनाऽअवतु प्रयुत्सु ॥7॥

उ.भा.- अभिगोत्राणि अभिगाहमानो गोत्राणि असुरकुलानि मेघवृन्दानि वा । सहसाबलेन। अदयो निस्त्रिंशः वीरः विक्रान्तः। शतमन्युः बहुक्रोधः इन्द्रः । दुश्च्यवन; अप्रच्याव्यः। पृतनषाट् पृतना संग्रामं सहते अभिभवति । अयुध्यः अविद्यमान प्रतियोधः य इत्थंभूत इन्द्रः सोऽस्माकं सेनाम् अवतु पालयतु ।

श. भा.- इन्द्रः अस्माकं सेनाः प्रत्युत्सु-प्रकृष्टयुद्धेषु अवतु रक्षतु । इन्द्रः किम्भूतः? गोत्राणि-असुरकुलानि मेघवृन्दानि वा सहसा-बलेन अभिगाहमान आक्रामन् । अदय; निस्त्रिशः। वीरः-विक्रान्तः। शतमन्युः बहुक्रोधः शतयज्ञो वा। दुश्च्यवन; अप्रच्याव्यः। पृतनाषाट् पृतनां सङ्ग्रामं (निघं. 2/17) सहतेऽभिभंवति सः। अयुध्यः अयुध्यमानोऽप्रतियोधः "मन्युर्दैन्ये क्रतौ क्रुधि" इत्यमरः ।।7।।

इन्द्रऽआसाने ता बृहस्पतिर्दक्षिणायज्ञः
पुर एतु सोमः ॥ देवसेनानामभि-
भञ्जतीनांञ्जयन्तीनांमरुतो यन्त्वग्रम् ॥8॥

श. भा.- आसां देवसेनानां व्यूहरचनात् इन्द्रः नेता नियामको भवतु। वृहस्पतिश्च नेताऽस्तु । मन्त्रिप्रणीतानि कार्याणि राजा करोतीत्वभिप्रायः । दक्षिणा दक्षिणस्यां दिशियज्ञः एतु आच्छतु। सोम पुरः पुरस्तादग्र एतु आगच्छतु। यद्वा दक्षिणा यज्ञः सोमः पुर एतु। देवसेनानां, किम्भूतानाम् ? अभिभञ्जतीनां मर्दयन्तीनां "शत्रूनि"ति शेषः। जयन्तीनां तानेव। किं च मरुतः गणभूताः अग्रं "निरुध्वे"ति शेषः । यन्तुच्छन्तु।।8।।

उ. भा.- इन्द्र आसाम् । देवसेनानां व्यूहरचनात् इन्द्र आसांनेता भवतु । बृहस्पतिश्च। मन्त्री प्रधानानि हि कार्याणि करोति । दक्षिणायज्ञः दक्षिणतो यज्ञः एतु । पुर एतु सोमः पुरसत्दागच्छतु सोमः । यद्वा दक्षिण पुरस्तात् एतु यज्ञश्च सोमश्च। केषामित्यत आह। देवसेनानाम् अभिञ्जतीनाम् । भञ्जोआमर्दने जयन्तीनाम् । मरुतः गणभूताः यन्तु अग्रम् निरुध्य।।8।।

इन्द्रस्य व्वृष्णो व्वरुणस्य राज्ञऽवादित्यानां-
म्मरुताᳬंशर्द्धऽउग्रम् ॥ महामनसां भुवनच्चय-
वानां घोषो देवानां जयतामुदस्थात् ॥9॥

उ. भा.—इन्द्रस्य वृष्णः इन्द्रस्य वर्षितुः । वरुणस्य च राज्ञः आदित्यानां मरुतां च शर्धः बलः हस्त्यश्व रथपदाति लक्षणम् । उग्रम् उद्धूर्णायुधम् । उदस्थादित्यनुसङ्गः । यद्वा चैतदुदस्थात् अथानन्तरमेव । महामनसाम् अक्लिष्टमनसाम् । भुवनच्यवानां भुवनच्यावनसमर्थानाम् घोषः शब्दः देवानां जयताम् उदस्थात् उत्थितः जितं जितमिति ।।9।।

श. भा.—वृष्णः वपितुरिन्द्रस्य राज्ञः वरुणस्य आदित्यानां मरुतां च शर्द्धः बलं (निघं 2/9/7) हस्त्यश्वरथपादातिलक्षणम् उदस्थात्-उद्बभूव! शर्द्धः किम्भूतम् ? उग्रम उद्गीर्णायुधम्। अथानन्तरमेव देवानां घोष; उदस्थात् उत्पन्नः। देवानां किम्भूतानां? जयतां जयशालिनां महामनसाम् उत्कृष्टचित्तानां, भुवनच्यवानां भुवनसमर्थानाम्, च्यवनं जितं जितमिति शब्दस्तेषामुद्भूत इत्यर्थः ।।9।।

उद्धर्षय मघवन्नायुधान्नयुत्सत्त्वनान्मामका-
गाम्मना ᳬं सि॥ उद्वृत्रहन्वाजिनांव्वाजिना-
न्युद्रथानां जयतां यन्तु घोषाः ॥10॥

उ.भा.—उद्धर्षय उद्गतहर्षान् कुरु हि मघवन् आयुधानि । उत्सत्वनाम उद्धर्षय च सत्वनाम् सत्त्वाना मनुष्याणाम् । मामकानां मदीयानां । मनांसि उद्धर्षय । हे बृहब्रहन्, वाजिनामश्वनाम् । वाजिनानि वेजनत्त्वानि । चञ्चलत्वं ह्यश्वस्य गुणः । उद्राधानां च जयतां यत्तु घोषाः । अद्यन्तु च त्वत्प्रसादात् स्थानां च जयतां मे घोषाः शब्दाः ।।10।।

श. भा.—हे मघवन् ! आयुधानि उद्धर्षय-उद्गतहर्षाणि कुरु। उल्लासयेति यावत् । किं च सत्वनां मनुष्याणां मामकानां च मनांसि उद्धर्षय। किं च हे वृत्रहन् ! वाजिनामश्वानां वाजिनानि बलान्युद्धर्षय। किं चः त्वत्प्रसादाज्जयतां रथानां घोषा उद्यन्तु-उद्गच्छन्तु ।।10।।

अस्माकमिन्द्रःᳬंसमृतेषु द्ध्वजेष्वस्माकं याऽइषवस्ता जयन्तु ॥
अस्माकं व्वीराऽउत्तरे भवन्वस्माँ 2॥ ऽउ देवाऽअवताहवेषु ॥11॥

उ. भा.— अस्माकमिन्द्रः ।.अस्माकं तावत् समृतेषु संगतेषु ध्वजेषु शत्रुबलध्वजलोली-

भूतेष। इन्द्रों रक्षिता भवतु । इन्द्रप्रसादादेव अस्माकं या इषवः ता; जयन्तु । अस्माकं च वीरो उत्तरे विजयिनी भवन्तु । अस्मान् उ। विनिग्रहार्थीय उकारः। अस्मानेव हे देवाः,। अवत रक्षत हवेषु आह्वानेषु ।।11।।

श. भा.–अस्माकं ध्वजेषु इन्द्रः "रक्षिता भवत्विति" शेषः। ध्वजेषु किम्भूतेषु ? समृतेषु अर्थात् शत्रुबलध्वजसंगतेष्वित्यर्थः। किं च इन्द्रप्रसादादस्माकं या इषवस्ता जयन्तु। अस्माकं वीरा उत्तरे विजयिनो भवन्तु।। किं च अस्मान् उ देवा अवताहवेषु। उ एवकारार्थः। हे देवाः अस्मानेवाहवेषु. आह्वानेषु संग्रामषु वा अवत रक्षत ।।11।।

अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गन्यप्वे
परेहि । अभि प्रेहि निर्दह हृत्सु शोकैर-
न्धेनमित्रास्तमसा सचन्ताम् ॥12॥

उ.भा.–अमीषां चित्तम् अप्वा देवता । साच पुनर्व्याधिर्वा भयं वा । यस्मादेतया विद्धो व्याप्तः अपचीयतेऽनया भक्ष्यमाणः तस्मादप्वा अपशब्दान्त्याकारलोपस्ततष्टाप् "एन्द्रोऽभिरूपा द्वादश भवन्ति" इति श्रुतिः । इयमपीन्द्रसेनासंबन्धिनी । अमीषाम् सम्बन्धिनां मनुष्याणाम् चित्तम् चित्ताविति वचनव्यत्यय;। प्रतिलोभयन्ती । "लुभ विमोहने"। विमोहयमाना । गृहाणामंगानि हे अप्वे ततः परेहि परागच्छ पुनरन्यान् शत्रून्गृहीतम् अतो भूयोभूय; करणे नैतानेव शत्रूनभिप्रेहि। निर्दह चैषां हृदयानि शोकैः । हृत्स्विति सप्तमी बहुवचनं द्वितीयाबहुवचनस्थाने । हृदयानि निर्दह शोकैः । यथा अन्धेन ध्वनान्तलक्षणेन अमित्रा तमसा सचन्ताम् तमसा संसेव्यन्ताम् संश्लिष्यन्ताम् । द्वादशैन्ध्रः समाप्ताः ।।12।।

श. भा.–हे अप्वे ! 'अमीषां शत्रुबलसम्बन्धिनां मनुष्याणां चित्तं चित्तानि 'प्रतिलोभयन्ती विमोहयन्ती आकुलीकुर्वन्ती। 'लुभ विमोहने" (तु. प.) विमोहनमाकुलीकरणम् । शत्रुणामङ्गानि गृहाण । ततः परेहि परान् शत्रूनपि ग्रहीतुं गच्छ। ततश्च अभिप्रेहि तानेव शत्रुन् अभिप्रेक्ष्य प्रकर्षेण इहि गच्छ पुन; पुनरित्यर्थः। असूनेव हृत्सु शौकेर्निर्दह तेषां हृदयानि दहेत्यर्थः। [50]किं च त्वप्रसादादन्धेन तमसा अज्ञानलक्षणेनामित्राः सचन्ताम् सेवन्तमाम् ।।12।।

अवसृष्टा परापत शरव्ये ब्रह्मसꣳशिते।
गच्छामित्रान्प्रपद्यस्व मामीषां कञ्चनोच्छिषः ॥13॥

उ. भा.–पृथग्विनियोगमन्त्राः । अवसृष्टा इषुदेवत्यानुष्टुप् । परावसृष्टा निक्षिप्ता परापत परागच्छ । हे शरव्ये शरमयी इषुः शरव्या । हे ब्रह्मसंशिते ब्रह्मणाभिमन्त्रिते अभिमन्त्र्य अतितरां तीक्ष्णीकृते, गच्छ परापत । गच्छेत्यतिशयार्थं एकार्थयोराख्यातयोर्द्विवचनम्। अमित्रान्प्रापद्यस्व। मा च अमीषाममित्राणां कंचन उच्छिषः उच्छेषय । उद्धृतमूलान् कुर्वित्यभिप्रायः।।13।।

श. भा.—हे इषो ! अवसृष्टा निःक्षिप्रा सती परापत गच्छ! गच्छेति, पुनरुपादानं त्वरार्थम् । गत्वा चाऽमित्रान् शत्रून् प्रपद्यस्व। प्रपन्ना च अमीषां शत्रूणां मध्ये कञ्चन मा उच्छिषः माऽवशेषय। प्रपन्ना च अमीषां शत्रुां मध्ये कश्चन मा उच्छप माऽवशेषय। शत्रुनुत्कृतमूलान् कुर्वित्यर्थः। किम्भूते शरव्ये! शरमये। ब्रह्मसंहिते! ब्रह्मणा मन्त्रेण सन्नितरां शिते तीक्ष्णीकृते।।13।।

योद्धृन् प्रत्याह—

प्रेता जयतानरऽइन्द्रो वः शर्म्म यच्छतु ।

उग्रा वः सन्तु बाहवोऽनाधृष्या यथाऽसथ ॥14॥

उ.भा.—प्रेत अनुष्टुप् । योद्धृन्स्तौति । हे नरः मनुष्याः प्रेत गच्छत यजत च । इन्द्रश्च वः शर्म शरणं परित्राणम् यच्छतु ददातु । उग्रा उद्गूर्णायुधाः वः युष्माकम् सन्तु बाहवः । अनाधृष्याः अप्रधृष्याः यथा यूयम् असथ भवथतथा उग्रावः व सन्तु बाहव इत्यनुषङ्गः ।।4।।

श. भा.—हे नरः मनुष्याः! प्रेत प्रकर्षेण गच्छत। अनन्तरम् जयत। वः युष्माकमिन्द्रः शर्म शरणं यच्छतु ददातु। किं च भवतां-बाहवः तथा उग्राः उद्गीणर्आयुधाः सन्तु यूयम् अनाधृय्या अग्रधृष्या अमथ भवत[6]।।14।।

असौ या सेना मरुतः परेषामभ्येति नऽओजसा ।

स्पर्द्धमाना । ताङ् गूहत् तनसापव्रतेन यथा-

ऽमीअनयोऽअन्नयत्र जानन् ॥15॥

उ.भा.—असौ या । मारुती त्रिष्टुप । असौ या सेना हे मरुतः, परेषां शत्रूणाम् अभि ऐति अभ्यागच्छति नः अस्मान्प्रति ओजसा बलेन स्पर्धमाना । तां सेनांगूहत व्याप्ते । तमसा अपव्रतेन। व्रतमिति कर्मनाम । अपगतकर्मणा । येन तमसार्ध व्यापात्नां नश्यन्ति कर्माणि तदपव्रतं तमः तेनापव्रतेन तमसा वा गूहत । यथामी अन्यो अन्यं न जानन् यथा अभी सैनिकाः अन्योन्यं परस्परं न जानीयुः ।।5।।

श. भा.—हे मरुतः! याऽसौ सेना परेषां शत्रूणाम् अभ्येति अभिमुखमागच्छति अस्मान्यप्रतीत्यर्थः। सेना किम्भूता? ओजसा बलेन अस्मान् स्पर्द्धमाना, तां सेनां तथा गूहत् व्याप्नुवत । केन? अपव्रतेन तमसा। व्रतमिति कर्मनाम, (निरु. 2/13) तथा च येन तमसा शत्रूणां व्रतम् अपगतं भवति तदपव्रतम्। तथा च येन तमसा व्याप्तानां शत्रूणां शराणि नश्यन्ति तेन व्याप्नुवत । तथा कथं? यथाऽमी सैनिका अन्यः अन्यं न जानन् परस्परं न जानीयुरित्यर्थः।।15।।

यत्र बाणाः सम्पतन्ति कुमार विशिखाऽइव ।

तन्नऽइन्द्रो बृहस्पतिरदितिः शर्म्म यच्छतु ॥

विश्वाहाशर्म यच्छतु ॥16॥

उ.भा.—यत्र बाणाः । लिङ्गोक्तदेवंता पंक्तिः । यत्र बाणा इषव संपतन्ति अनिमर्याधम्।

कथमिव कुमारा विशिखा इव। यथा कुमारा अदृष्टपरिकारिणः विगतशिकाः सर्वमुण्डाः तं तमर्थं संनिपतेयुरेवं सपतन्ति तत्रेत्यर्थः । नः अस्माकम् इन्द्रः शर्म शरणम् यच्छुत दातु। बृहस्पतिः शर्म यच्छतु। अदितिः शर्म यच्छतु। विश्वाहा सदाकालं च शर्म यच्छतु। इन्द्रः बृहस्पतिः; अदितिः ।।16।।

श.भा.- तत्र इन्द्रः नोऽस्माकं शर्म्म कल्याणं यच्छतु-ददातु। किं च बृहस्पतिः अदितिश्च विश्वाहा सर्वदा शर्म्म यच्छतु। तत्र कुत्र? यत्र बाणा इषवः सम्पतन्ति। क इव। कुमारा विशिखा इवा। मुण्डितमुण्डाः कुमारा इव। यथा सर्वमुण्डितमुण्डाः कुमाराः क्रीडार्थं तं तं देशं निपतन्तीत्यर्थ।।16।।

मर्म्माणि ते ते व्वर्म्मणाच्छादयामि सोमस्त्वा
राजामृतेनानु वस्ताम् । उरोर्व्वरीयो
व्वरुणस्ते कृणोतु जयन्तन्त्वानु देवा मदन्तु ॥17॥

उ. भा.–मर्माणि ते। लिङ्गोक्त देवता त्रिष्टुप् । कवचं प्रयच्छति मर्माणि ते तव। वर्मणा कवचेन छादयामि। सोमश्च राजा त्वाम् अमृतेन अनुवस्ताम् आच्छादयतु । किं च उरोर्वरीयो वरुणस्ते कृणोतु पृथोरपि प्रथीयः । वरुणः तव कवचं करोतु। किंच जयन्तं त्वाम् अनुमदन्तु उत्साहयन्तु देवाः ।।17।।

श.भा.–हे यजमान ! ते तव मर्माणि जीवस्थानानि वर्मणा कवचेनाहं छादन्यामि अवृणोमि। सोमो राजा त्वाम् अमृतेनानुवस्ताम् आच्छादयतु। किं च वरुणस्ते तव इदं वर्म उरोरपि वरीयः उत्कृष्टादप्युत्कृष्टं कृणोतु करोतु। जयन्तं जयशालिनं त्वा त्वां देवा मदन्तु प्रर्षयन्तु ।।17।।

।। इत्यप्रतिरथसूक्तम् ।।

संदर्भ ग्रन्थ

1. रजतेर्ज्योती रज उच्यते' (4/3/19) इति ।
2. ''अयस्मयादीनि च्छन्दसि'' (पा. 1/4/20) इति सर्वनमस्थानेऽपि पदत्वान्न लोपः। पूर्वेषामधस्तनकल्पोत्पन्नानामवसिताधिकाराणान् ।
3. कृ. य. वे. तै. श्वे. 3/8
4. अ. वे. मु. 3/1/23.
5. तैति.-2/6.
6. अ. वे. के. 1/8/1.
7. बृह. 1/4/1.
8. शू. य. वा. मां. सं 40/5.
9. छा. 3/14.

10. अ. वे. कै. उ. खाँ. 1/2
11. मुण्ड. 3/1/1.
12. कठो. 2/6/6/17.
13. ब्रा. 13/6/2/1.
14. शु. य. वे. अ. 17 म. 19.
15. छा. उ. 6/9/4.
16. बृ. 2/1/20.
17. कृ 3/10.
18. ते. 2/6/1.
19. बृ. 2/36.
20. के. 4/11.
21. बृ. 3/4/2.
22. बृ. 4/3/432.
23. ऋ. 10/115/1.
24. वाग्वै बृहती तस्या; पतिरिन्द्रः । व्याकरणकर्तृत्वात् । यद्वा वाक्परिवेत्याह ।
25. दोयतिर्गतिकमार (निघं. 2/14)
26. रक्षसां हन्ता ।

पञ्चमोऽध्यायः

सूर्यसूक्तम्

श्रौत-मन्त्रेषु रुद्रस्य बहुविध-स्वरूपाणामुल्लेखः प्राप्यते । शुक्ल-यजुर्वेदस्य षडङ्ग शतरुद्रियाध्याये अप्रतिरथ सूक्तेन, रुद्र-स्नपानदि-प्रकरणवशात् रुद्र एव इन्द्र रूपेण स्तूयते। "स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् । स एव विष्णुः स प्राणः स कालाग्निः स चन्द्रमा" इत्याथर्वणिक श्रुतेः।।"

स्वयं ब्रह्मा स्वयं विष्णुः स्वयमिन्द्रः स्वयं शिवः ।
स्वयं सर्वमिदं सर्वं स्वस्मादन्यन्न किञ्चन ॥

"इति बृहदारण्यक"

श्रुतिवचनेन शिव-इन्द्रयोर्मध्ये न कश्चिदपि भेदः । पुनश्च तस्य भगवतः रुद्रस्य रुद्राध्याये आदित्यरूपेण स्तवनं विधीयते। सूर्योदये सर्वमङ्गल प्रदानात् रक्तो वर्णो रुद्रार्कः सर्वप्राणिनां शं विदध्यादिति भावमवलम्ब्य वर्णनं वर्तते। असौ आदित्यरूपो रुद्रः उदयास्तमयो विदधत् सततं भ्रमति एनमादित्य रूपं रुद्रं जलहारिण्यो स्त्रियः गोपाश्च उदयास्त-समये पश्यन्ति। तस्मिन्नेव काले नीलग्रीवः, विष-पानेन नीला ग्रीवा कण्ठो यस्य" तादृशः नील-कण्ठ इव परिलक्ष्यते ।

शुक्लयजुर्वेदस्य तृतीयेऽध्यायेऽपि रुद्रस्य स्तवनं प्राप्यते कैवल्य लाभाय। वयं सर्वे भक्तजनाः तं सर्वैश्वर्य युक्तं रुद्रं पूजयामः। कीदृशं रुद्रं ? सुगन्धिमलौककगन्धयुक्तं मर्त्यधर्महीनं पुष्टिवर्धनं गौ-अश्व-धन-धान्यादि पुष्टेः पुष्टिकर्त्तारं त्र्यम्बकं त्रीणि अम्बकानि नेत्राणि यस्य स त्र्यम्बकः, तं त्र्यम्बकं नेत्रत्रयोयुक्तं रुद्रं हवामहे आह्वायामः, येन रपूजादि कर्मणा प्रसन्नोभूत्वा मृत्योः लौकिक मृत्योः मुक्षीय मुक्तो भवेम। रुद्रो मां मुक्तिं प्रयच्छत्वित्यर्थः एतादृशस्य त्र्यम्बक रुद्रस्यावतारः गौतमीनद्याः तटे भवति स्म यस्य त्र्यम्बक नामकस्य ज्योतिर्लिङ्गस्य दर्शनेन सर्व-पापैः जनाः विमुक्ताः जाय्ते ।

"एक एव रुद्रोऽवतस्थे" न द्वितीयः" "असंख्याता सहस्राणि ये रुद्राअधिभूम्यामिति मन्त्र प्रामाण्यात् असंख्यो भूत्वा एकेन परमात्म-रूपेण तिष्ठति। उक्तं हि यथोपनिषदि-

"एक एव रुद्रोऽवतस्थे" न द्वितीयः" "असंख्याता सहस्राणि ये रुद्राअधिभूम्यामिति मन्त्र प्रामाण्यात् असंख्यो भूत्वा एकेन परमात्म-रूपेण तिष्ठति। उक्त हि यथोपनिषदिः-

"एकोहि रुद्रो न द्वितीयाय तस्थु र्य इमाँल्लोकानीशतईशनीभिः ।
प्रत्यङ्जनातिष्ठति संचुकोपान्तकाले संसृज्य विश्वाभुवनानिगोपाः ।।इति।।
अत्र रुद्र एवं सूर्यरूपेण स्तुतः अस्तीति वेदितव्यम्–

विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति ।।1।।

उबट भाष्य "विभ्राट बृहत् । जगती सूर्यस्तुतिः। द्वितीयोऽहनि ग्रहाणां पुरुरुचः। द्वितीऽर्धर्चः प्रथमं व्याख्यायते यच्छब्दयोगात् । यः वाताजूतः वातप्रेरितः वाते यस्य वोदेस्याभिप्रायः।

अभिरक्षति त्मना आत्मनैव जगत्। 'मन्त्रेष्वाङ्यादेरात्मनः' इत्याकारलोपः। यश्च प्रजाः पुपोष पोषयति शीतोष्णवर्षैः। यश्च प्रजाः पुपोष पोषयति शीतोष्णवर्षैः। यश्च पुरुधा विराजति बहुधा च दीप्यति अग्निविद्युत क्षत्रादिरूपैः। स विभ्राट् विविधं भ्राजते इति विभ्राट् सूर्यः। बृहत् महत् पिबतु सोम्यं सोममयं मधु। किं कुर्वन् । आयुः जीवनम् दधत् स्थापयन् यज्ञपतौ यजमाने। अविह्रुतम् अनवखण्डितम् । 'ह्व कौटिल्ये'। 'ह्युह्युरेश्छन्दसि' इति हुआ देशः।।3।।

श. भा.–विभ्राडिति । स सूर्यः सोम्यं सोममयं मधु हविः पिबतु । सूर्यः किम्भूतः? विशेषेण भ्राजते दीप्यते इति विभ्राट् । किं कुर्वन् ? यज्ञपतौ यजमाने अविह्रुतम् अनवखण्डितम् आयुर्दधत् स्थापयन् । "हवृकौटिल्ये" (भ्वा. प.) "ह्रु ह्वरेच्छन्दसी"ति हवृकारस्य ह्रुआदेशः। स कः? यः सूर्यः येनात्मनाऽऽत्मनैव जगदभिरक्षति "मन्त्रेष्वाङ्यादेरात्मन" (पा. 6/4/141) इत्याकारलोपः। सूर्यः किम्भूतः? वातजूतः वातप्रेरितः । वातप्रेरितमेव जूतं चेष्टितं [1]यस्येत्यर्थः। यश्च प्रजाः पुपोष पोपयति शीतोष्णवर्षैः। यश्च पुरुधा बहुधा विराजति दीप्यतेऽग्निविद्युन्नक्षत्रादिरूपैः। मधु किम्भूतं? बृहत्-महत् ।।1।।

उदु त्यं जातवेदसं देव वहन्ति केतवः । दृशे
विश्वाय सूर्य स्वाहा ।।2।।

उ. भा.–दाक्षिणानि जुहोति । उदुत्यम् । सौरी गायत्री ! उत् उत्ययमुपसर्गो वहन्तीत्यनेन संबध्यते । उद्वहन्ति । कम् त्यं तं सूर्यम् । जातवेदसम् जातप्रज्ञानम् । देवं दातारं द्युस्थानंवा । केतवो रश्मयः । किमर्थमुद्वहन्ति । दृष्टे दर्शनाय । विश्वाय षष्ठयर्थे चतुर्थी । विश्वस्य जगतः ।।2।।

श. भा.–उत् इत्युपसर्गः वहन्तीत्यत्रान्वेति । उ शब्दः शोभार्थः । त्यमिति त्यद् शब्दस्य प्रयोगः । त्यं-तं सूर्यदेवं केतवः-रश्मयः उद्वहन्ति-ऊद्ध्वं नयन्ति सूर्यं किम्भूतं? जातवेदसे-अग्नितेजोमयं, यद्वा जातं वेदः कर्मफलं यस्मात्तं जातवेदसम् । किमर्थमुद्वहन्ति? विश्वाय-विश्वस्य हशे दर्शनाय उदवहन्ति । अयं वाक्यार्थः, तेजःस्वरूप सूर्यदेव विश्वप्रकाशनार्थं रश्मय ऊद्ध्वं वहन्ति इति आदित्योत्कीर्त्तनम् ।

येना पावक चक्षसा भुरण्यन्तं जनाँ ॥2॥ अनु ।
त्वं वरुण पश्यसि ॥3॥

उ. भा.– येना पावक । द्वे ययौ सर्वमेधाग्निश्चीयते तेन रूपेण। आत्मानं संपाद्य क्षिप्रं यजमानो मोक्षं प्राप्नोति तदिह प्रार्थ्यते। येन हे पावक पावयितः, येन चक्षसा दर्शनेन। भुरण्यतम् जनान् अनु। शकुनिः क्षिप्रपाती भुरण्युरित्यभिधीयते। सर्वमेधयाजिनो जनान् अनुभुरण्यन्तम पक्षिरूपेणात्मानं संपाद्य क्षिप्रम् गच्छन्तमित्यर्थः। त्वं हे वरुण सूर्य, पश्यसि। तदोध्याहारेण वाक्यपरिपूर्तिः। येन जनान् अनुभुरण्यत पश्येति ।।32।।

श. भा.–हे पावक! पावयितः शोधक! सूर्य्य! येन चक्षसा दर्शनेन जनान् अनुलक्षीकृत्य तं सर्वमेधयाजिनं यजमानं-भुरण्यन्तं-भुरण्य[2]-पक्षिवत् शीघ्रं गच्छन्तं पश्यसि। हेरुण! सूर्य! त्वं च तेन ध्यानेनास्मानपि भुरण्यतः पश्येत्यर्थः । शकुनिवच्छीघ्रगामी भुरण्युरिति उव्वटः ।।3।।

दैव्यावध्वर्यु आगतꣳरथेन सूर्यत्वचा। मध्वा
यज्ञꣳसमंजाथे। तं प्रत्नथायं वेनश्चित्रं देवा नाम ॥14॥

उ.भा.– दैव्यावध्वर्यू। हे दैव्यावध्यर्यू अध्यवरस्य नेतारौ इह आगतम् आगच्छतम् आगमनं कुरुतम् । रथेन सूर्यत्वचा सूर्यस्येव त्वक् यस्य स सूर्यत्वक् तेन सूर्यत्वचा । मध्वा मधुस्वादुना हविष सोमपुरोडशेन दध्यादिना । यज्ञं समञ्जा समाप्तमिति साधुरूपं समंजयतम्। प्रभूतानि हवींषि कुरुतमित्यर्थः। तं प्रत्नथाऽयं वेनश्चित्रं देवाना मिति तिस्रः प्रतीकोक्ताः ।।3।।

श. भा.–हे दैव्यौ अध्वर्यू ! हे देवसम्बन्धिनौ अध्वरनेतारौ ! इह आगतम् आगच्छतं, केन? सूर्यत्वचा सूर्यदीप्तिमता रथेन । सूर्यस्येव त्यक्दीप्तिर्यस्य स सूर्यत्वक् तेन। आगत्य च मध्वा मधुस्वादवता हविषा सोमपुरोडाशद्रव्यादिना यज्ञं समञ्जाथे संम्रक्षयतं समं कुरुतम्। अञ्जेरेतद्रूपम् । प्रभूतानि हवींषि कुरुतम् इत्यर्थः ।।4।।

तं प्रत्नथा पूर्वथा विशवथेमथा ज्येष्ठतातिं बर्हिषद ꣳ स्वर्विदम् । प्रतीचीनं वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्द्धसे ॥5॥

उ. भ.–शुक्रं गृह्णाति। तस्य पुरोरुक् । ते प्रत्नथा। जगती अनिरुक्ता प्रकरणाच्च शुक्रोभिधीयते। अत्र च व्यवहितैः पदैः वाक्यं प्रायश कल्प्यते। हे सोम, तमिन्द्रं ज्येष्ठतातिम् उत्कृष्टताति उत्कृष्टविस्तारम् । अथवा 'वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि' इति तद्धितः प्रशंसायाम्। ज्येष्ठतार्ति ज्येष्ठप्रशस्यम् । बर्हिपदम् यज्ञेषु वर्हिषि सीदतीति वर्हिषदम्। स्वर्विदम्। स्वशब्देन द्युलोकोऽभिधीयते। द्युलोकं जानाति तत्र हि तस्य निवासः। धुनिम्। 'धुञ् कम्पने'। कम्पयितां?शत्रूणाम् । आशुं जयन्तम् शीघ्रं जयन्तं जेतव्यानि वस्तूनि ।

तमेवंगुणविशिष्टमिन्द्रं हे सोम, थासु अनु वर्धसे । यासु विक्षु येषु यजमानेषु वर्धसे पुनःपुनः संस्क्रियसे तासु तासु क्रियासु त्वमवस्थितः तत्र प्रतीचीनं वृजनं दोहसे । प्रतीचीनमात्मनोऽभिमुखमिन्द्रमवस्थाप्य स्ववीर्येण तर्पयित्वा अस्मे यजमानाय वृजनम् । वृजनमिति

वलनाम। बलबच्च यज्ञफलं दोहसे प्रक्षारयसि। कथं पुनर्दोहसे प्रत्नथा। था उपमार्थीयः। प्रत्नशब्द; पुराणवचनः । चिरन्तनानामिव ऋणीषां भृगुप्रभृतीनां दोहसे । इमथा। इदानीन्तनानामिव यजमानानं दोहसे।।12।।

श. भा.–तमिति । हे सोमयाग! यासु विक्षु येषु यजमानेषु अनुवर्द्धसे पुनः संसक्रियसे तासु तदीसु क्रियासु व्यवस्थितः सन् प्रतीचीनमात्मनोऽभिमुखम् इन्द्रम् अवस्थाप्य स्ववीर्येण स्थापयित्वा अस्मै यजमानाय वृजनं बलवद्यज्ञफलं दाहसे पूरयसि। कथं? प्रत्नथा। थाउपमार्थीयः, प्रत्नशब्दः पुराणवचनः । तथा च चिरन्तनानामिव ऋःषीणामित्यर्थः,। पूर्वथा पूर्वेषामिव ऋषीणां साध्यानां, विश्वथा विश्वेषामिव ऋषीणाम, इमथा इदानीन्तनानामृषीणामित्यर्थः । इन्द्रम् किम्भूतं? ज्येष्ठतातिं उत्कृष्टविस्तारम् । अथवा ज्येष्ठप्रशस्यं, बर्हिपदं बर्हिषि तिष्ठन्तं, स्वविंदं, स्वर्लोकं जानन्त, तद्वासित्वात् । धुनिं कम्पयितारं "शत्रुणामि"ति शेषः । "धूञ्कम्पने"। आशुं जयन्तं शीघ्र जयशालिनं "जेतव्यानि" इति शेषः ।।5।।

अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायु रजसो विमाने। इममापाᳬसङ्गमे सूर्यस्य शिशुन्न विप्रा मतिर्भी रिहन्ति।।16।।

उ.भा.- मन्थिनं गृह्णाति अयं वेनः। सोम्यानया त्रिष्टुभाधिदैवमधियज्ञं वावस्थित; स्तूयते। अधिदैंव तावचन्द्रात्मना संस्तूयते। अयं वेनश्चोदयत्पृश्निगर्भाः। वेनः वेनतेः कान्तिकर्मणः। अयं चन्द्रमा वेन कान्तः। चोदयत् । 'चुद संचोदने'। प्रेरयति पृश्निगर्भाः द्युलोकः पृश्निरादित्यो वा। साधारणत्वाद् द्युलोकगर्भा वा आदित्यगर्भा वा आपः। ज्योतिर्जरायू । ज्योतिरस्य जरायुस्थानीयं भवति चन्द्रमसः। रजसो विमाने । उदकं रज उच्यते। उदकस्य विनिर्माणकाले प्राप्ते ग्रीष्मान्ते। इदानीमधियज्ञमवस्थितमुच्यते। इममेव च सोमं अपां च सूर्यस्य च संगमे गृहीताभिरद्भिर्वसतीवरीलक्षणाभिरभिषुतं सन्तं शिशुंन शिशुमिव विप्रा मेधाविनो ब्राह्मणाः मतिभिः रिहन्ति स्तुवन्ति स्तोत्रशास्त्रै;। रिहतिर्हि अर्चतेः कर्मसु पठितः। वसतीवर्यश्चापः अपां संगमे सूर्यस्य च संगमे गृह्यन्ते । तत्र ह्येवं पठ्यते। ता वै स्यन्दमानानां गृह्णीयात् दिवा गृह्णीयादिति च ।।6।।

श.भा.–अयं वेनः कान्तश्चन्द्रमा इति यावत् । पृश्निगर्भा अपः चोदयत् प्रेरयति। "लेट्" (पा. 3/4/77) इतो लोपः । वर्षतीत्यर्थः । पृश्निर्द्युलोकः सूर्यो वा । तस्य गर्भे तिष्ठन्तीति [1]पृश्निगर्भाः। वेन इति "विनकान्तावि"त्यस्य [2]प्रयोगः। चन्द्रमाः । किम्भूतः ? ज्योतिर्जरायुः-ज्योतिरेव जरायुः जरायुवत् गर्भपुटबन्धनमस्य। कस्मिन् समये? रजसः जलस्य (निघं. 4/1/39) विमाने त्यागसमये [3]ग्रीष्मान्त इत्यर्थः । इममेव सोमम् अपां सूर्यस्य च सङ्गमे "गृहीताभिर्वसती वरीलक्षणाभिरद्भिरभिषुतं सन्तमि"ति शेषः शिशुं न-शिशुमिव विप्रा मेधाविनो मतिभिः मतिपूर्वकवाग्भिः रिहन्ति स्तुवन्ति। सोमाभिपवार्थं वसतीवर्य्यः आपः अपां सूर्यस्य च सङ्गमे गृह्यन्ते । "ता वै स्यन्दमानानां (वहन्तीनां) गृह्णीयादिवा गृह्णीयादि"ति श्रुतेः।।6।।

चित्रं देवानामुदगार्दनीकं चक्षुर्मित्रस्य वरुण स्याग्नेः। आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च स्वाहा ॥7॥

उ.भा.– द्वितीयं जुहोति। चित्रं देवानाम् । सौरी त्रिष्टुप् । सूर्यश्चात्र परापरूपेणावस्थितः स्तूयते। चित्रं देवानामुदगादनीकम् । उदयकालादारभ्य तावदपररूपेण स्तूयते। चित्रमिति क्रियविशेषणम् । यश्चित्रमुद्गात् चित्रमाश्चर्यभूतमुदगमत् । आश्चार्यं हि यः स्वकीयेन ज्योतिषा शार्वरं तमोपहत्वान्येषां ज्योतिषां ज्योतिरादायोद्गच्छति । यद्वा चित्रं चायनीयं पूजनीयमुदगतम्। देवानामनीकमित्यनोः पदयोः संबन्धः। देवानां रश्मीनामनीकं मुखम् । यच्च चक्षुर्मित्रस्य चक्षुर्मित्रादिकस्य सदेवमनुष्यस्य जगतः। आदित्योदये हि चक्षुर्मित्रादिकस्य सदेवमनुष्यस्य जगतः। आदित्योदये हि रुपाण्यभिज्यन्ते। यश्च आप्रा द्यापावृथिवी अन्तरिक्षम् यच्च उदयसममेव आ अप्राः 'प्रा पूरत्रणे' आपूरितवत् स्वकीयेन प्रकाशेन द्यावापृथिव्यौ अन्तरिक्षं च। अधस्तनानि विशेषणानि मण्डलाभिप्राययात्रपुंसकलिङ्गान्यनूद्य अथेदानीं पररूपेण स्तौति। सूर्य आत्मा पुरुषाभिप्रायमेतत् । जगतो जङ्गमस्य तस्थुषश्च स्थितिमित स्थावरस्य चेत्यर्थः। तथाच श्रुतिः 'यमेतमादित्ये पुरुषं वेदयन्ते स इन्द्रः प्रजापतिस्तादब्रह्म इति। सूर्यद्वैतमनेन मंत्रेण ख्याप्यते स सूर्यात्मत्वेनोपास्यः । एवं तादवधियज्ञं गतोऽप्यं मत्रोऽधिदैवमाचष्टे। अध्यात्मं तु वक्ष्यति। 'यो वासावादित्ये पुरुषः' इत्यादिना।।7।।

श.भा.–असौ सूर्यश्चित्रमाश्चयरूपं यथा एव मुदगात्-उदितोबभूव, किम्भूतः सूर्यः? मित्रस्य वरुणस्याग्नेः त्रयाणां देवानां चक्षुः–अक्षिभूतः । पुन; किम्भूतः? देवानां मित्रादिव्यतिरिक्तानां मन्येषामनीकं-समूहः । द्यावापृथिवी द्यावापृथिव्यौ अन्तरिक्षं च स्वर्गमर्त्याकाशान् आप्राः आपूरितवान् । स्वरश्मिजालेनेति शेषः । पुनः किम्भूतः? जगतः-जंगमस्य तस्थुषः स्थावरस्य चात्मा। स्थावरजङ्गमात्मकसकलसंसारमयोऽयमेव सूर्य इत्यर्थः । आप्रा इति आङ्गपूर्वस्य "प्रापूरणे" इत्यस्य लङ्गप्रथमैकवचनस्थाने तिडांतिङ्गे भवन्तीति मध्यमपुरुषैक वचनम् ।।7।।

आ न इडाभिर्विदथे सुशस्ति विश्वानरः सविता देवऽ एतु। अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा॥8॥

उ. भा.– आ. नः त्रिष्टुप् । द्वितीयोऽर्धचः प्रथमं व्याख्यायते यच्छब्दयोगात् । अपि यथा येन प्रकारेण । हे देवाः, युवान सर्वकर्मक्षमा अविपरिणामिनो वा मत्सथ माद्यथ तृप्यथ नः अस्माकं गृहे। विश्वं जगदुद्धराम इति कृत्वा अमिपित्वे अभितपतनकाले प्राप्ते। मनीषा मनीषयेति विभक्तिव्यत्ययः। मनस इच्छया। अपि तथा तेन प्रकारेण माद्यत यथेष्टम्। न अस्माकं विदथे यज्ञे इडाभिः करणभूतैः । सुशस्ति अविभक्तिको निर्देशः। सुशस्तिभिश्च शोभनैः शंसनैश्च करणभूतैः। विश्वानरः आएतु सविता च देवः आ एतु ।।81।।

श. भा.–सविता देव नः अस्माकं विदथे यज्ञे तथा तेन प्रकारेण आ एतु आगच्छतु। इडाभिः यज्ञकारणभूताभिः सुशस्तिभिः शोभनशंशनहेतुभूतैः। 'सविता किम्भूतः? विश्वानरः 'विश्ववर्तिनां जनानां स्वत एव रक्षकः।

स्वपादित्युवटः । तथा कथम् ? यथा येन प्रकारेण हेतुना वा हं युवानः! कर्मक्षमाः आगमनकाले अपरिणामिनः अवृद्धाः देवा इति यावत् । नः कृते विश्वं जगत् सर्वं जगत् मत्सथ तर्पयथ। अभिपित्वे अभिपतनकाले अन्नाय वा। कया? मनीषा-मनीषया-बुद्ध्या।।8।।

यदद्य कच्च वृत्रहन्नुदगाऽअभि सूर्य । सर्वं तदिन्द्र ते वशे ॥9॥

उ. भा.—यदद्य । द्वे गात्र्यौ। यत् अद्य कच्च कुत्रचित् यत् । हे वृत्रहन् वृत्रस्य पाप्मनः शार्वरस्य तमसो हन्तः, त्वम् उदगा अभि अभ्युदगाः अभ्युदेषि। हे सूर्य, तत्सर्वमेतत् हे इन्द्र ऐश्वर्ययुक्त, ते तव वशे वर्तते। (त्वमेवैक ईश्वरो न द्वितीय इत्यभिप्रायः ।।9।।

श. भा.—हे वृत्रहन् ! वृत्रं शावरं तमस्तस्य हन्तः[1]! सूर्य! अद्य यत् यत्र कच्च कुत्रचित् त्वम् अभ्युदगाः अभ्युदेषि।[2] हे इन्द्र परमेश्वर![2] सूर्य ! तत्सर्वं तव वशे वर्त्तके। तत्र त्वमेवैक ईश्वरो नान्य इत्यभिप्रायः ।।9।।

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमाभासि रोचनम् ॥10॥

उ. तरणिर्विश्वदर्शतः। यस्त्वं तरणिरसि तूर्णं वर्तसे विश्वदर्शतः सर्वदर्शनीयश्चासि। ज्योतिष्कृत् ज्योतिषश्च कर्तासि हे सूर्य, तं त्वां प्रति तथा ब्रूमः त्वमेव विश्वं सर्वम् आभासि दीपयसि। रोचनं दीप्तम् अग्निवद्युद्ग्रहतारकारूपं त्वदीयमेवैक ज्योति; सर्वत्राभातीत्यर्थः ।।10।।

हे सूर्य ! त्वं तरणिः ऊद्ध्र्व तूर्णं प्रवतर्ते विंशवदर्शतः विश्वस्य सर्वस्य दर्शनीय; ज्योतिष्कृत ज्योतिषां कर्ता असि-भवसि। अतऽत्वामिन्थंभूतं ब्रूमः-त्वमेव विश्वं सर्वं जगत् आभासि दीपयसि। विश्वं कथम्भूतं? रोचनं दीप्यमानम् अग्निविद्युतनक्षत्रादिरूपेण त्वमेव सर्वत्र भासीत्यर्थः ।।10।।

तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततꣳसंजभार।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥11॥

उ.भा.— तत्सूर्यस्य । द्वे त्रिष्टुभौ । तदेव सूर्यस्य देवस्वम् । तच्च महित्वं महाभाग्यम्। तत्मिकित्यत आह । मध्वा कर्तो-विततं संजभार मध्या मध्ये इत्यर्थः। कर्तोः कर्मण इत्यर्थः। मध्ये यत्कर्मणां क्रियमाणानां देवासुरमनुष्यसंवन्धिनां विततं रश्मिजालं अहर्लक्षणं संजभार। अयमेव संहरते नान्य एतत्तनितुं शक्नोति न चोपसंहर्तुमित्यभिप्रायः। किंच यदा इत् अयुक्त यदा प्रयुक्ते आत्मनि आत्मसंस्यान्करोति हरितः हरितवर्णानृश्मीन् ह्यस्तमनकाले लोहिततां यन्ति सधस्थात् सहस्थानादाह्वत्य पृथिव्यादिलोकत्रयं तेषां सहस्थानम् तत्रहि ते निपतन्ति। आद्रात्रीवासस्तनुते। आत् अथानन्तरम् रात्री तमोमयं वासः तनुते विस्तारयति। सिमस्मै सर्वस्मै जगति एकत्रादित्यसहितं ज्येतिरेकत्र तमः आदित्यप्रभावात्प्रभ्रमतीत्यमभिप्रप्तयः ।।11।।

श. भा.—सूर्यस्य तदेव देवत्वं तदेव महित्वं महिमा यत्कर्त्तोः कर्मणो मध्या मध्ये विततं रश्मिजालं कल्पान्तं इवान्तकाले संजभार संजहार[6] संहरते। नान्य एतत्तनितुं शक्नोति नोपसंहर्तुमित्यभिप्रायः । किञ्च यदा इत यदा एव सधस्थान् रश्मीनां सह[7] स्थानात् अर्थात्

पृथिव्यादिलोकत्रयात्। ते हि तत्र निपतन्ति अतस्तस्मात् हरितः हरिद्वर्णान् रश्मीन् आत्मनि अयुक्त युक्तवान् [1]आत्मसंस्थानकरोत् । आद्रात्रीति। आत् अथ रात्री सिमस्मै सर्वस्मै जगते वासः तमोमयं वासः [2]तनुते विस्तारयति। एवमेकत्रादित्यसहितं ज्योतिरन्यत्र तमः। आदित्यप्रभावाद्वसतीत्यभिप्रायः ।।11।।

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे ।

अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः संभरन्ति ॥12॥

उ. भा.—तन्मित्रस्य । सूर्यः तद्रूपं ज्योतिः कृणुते कुरुते द्योर्लोकस्य उपस्थे उत्सङ्गे। मित्रस्य वरुणस्याभिचक्षे अदर्शनाय। मित्रो हि सुकृतिनो गृह्णाति एवमनेन प्रकारेण जगदनुग्रह्णातीत्यभिप्रायः। किंच अनन्तम् अपर्यन्तं कालतः देशतश्च। अन्यत् एकम् । रुशत् शुक्लं जरामरणादिभिर्वियुक्तम्। विज्ञानघनमानन्दः अस्य सूर्यस्य पाजः। पाज इति बलनाम इह तु रूपमुच्यते। रूपम् अस्तीति शेषः। तच्चाद्वैतलक्षणम् कृष्णं द्वैतलक्षणं अन्यत् अपरं रूपम् हरितः हरिणा इन्द्रयवृत्तयः संभरन्ति निदानभूता भवन्ति।।12।।

श.भा.—सो मित्रस्य वरुणस्य च अभिचक्षेऽभिदर्शनाय द्यौः द्युलोकस्य उपस्थे उत्सङ्गे तत् रूपं कृणुते मण्डलाकृतिरूपं करोतीत्यर्थः । येन रूपेण जनानाभिचक्षे भिष्चष्टे अभिपश्यति। लडर्थे लिट् (पा. 3/4/6) मित्रो हि सुकृतिनोऽनुगृह्णाति। वरुणो दुष्कृतिनो निगृह्णाति। सूर्योदये हि एवमनेन प्रकारेण तौ जगदनुगृह्णीत इत्यर्थः। किं-च अस्य सूर्यस्यान्यत् पाजः रूपं हरितो दिशः। इन्द्रियवृत्तयो वा सम्भरन्ति संहितं बिभ्रति।[3] रूपं किम्भूतम्? अनन्तम्-अपर्यन्त "कालतो देशतश्च। रुशत् शुक्लं जरामरणाद्ययुक्तं विज्ञानघनानन्दमयमित्यर्थः। अन्यच्च कृष्ण द्विविधमित्यर्थः ।।12।।

बण्महाँ 2॥ असि सूर्य बडादित्य महाँ॥ असि। महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ 2॥ असि ॥13॥

उ. भा.—वण्महान् । प्रगाथ; द्वाभ्याम् । पूर्वा बृहती उत्तरा सतोवृहती। वद सत्यम् महान्परब्रह्म असि। हे सूर्य, हे आदित्य, तेजसामादानादादित्यः। महानसि । किंच मह; महतः ते तव सतः महिमा महाभाग्यं सर्वेषु देवेष्ववस्थितम् पनस्यते पूज्यते सर्वैः प्राणिभिः अद्धा सत्यं हे देव दानादिगणयुक्त, महान् असि। अभ्यासे भूयांसमर्थ मन्यन्ते यथा अहो दर्शनीयाहो दर्शनीया इति।।13।।

श.भा.—हे सूर्य ! बट् सत्यं (निघं. 3/10) महानसि ! महदसि ब्रह्मेत्यर्थः। हे आदित्य[7]! बट् सत्यं महानसि 'तेजसा'' इति शेषः। किं च महः महतः सतः ते तब महिमा महाभाग्यं सर्वदेवेष्ववस्थितं सर्वैः प्राणिभिः पनस्यते पूज्यते। (निघं. 3/14) अतः हे देव! दानक्रीडादियुक्त! अद्धा [8]तत्त्वतः महानसि। "अभ्यासे भूयांसमर्थ मन्यन्ते"। (निरु. 10/42) यथाऽहो दर्शनीयोहोऽदर्शनीयोऽत्र न पुनरुक्तिदोषः। एवं वट् सूर्य इति ।।13।।

बटसूर्य श्रवसा महाँ2॥ असि सत्रा देव महाँ2॥ असि। मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥14॥

उ. भा.–बट् सूर्य बट् सत्यम् हे सूर्य, श्रवसा श्रवणीयेन धनन महानसि। सत्रा सत्यम् हे देव, महानसि। किंच मह्न स्वकीयेन महत्वेन त्वमेव देवानां मध्ये असुर्यः। असवः प्राणाः सन्ति येषां ते असुराः रो मत्वर्थीयः तेभ्यो हितः असुर्यः। उगवादित्वाद्यत्। प्राणिभ्यो हित इत्यर्थः। पुरोहितश्च पुर एनं धाति सर्वेषु कार्येष्विति पुरोहितः। किंच विभु व्यापि। ज्योतिः विज्ञानघनानन्दम्। अदाभ्यम् अनुपहिसितम् ।।14।।

श.भा.–हे सूर्य ! बट् सत्यं श्रवसा श्रवणीयेन बलेन (निघं. 2/9) धनेन (निघं 2/10) कीर्त्या वा (निरु. 4.24) महानसि। हे देव! सत्र सत्यं (निघ. 3/10) महानसि। किं च मह्ना स्वकीयमहत्त्वेन देवानां मध्ये असुर्य्यः अति। असुरस्यास्तीति असुरः प्राणी तस्मै हित; असुर्य्यः। "उगवादिभ्यो यत्" (पा. 5/1/2) इति यत्। प्राणिनां हित इत्यर्थः। पुरोहितः- पुरः एनं दधति सर्वकर्मस्विति पुरोहित; प्रथमपूज्यः। किं च विभुं व्यापकम् अदाभ्यम् अनुपहिंस्यं ज्योतिः विज्ञानघनानन्दमयमसीत्यर्थः ।।14।।

श्रायन्त इव सूर्य विश्वेदिर्यन्द्रस्य भक्षत। वसूनि जाते जनमानऽओजसा प्रति भागन्न दीधिम ॥15॥

उ. भा.–श्रायन्त इव। बृहती। यथा श्रायन्त आश्रिताः सूर्यरश्मयः विश्वनि धनानि। इदिति निपातः पादपूरणार्थः। इन्द्रस्थ संबन्धीनि इन्द्रानुज्ञातानि। भक्षत आख्यातमेतत् अनुदात्तत्वात् विभक्षन्ते विभक्षन्ते एवं वयमपि समाश्रिताः सूर्य विश्वानीन्द्रस्य धनानि विभक्षामः। किंच वसूनि धनानि जाते पौत्रादौ जनमाने जनिष्यमाणे च भविष्यत्कालविषये। ओजसा बलेन ज्ञानकर्मसमुच्चयकारितया। प्रतिपुरुषम् भागं न भागमिव। दीधिम निधीमहि स्थापयाम। दधातेरेतद्रूपं नतु ध्यायतेरर्धपौष्कल्प्यात् ।।15।।

श. भा.–यथा सूर्य रश्मयः श्रायन्त [1]इव श्रयन्त एव किञ्च इन्द्रस्य इन्द्रसम्बन्धीति इन्द्रानुज्ञातानि विश्वा-[2]इत सर्वाणि वसूनि धनानि[3]। सूर्य भक्षत[4] अभक्षत भजन्ते।[5] एवं वयमपि सूर्यं समाश्रिताः तदुषष्टम्भात्। विश्वनीन्द्रस्या धनानि जाते-पुत्रपौत्रप्रपौत्रादौ जनमाने जनिप्यमाणे च भविष्यत्कालविषये ओजसा वलेन ज्ञानसमुच्चयकारितया प्रतिभागं नकार उपमार्थीयः। प्रतिपुरुषं भागमिव [6]दीधिम निधीमहि। स्थापयामः। दधातेरेतद्रूपं न ध्यायतेः[7]।।15।।

अद्या देवा उदिता सूर्यस्य निरंहसः पितृता निरवद्यात्।
तन्नोमित्रो वरुणो मामहन्तामादितिः सिन्धुः पृथिवी उत द्यौः ॥16॥

उ. भा.–अद्या देवाः। द्वे त्रिष्टुभौ। अद्यास्मिन्नहनि हे देवाः, रश्मयः उदयकाले सूर्यस्य। निरंहसः पिपृत निष्पिपृत निर्मुञ्चत अंहस; पापात्सकाशात् अंहतिश्चाहश्चाहुश्च हितनिगूढोपधाद्विपरीतात् निरवद्यात् निष्पिपृत च निर्मुञ्च च अवद्यात् अवदनीयात्। येन दुर्यशो

भवति तद्वद्यम् । तदेतदुच्यमानम् नः अस्माकम् मित्रावरुणः मामहन्तां पूजयतु । अदितिः सिन्धुः नदी। पृथिवी उत अपि च द्यौः ।।16।।

श. भा.–हे देवा [1]रश्मयः! अद्या अद्य सूर्यस्य[2] उदिता उदये सति (उदयकालीना यूयम्) नः अस्मान् अंहसः पापान्निप्पिपृत निर्मुञ्चत-निर्मोचयत अवद्याच्च निष्पिपृत। अवद्यमवाच्यं दुर्यशः। तत् हेतौ। तस्माद् वरुणः मित्रश्च मा मां महन्तां पूजयन्ताम् । उत अपि च। अदितिः सिन्धुः पृथिवी द्यौश्च मामहन्तां पूजयन्तु।।16।।

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥17॥

उ. भा.–आ कृष्णेन । आवर्तमानः पुनः पुनर्भ्रमणं कुर्वन् । कृष्णेन रजसा रात्रि लक्षणेन सह निवेशयन् स्वेषु स्वेषु प्रदेशेषु स्थापयन् अमृतं देवादिकम् मर्त्यं च मनुष्यादिकं च । हिरण्ययेन हिरण्यमयेन सविता रथेन। आदेवो याति आयाति देव; दानादिगुणयुक्तः भुवनानि भूतजातानि पश्यन् कानि कानि वा असाध्विति स्वरूपानुवादः ।।17।।

श.भा.- सविता सूर्य आयात्यागच्छति। किम्भूतः सविता? देवः स्तुतिदीप्तिक्रीडायुक्तः। केनायाति? रथेन। किम्भूतेन ? हिरण्येन सौवर्णेन। क कुर्व्वन् ? भुवनानि पश्यन् भुववर्त्तिनो लोकान् पुण्यपापकर्तॄन् क्षिप्रन्निरीक्षमाण इत्यर्थः। न केवलमेवं किं तु अमृतं देवं मर्त्य मनुष्यं च निवेशयन् । "स्वे स्वे व्यापार इति शेषः। मनुष्याः सूर्य्योदये यागादिभिर्देवान् प्रीणयन्ति। पुनः किम्भूतः सविता? आवर्तमानः पुनः पुनस्तमेव देशामागच्छन । केन सह? रजसा रात्रिकालेन, प्रायो रात्रिकालोऽपुण्यकर्मणा मनुष्यादीनांमिति रात्रेः कृष्णत्वमुक्तम्। अयं वाक्यार्थः। यः सविता देवः देवमनुष्य व्यापारस्थापकः यश्च पुण्यपापसाक्षी तस्यार्चादिकमुचितमिति।। अत्र आयातीति व्यवहितेनाङा सम्बन्धः। आवर्तमान इत्यत्र च। छन्दसि 'व्यवहिताश्चे' (पा. 1/4/82)ति पाणिनीयसूत्रात् । हिरण्ययेनेति हिरण्मयार्थे निपातः (पा. 6/1/174)।।17।।

इति षडङ्गे चतुर्थः

रुद्रसूक्त

देवः सर्वज्ञः सर्वेश्वरः समस्तमपिप्रपञ्चमुत्पाद्य व्यवस्थितः । तेषां भगवतां सृष्टानां प्रजासृष्टि हेतुनां यागदानादि प्रवृत्तिसाध्यं धर्ममनुष्ठातुमधिकृतानां स्वकीयत्वेन तदुपादनमुपपन्नमित्यर्थः। ऐश्वर्यमीश्वरत्वं स्वातन्त्र्यं, शक्तिस्तदर्थ निवर्त्तनसामर्थ्यं, बलं सहाय संपत्तिः, वीर्य पराक्रमत्वं, तेजस्तु प्रागल्भ्यमप्रधृष्यत्वम्, एते च षडगुणाः सवविषया सर्वदा भगवति वर्तते । अतस्तस्यैव ऐश्वर्यस्य दिग्दर्शनं शुक्लयजुर्वेद-संहितायः षोडशेऽध्याये बहुल रूपेण भवति। तत्र वर्णितं विद्यते यत् यत्किञ्चित्त इह खलु जगति विद्यते, तत्सर्व रुद्र एव। तमन्तरेण लोके न किञ्चदपि स्थातुं शक्यते । अतः जगतः सर्वे पदार्थाः अध्यायेऽस्मिन् रुद्ररूपेण ज्ञायन्ते। अतस्तेषां रुद्राणां स्तुतिः तत्र स्फुटरूपेण विलसति।

रुद्राध्याये षट्षष्टिः मन्त्रास्सन्ति । अस्मिन् खल्वाध्याये भगवतः रुद्रस्य अद्वैतरूपेण व्याख्या समुपलब्धा वर्तते। वेदान्त दर्शनस्य "सर्व खल्विदं ब्रह्म" इति सिद्धान्तस्यानुसारेण रुद्राध्याये भगवतः रुद्रस्य अद्वैतदृष्ट्या विमर्शः प्रतिकण्डिकायां दृष्टिगोचरो भवति। पञ्चदशेऽध्याये चयनमन्त्रा;, तदनु च शतरुद्रियाख्य होममन्त्राः विद्यन्ते ।

हिरण्यशकलैरग्निप्रोक्षणान्तरं शतरुद्रिय संज्ञो होमः । तस्याहवनीयं प्राप्तावपवादमाह। उत्तरपक्ष पश्चिमकोणे याः परिश्रितो जङ्घामात्रादयः पूर्व निखातास्तासु होमः। तस्मिन् शतरुद्रियाख्येय हो मे जर्तिलैरारण्यतिलैर्मिश्रान्गावेधुकासक्तूनर्क पात्रेण जुहोति केन विधिना जुहोति। अर्ककाष्ठेन संततं क्षारयन् परिश्रित्सु पातयन् अर्कपत्रं दक्षकरेणादायार्क काष्ठं वामेनादाय तेन पातनीयम्। अजादुग्धमिति केचित् सक्तु स्थानेऽऽमनन्ति। उदङ्मुखो नमस्तऽइत्याध्यायेन" इति कात्यायन सूत्रस्यार्थोऽवगन्तव्यः ।

"नमस्त" इत्यारभ्य "मानस्तोके तनये" इति पर्यन्तस्य षोडशर्च्चस्य चतुर्दशनामाद्यानां परमेष्ठी ऋषिः नमस्त "इति मन्त्रस्य गायत्रीच्छन्दो याति" इति तिसृणामनुष्टुप्छन्दो अद्ध्यवोचदिति तिसृणाम्पङ्क्तिश्छन्दो नमोऽस्त्वित्यादि सप्तानामनुष्टुप्छन्दो मा न इति द्वयोः कुत्सऋषिर्ज्जगतीच्छन्द एक रुद्रो देवता रुद्रजपे स्नपने होमे च विनियोगः विधातव्यः । नमस्त "इत्यनेन मन्त्रेण रुद्रमुपशान्तयति-। रुद्र रुत् दुःखं क्लेशं द्रावयति विनाशयतीति रुद्रः । भक्तजनैः यदा रुद्रस्य महती स्तुतिः क्रियते, तदा तेषां दुःखं रुद्रः नूनमेव दूरी करोतीति। यद्वा पापिनो जनान्दुःखभोगेन रोगशोकादिना च रोदयतीति रुद्रः। अथवा रु गतौ ये गत्यर्थास्ते ज्ञानार्थाः रवणं रुत् ज्ञानम् भावे क्विप्तुगागमः रुत् ज्ञानं रीति ददातीति रुद्रः।

नमस्ते रुद्र मन्यव उतो त इषवे नमः।

बाहुभ्यामुत ते नमः ॥1॥

उ. भा.– शतरुद्रियहोमः–'अथातो यः शतरुद्रियं जुहोति' इत्युपक्रम्य 'स एषोऽत्राग्निश्रितो वुभुक्षमाणो रुद्ररूपेणावतिष्ठे। तस्य तर्पणं देवैः कृतम् । द्वितीयं दर्शनम् । यद्वै शतरुद्रियं जुहोतीत्युपक्रम्य प्रजापतेर्विस्रस्तादित्यभिधाय मन्त्रार्थानुगुण्येन श्रुतिर्भवति। स एव शतशीर्षो रुद्रः समभवदिति। नमस्ते रुद्रमन्यवे रौद्रोऽध्यायः परमेष्ठिन् आर्ष देवानां वा प्रजापतेर्वा आद्योऽनुवाकः षोडशभिर्ऋग्भिः। तत्र एको रुद्रे देवता एका गायत्री तिस्रोऽनुष्टुभस्तिस्र; पङ्क्तयः सप्तानुष्टभौ द्वे जगत्यौ। नमोऽस्तु ते। हे रुद्र, ते तव संबनिधने मन्यवे क्रोधाय। उत अपि च । ते सव संबन्धिने इषवे काण्ढाय नमोऽस्तु। बाहुभ्याम् उत अपि ते तब संबनिधभ्यां बाहुभ्यां नमोऽस्तु ।।1।।

श.भा.–रुद्द्रमुपशान्तयति–हे रुद्द्र ! रोदनं रुद् दुःखं द्रावयति नाशयति इति रुद्रः यद्वा 'रु गतौ'–ये गत्यर्थास्ते ज्ञानार्थाः। रवणं रुत् ज्ञानं भावे क्विप् तुगागमः । रुत् (ज्ञानं) रीति ददातीति रुद्र; । हे रुद्र ! ते-तव मन्यवे क्रोधाय नमनोऽस्तु । उतो समुच्चयेऽपि च ते तब

इषवे बाणाय नमः । उतापि च ते तव बाहुभ्यां नमः । 'अस्त्विंति सर्वत्राध्याहार्य्यम्। "सर्वं वाक्यं क्रियया परिसमाप्यत" इति न्यायात् । तव क्रोधबाणहस्ता अस्मदरिष्वेव प्रसरन्तु नास्मास्वित्यर्थः ।।1।।

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।
तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ।।2।।

उ. भा.—या ते तब हे रुद्र, शिवा शान्ता तनूः शरीरम् । अघोर अविषमा। अपापरकाशिनी पापमसुखं या प्रकाशयति सा पापकाशिनी पापप्रकाशिनी। न पापकाशिनी अपापकाशिनी। तया नः अस्मान् तन्वा शन्तमया सुखतमया सुखयितमया अतिशयेन सुखयित्र्या। गिरिशन्त गिरौ पर्वते कैलासाख्ये अवस्थितः शं सुखं तनोतीति गिरिशन्तः। यद्वा गिरि वाच्यवस्थितः सुखं तनोतीति। यद्वा गिरौ मेघेऽवस्थितो वृष्टिद्वारेण सुखं तनोतीति। तस्य सबोधनं हे गरिशन्त। अभिचाकशीहि अभिपश्य। सुखयितुमिति शेषः। चाकशीति; पश्यतिकर्मा।।2।।

श.भा.—हे रुद्र ! या ते तव ईदृशी तनूः शरीरं, हे गिरिशन्त! तया तन्वा नोऽस्मानऽभिचारंशे हि अभिपश्य । चाकशीतिः पश्यतिकर्मा, (निघंश. 3/11/8) कीदृशी तनूः? शिवा शान्ता मङ्गलरूपा । यतः अघोरा अविषमा सौम्या । अतेव अपापकाशिनी पापमसुखं काशयति प्रकाशयतीति पापकाशिनी न पापकाशिनी अपापकाशिनी । या पुण्यफलमेव ददाति न पापफलमित्यर्थः । गिरौ कैलाश स्थितः शं सुखं प्राणिनां तनोति विस्तारयतीति गिरिशन्तः । गिरि बचि स्थित; शं तनोतीति वा । गिरौ मेघे स्थितो वृष्टिद्वारेण शन्तनोतीति वा । गिरौ शेते गिरिशः । अमित गच्छति जानातीति वा अन्तः सर्वज्ञः "अम गतौ भजने शब्दे च" कर्तरि गच्छति जानातीति वा अन्तः सर्वज्ञः "अम गतौ भजने शब्द च" कर्तरि क्तः । गिरिशश्चासावन्तश्चेति गिरिशन्तः । तत्संबुद्धिरिति हे गिरिशन्त! "शकन्ध्वादित्वापररूपम्" (पा. 1/1/64 बा.) । कीदृश्या तन्वा ? शन्तमया सुखतमया सुखयितृतमया ।।2।।

यामिषुं गिरिशन्त हस्ते विभर्ष्यस्तवे। शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् ।।3।।

उ. भा.—यामिषुम् । याम् इषुं काण्डम् । हे गिरिशन्त गिरौ पर्वतेऽवस्थित; कैलासाख्ये सुखं तनोतीति गिरिशन्त; तस्य संबोधनं हे गरिशिन्त। हस्ते बिभर्षि धारयसि। अस्तवे असितुं क्षेप्तुमित्यर्थः। शिवां गिरित्र गिरौ कैलासेऽवस्थितः त्रायते भक्तानिति गिरित्रः तस्य संबोधनं हे गिरित्र। तां कुरु। किंच। माहिंसीः मावधीः पुरुषम् जगत् जङ्गम च गवादि।।3।।

श.भा.—हे गिरिशन्त! यामिषुं बाणं हस्ते बिभर्ति धारयसि । किं कर्तुम् ? अस्तवे "असु-क्षेपणे" (दि. प.) तुमर्थे तवे प्रत्ययः (पा. 3/4/9) असितुं शत्रुन्प्रति क्षेप्तुमित्यर्थः। हे गिरित्र ! गिरौ कैलाशो स्थितो भूतानि त्रायते इति तत्सम्बुद्धिः। ताम् इषुं शिवां कल्याणकारिणीं कुर । किं च पुरुषं पुत्रपौत्रादिकं जगज्जमङ्गममन्यदपि गवाश्वादिकं, मा हिंसीः मा बधीः।।3।।

शिवेन वचसा त्वा गिरिशाऽच्छा वदामसि ।
यथा न सर्वमिज्जगदयक्ष्म ं सुमनाऽअसत् ॥4॥

उ. भा.–शिवेन वचसा। शिवेन बचनेन स्वा स्वाम् । गिरिश गिरौ पर्वते कैलासाख्ये शेते इति गिरिशः तस्य संबोधनम् हे गिरिश । अच्छावदामसि । 'अच्छाभेराप्तुमिति शाकपूणिः'। 'इदन्तो मसि'। तथा अभिवदाम। यथा येन प्रकारेण नः अस्माकं मसि'। तथा अभिवदाम। यथा येन प्रकारेण न अस्माकं सर्वम् इत्। इच्छब्द एवार्थे। सर्वमेव जगत् जङ्गमादि। श्रयक्ष्मम्। यक्ष्मा एवार्थे। सर्वमेव जगत् जङ्गमादि। अयक्ष्मम् । यक्ष्मा व्याधिः। ब्याधिरहितम् मुमनाश्च शोभनमनस्कं च असत् भूयात् ।।4।।

श.भा.–गिरी कैलाशे शेते गिरिश;। हे गिरिश! शिव! शिवेन वचसा मङ्गलरूपेण वचनेन त्वा त्वाम् अच्छ-त्वां प्राप्तुं वयं वदामसि वदामः प्रार्थयामहे । "अच्छाभेराप्तुमिति शाकपूणिः । संहितायां "निपातस्य चे" (पा. 6/2/36) ति दीर्घः । "इदन्तोमसि" (पा. 7/1/46) इतिमस इगागमः । किं वदामः ? इत्यत आह-नोऽस्माकं सर्वमित सर्वमेव जगत् जङ्गमादि (नर-पश्वादि) यथा येन प्रकारेण अयक्ष्मं नीरोगं व्याधि रहितं, यक्ष्मा व्याधिः । सुमना शोभनमनस्कश्च असत् भूयात् । तथा कुर्विवत्यर्थः । सुमनः–शब्दे पंसत्वमार्ष जगद्विशेषणत्वात्। असदित्यत्र अस्तेर्लट । "लेटोऽडाटावि"–त्यट् । इलोपः। इच्छब्दः एवकारार्थे ।।4।।

अद्ध्यवोचदधिवक्ता प्रथमो दैव्व्यो भिषक् अहींश्च सर्वान् जम्भयन् सर्वाश्च यातुधानयोऽधराचीः परासुव ॥5॥

उ. भा.- अध्यवोचत् । अश्रील्युपरिभावमैश्वर्ये वा। अधिवदतु व्रवीतु कंचित्स्वकीयं पुरपम् भगवान् रुद्रः। अधिवक्ता ऐश्वर्येणेव यो वदितुं जानाति। प्रथमो दैव्यो भिषक् मुख्यो देवसंबन्धी भिषक् वैद्यः। किमधिवदस्तिवत्यत आइ। अहींश्च सर्वान् जम्भयन् । 'जभिजृभी गात्रविनामे'। सर्वान् सर्वप्राकारान् नाशयन्। सर्वाश्च यातुधान्यः यातनाः दुःखं कष्टं तत्प्राणिषु धारयन्तीति याताधान्यः राक्षसीः जम्भयन् । अधराची; अधी्चनात कृत्वा। परासुव पराक्षिप। यद्वा रुद्र एवोच्यते। अध्यवोचदधिक्ता अधिवदतु ईश्वरो वक्ता। प्रथमो देवसंबन्धी भिषक् वैद्यः। अहींश्च सर्वान् जम्भयन् सर्वाश्च यातुधान्य; अधराचीः कृत्वा परासुव क्षिप ।।5।।

श.भा.–अधिशब्द उपरिभावमैश्वर्य्यं वा वदति। रुद्रो माम् अध्यवोचत् अधि वक्तु सर्वाधिकं वदतु। अयम्। याजकः सर्वाधिको भंवत्विति तेनोक्ते मम सर्वाधिक्यं भविष्यत्येव-त्यर्थ; । कीदृशो रुद्रः ? अधिवक्ता अधिकं वदनशीलः । तथा प्रथमः सर्वेषां मुख्यः पूज्यत्वात्। दैव्यः देवेभ्यो हितः भिषक् रोगनाशकः । स्मरणएनैव रोगनाशात् भिषक्तवम्। शिवमेवं परोक्षमुत्तवा प्रत्यक्षमाह हे रुद्र! सर्वा यातुधान्यः यातुधानी राक्षसी; त्वं परासुव परिक्षिप अस्मत्तो इरीकुरु। किं कुर्वन? सर्वान अहीन सर्वव्या घ्रादीन् जम्भयन् विनाशयन् "जभिर्नाशने"

(चु. प.) लटः शता । कीदृशीः यातुधानीः ? अधराची; अधरे अधोदेशऽञ्चन्ति ता अधराच्यः ता अधराचीः अधोऽधो गमनशीलाः । चः समुच्चये। सर्पादिनाशराक्षसीक्षेपौ सहैव कुर्वित्यर्थः।।5।।

असौ यस्ताम्रो अरुणऽउत बभ्रुः सुमङ्गलः। ये चैनꣳरुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳहेड ईमहे।।6।।

उ. भा.- असौ यः। आदित्यरूपेनात्र रुद्रः स्तूयते। अभिनयेन दर्शयन्नाह। असौ यस्ताम्रः ताम्रवर्णः। उदयकाले अस्मिनकाले च। अरुणः अरुणवर्णः रक्तवर्णः। उत बभ्रः अपिच वभ्रुवर्णः कपिलवर्णः। सुमङ्गलः। शोभनानि मङ्गलान्यस्येति मुमश्लः। अवास्य हेड ईमह इत्यनुग्रहः। ये च एनं भगवन्तादित्यं रुद्राः रश्मयः। अभितः इतश्रेनश्च। दिक्षु सर्वासु च। श्रिताः स्थिताः सहस्रशः असंख्याना; अग्र एषां हेड ईसहे। अव ईमहे अवनवामः। एषां संबन्धी हेडः क्रोध; । हेड इति क्रोधनामसु पाय्नम् । यद्वा रुद्र एवोच्यते। असौ यस्माम्रवर्णः अरुणवर्णः अपितु वध्रुवर्णे सुमङ्गलः। अनेकानि हि रूपाणि एहः करोति कार्यवदातु। सम समन्वय।।6।।

श.भा.—आदित्यरूपेणात्र रुद्रः स्तूयते। अभिनयेन दर्शयन्नाह-योऽसौ प्रत्यक्षो रुद्रो रविरुपश्च पुनः ये रुद्राः एनम् अभितो दिक्षु प्राच्यादिषु श्रिताः किरणरूपेम । "अभितः परितः" (पा. 1/4/48 बा.) इत्यादिना द्वितीया। सहस्रशः स,हस्रसंख्याः । एषां हेडः क्रोधम् अस्मदपराधजं वयम् अवईमहे-अवनयामः निवारयाम भक्त्या निराकुर्मः । "हेड इति क्रोधनाम" (निघं. 2/11/3) । कीदृशोऽसौ ? ताम्र; उदयेऽत्यन्तं रक्तः । अरुणः रक्तोऽस्तकाले । उतापि च बभ्रुः पिङ्गलवर्णोऽन्यदा । सुमङ्गलः शोभनानि मङ्गलानि यस्य सः । मङ्गलरूपं रव्युदये सर्वमङ्गलप्रवर्त्तनात् । क्रमेणैतानि रूपाणि दधातीत्यभिप्रायः । यद्वा रुद्र एवोच्यते– असौ यस्ताम्र ताम्रवर्णः । अरुणः अरुणवर्णः । उतअपिच बभ्रुव बभ्रुवर्णछ । सुमङ्गलः । प्रयोजनवशान्नानारूपाणि करोति । यद्वा क्रोधेन ताम्रः क्रमात् क्रोधह्रासेन यादृशं रूपं तादृशमाशास्यते ।।6।।

असौ योऽर्पवसर्पति नीलग्रीवो विलोहितः ।
उतैन गोपा अदृश्रन्नदृश्रनुदहार्यः स दृष्टो मृडयाति नः ।।7।।

उ. भा. —असौ यः आदित्यः अवसर्पति अवार्चीनं सर्पति गच्छति अस्मतमलयाकेल। नीलग्रीव; नीलग्रीवः इवास्तं गच्छन् लक्ष्यते। विलोहितः धारणाधनु मात्रेणाप्राप्तविलोहितमण्डलाभिप्रायम् । उतैनं गोपा अदृश्रन् अथैनं गोपालाः अभिपश्यन्ति गवां प्रवेशनकालं मन्ममानाः। अदृश्रनुदहार्यः। दृशेरुढागमश्छान्दसः। पश्यन्ति च उदकहार्यः कुम्भदास्यः आगोपालाङ्गनादिप्रसिद्ध इत्यर्थः। स दृष्टो दृष्टमात्रो मृडयाति। 'मृड सुखने' सुखयति। नः अस्मान् । अत्यन्तं मृदुहृदयतम इत्यभिप्रायः। यद्वा रुद्र एवोच्यते। ऋषिराह। असौ य; अवाचीनं सर्पति अमिमुखं गच्छयि नीलप्रीवो नीलकण्ठः विलोहितः विगतकलुपभावः। उतैनं गोपा अरश्रब्रुहहार्य इति गोपालानादिप्रसिद्धि दर्शयति। सम असमन्यत् ।।7।।

श. भा.– योऽसावादित्यरूपो रुद्रोऽवसर्प्पति उदयास्तमयौ कुर्वन्निरन्तरं गच्छति गोपाः। उत अप्यर्थे गवां प्रवेशकालं मन्यमाना इत्यर्थः । गोपालाः उत वेदोक्तसंस्कारहीना अपि अदृश्रन्पश्यन्ति। एनम् उदहार्य्यः उदकं हरन्ति स्ताः "मन्थौदनसक्तबिन्दुवज्रभारहारविवधगाहेषु च" इति उदकस्योदादेशः । जलहारिण्यो योषितोऽपि एनम् अदृश्रन्पश्यन्ति । आगोपालाङ्गनाप्रसिद्ध एष इत्यर्थः । दृशेर्लुङि "इरितो वेति (पा. 3/1/57) चलेरङ् रुगागमाश्च छान्दसः । कीदृशोऽसौ ? नीलग्रीव; विषधारणएन नीला ग्रीवा कणअठो यस्य सः । अस्तमयेऽयं सूर्य्यः नीलकण्ठ इव लक्ष्यः । विलोहितः विशेषेण रक्तः । रुद्रः दृष्टः सन् नोऽस्मान्मृयाति। मृयतु सुखयतु । असौ मण्डलवर्ती सविता रुद्र एव तपतीति ज्ञातः सुखं करोत्वित्यर्थः ।।7।।

नमोऽस्तु नीलग्रीवाय सहस्त्राक्षाय मीढुषे ।
अथो येऽअस्य सत्वानोऽहं तेभ्योऽकरं नमः ।।8।।

उ. भा.–नमोऽस्तु नमस्करोऽस्तु। नीलग्रीवाय नीलकण्ठाय सहस्त्राश्राय बद्धक्षाय । मीदुपे 'सिंह सेचने'। सके तरुणाय। अविपरिणामीति स्तूयते। अथो अपि ये अस्य सखान सत्वभूता रुद्राः अहं तेभ्यः अकम्र अकरवम् करोमि। नमस्कारम् ।।8।।

श. भा.–नीलग्रीवाय श्रीनीलकण्ठाय रुद्राय नमोस्तु । किम्भूताय ? सहस्त्राक्षाय बह्वक्षाय इन्द्रस्वरूपिणे। मेहते इति मीढुष् तस्मै मीढुषे, "मिह सेचने" (भ्वा. प.) इत्यस्माद्– "दाश्वान्साह्वान्मीढ्वाँश्चे" ति (पा. 6/1/12) क्वस्वन्तो निपातः । सेक्त्रे वृष्टिकर्त्त्रे पर्जन्यरूपायेत्यर्थः। तरुणाय वा । अथो अपि च अस्य रुद्रस्य ये सत्त्वानः प्राणिनो भृत्यास्तेभ्योऽहं नमो नमस्ल्कारम् अकरं करोमि । (तु. उ.) ततो लडर्थे लङि उत्तमैकवचनम्। अपरिणामित्वेन स्तूयते इति भावः ।।8।।

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्र्योर्ज्याम्। याश्च ते हस्त इषवः परा ता भगवो वप ।।9।।

उ. भा.– प्रमुख धन्वनः धनुषः त्वमुभयोः आर्त्न्योर्धनुरन्तयोः ज्यां गुणम् । याश्च ते तव हस्ते इषवः। परा ता भगवो वप परावप पराक्षिप ताः हे भगवन् महदैश्वर्य युक्त ।।9।।

श. भा.–हे भगवः ! भगं षड् विधमैश्वर्यमस्त्यस्येति भगवान् "मतु वसोरु; सम्बुद्धौ छन्दसी" (पा. 8/3/1) ति रुत्वम् । ऐश्वर्य्यस्य समग्रस्ये" त्याद्युक्तत्वात् । हे भगवन् ! रुद्र ! तब धन्वन; उभयोरान्त्योर्द्वयोः कोष्टयोः स्थितां ज्यां मौर्वी त्वं प्रमुञ्च दूरीकुरु । याश्च ते तब हस्ते इषवो बाणाः ताः इषूः परावप पराक्षिप ।।9।।

विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ2।।
उत् अनेशन्नस्य यऽइषव आभुरस्य निषङ्गधिः ।।10।।

उ. भा.–विश्वं धनुः विगतगुणं धनुः। कपदोऽस्यास्तीति कपर्दी । कपर्दोऽस्य जटाबन्धः। विशल्य; शल्यरहितः वाणवान् इपुधिः। उत अपिच। अनेशन् 'णश्अदर्शने'।

नष्टा। अस्य या इपवः आभुः रिक्तः अस्त्र निपरधि खङ्गनिक्षेपः। निषज्यत इति निषङ्क सह उच्यते दद्यस्मिधीयते स निषङ्गधिः। न्यस्तसर्वसशत्र इत्यमि प्रायः ।।10।।

श. भा.—अस्य कपर्दिनः कपर्दो जटाजूटोऽस्यास्तीति कपर्दी तस्य रुद्रस्य धनुः विज्यमस्तु विगतगुणं भवतु। वाणवानिषुधिः, विशल्योऽस्तु विगतशल्यो भवतु। शल्यः फलम्। बाणाः सन्त्यत्रेति बाणवान् । उतापि च अस्य या इषवः शराः ता अनेशन् नष्टा भवन्तु। "णश् अदर्शने" (दि. प.) "नशेरत एत्वमङ चे" त्येत्वम् पुपादित्वाच्चलेरङ् । किं च अस्य नि,ङ्गधिः खड्गकोश आभु रिक्तोस्तु । खड्गरहितोऽस्तु। निषज्यते इति निषङ्ग स धीयतेऽत्रेति निषङ्गधिः खड्गकोशः ।।10।।

या ते हेतिमीढुष्टम हस्ते वभूऽते धनुः ।

तयास्मान्विश्वतस्त्वमयक्ष्यमा परिभुज ॥11॥

उ. भा.—या ते या ते तब हेतिरायुधम् हे मीदुष्टम् 'मिह सेचने'। सेकृतम् युवतम। परिणामनिषेधद्वारेण स्तुतिः। अस्मात्सर्व भवति। हस्ते बभूव भूता। ते इति निरर्थकः। धनुरिति हेतिविशेषणम् । तया हेत्या अस्मान्विश्वतः सर्वतः त्वम् अयक्ष्मया । यक्ष्मा व्याधिः व्याधिरहितया परिभुज परिपालय ।।11।।

श. भा.—अतिशयेन मीढ्वान्मीढुष्टमः । "तसौ मत्वर्थे" (पा. 1/4/19) इति भसंज्ञायां "वसोः सम्प्रसारण्" (पा. 6/4/131) इति वस्योत्वे षत्वष्टुत्वे । हे मीढुष्टम ! सेक्तृ तम् ! वर्षुक! ते तव हस्ते या धनुर्हेतिः धनूरूपमायुधं बभूव स्थितमस्ति । एकं ते पदं पादपूरणाय । तया धनूरूपया हेत्या विश्वतः सर्वतः अस्मान् त्वं परिभुज-परिपालय। पालनार्थस्य भुजेविकरणव्यत्यये (पा. 3/1/85) शप्रत्ययः । कीदृश्या तया? अयक्ष्मया न यक्ष्मा रोगो यस्याः तथा निरुपद्रवया दृढया। अनुपद्रवकारिण्या वा ।।11।।

परि ते धन्वनो हेतिस्मान्वृणक्तु विश्वतः ।

अथो यऽइषुधिस्तवारे अस्मन्निधेहि तम् ॥12॥

उ. भा.—परि ते। परिवृणक्तु परिवर्जयतु। ते तव भन्वन; धनुष; संबनिधनी हेतिः आयुधं कडलणम् अस्मान् विश्वतः सर्वतः। अधो अपि च। य इपुधिर्वाणवान् तव आरे दूरे अस्मत् निधेहि स्थापय तम् इधुधिम् ।।12।।

श. भा.—हे रुद्र! ते तब धन्वनो हेतिः धनुःसम्बन्धि आयुधं विश्वतः सर्व्वतः अस्मान् परिवृणक्तु त्यजतु मा हन्तु इत्यर्थः । 'बृजी वर्जने" रुधादित्वात् श्नम् । अथो अपि च यस्तव इषुधिः बाणः तम् अस्मत् अस्मत्तः सकाशात् आरे दूरे (निघं. 2/26) निधेहि अस्मत्तो दूरे स्थापयेत्यर्थः ।।12।।

अवतत्य धनुष्टुँ सहस्त्राक्ष शतेषुधे ।

निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥13॥

उ. भ़ा.—अवत्य अवतार्य धनु स्वम् हे सहस्राक्ष शतेपुधे शतशब्दो बहुपर्यायः। निशीर्य शल्यानां मुखा शातयित्वा फलानां मुखानि। शिवः शान्तः नः अस्माकं सुमनाः शोभमनस्कश्च भव ।।13।।

श. भा.—सहस्रमक्षीणि यस्य स सहस्राक्षः तत्सम्बुद्धि; हे सहस्राक्ष! । शतम् इषुधयो यस्य सः शतेषुधिः तत्सम्बुद्धिः हे शतेषुधे !। त्वं नोऽस्मान् प्रति शिऽः शान्तः सुमना शोभनचित्तश्च भव। अनुगृहाणेत्यर्थः । किं कृत्वा ? धनु अवत्य अप (गत) ज्याकं कृत्वा अवतार्य्य । क़िं च शल्यानां बाणफलानां मुखा मुखानि बाणफलकाग्रणि निशीर्य्य शीर्णानि कृत्वा "शृ हिसायां' (क्रया. प.) "समासेऽनत्रपूर्वे क्त्वो ल्यप्" (पा.7/1/37) इति त्त्वोल्प "ऋत इद्धातोः" (पा. 7/1/100) इतीत्वम् ।।13।।

नमस्तऽ आयुधायानातताय धृष्णवे।

उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ।।14।।

उ. भा.—नमस्ते नमोऽस्तु ते तब आयुधाय अनातताय अवतारिताय। घृष्णवे घर्षणशीलाय प्रगल्भाय। उभाभ्याम् उत अपिच। ते तब नमोऽस्तु। बाहुभ्यां तव धन्वने। धनुषे नम इत्यनुवर्तते।।14।।

श. भा.—हे रुद्र ! ते तब आयुधाय बाणाय नमोऽस्तु । कीदृशायायुधाय? अनातताय धनुषि अनारोपिताय । धृष्णवे धर्षणशीलाय "धृषेः क्नुप्रत्ययः" (प. 2/14.) रिपून्हन्तुं प्रगल्भाय। उतापि च ते तव उभाभ्यां बाहुभ्यां नमः । तव धन्वने धनुपेऽपि नमोऽस्तु। तंस्यापि विशेषणम् अनातताय अवतारितमौर्वीकाय । पुन; पुनर्नमस्कार आदरातिशयेन ।।14।।

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।

मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ।।15।।

उ. भा.— न. मावधीः नः अस्माकं महान्तं वृद्धं वयः प्रभृतिभिः। उत मा नो अर्भकम् अपि च मावधीः नः अंस्माकमर्भकमल्पम् । मा न उक्षन्तम् मावी; नः अस्माकमुक्षन्तम् । 'उक्ष सेचने'। सिप्रन्तं तरुणमिति यावत् । उत मा न उक्षितम् । अपि च मावधीः नः अस्माकमुक्षितं सिक्तं गभस्थमित्यर्थः। मा नो वधीः पितरम् मावधीः वः अस्माकं पितरम् । आदरार्थ पुनर्वचनम्। महान्तमिति सिद्धत्वात् । मोत मातरम् मावधीः अपि च मातरम् । मा नः प्रियास्तम्बः रुद्र रीरिषः। रिषतिहंसार्थः। मारीरिषः मर्हिसीः। न अस्माकं प्रियस्तव; प्रियाणि शरीराणि पुत्रपौत्रलक्षणानि । हे रुद्ध ।।15।।

श. भा.—हे रुद्र! नः अस्माकं महान्तं वृद्धं गुरुपितृव्यादिकं, त्वं मा वधीः मा हिंसीः। उत-अभि न अस्माकमर्भकं बालं मा बधीः । मा च नः उक्षन्तं सिञ्चन्तं तरुण वधी। उत-अपि नः उक्षितं सिक्तं गर्भस्थं च मा वधीः । नः पितरं जनकं मा वधीः । उत-अपि नो मातरं जननीं मा वधीः । महान्तमित्यनेन सिद्धयोर्मातापित्रोः पुनः पुनरुपादानमादरार्थे । नः प्रिया बल्लभा;

तन्त्र तनूः शरीराणि पुत्रपौत्ररूपाणि त्वं मा रीरिषः मा हिंसी; । "रिषतिहिंसार्थः" (भ्वा. प.) ततो लोडर्थे लुङ् ।।15।।

मा नस्तोके तनये मा नु आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।
मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सद्मित्त्वा हवामहे ।।16।।

उ. भा.– नः। मा रीरिषः रिपतिहंसाकर्मा । मा हिंसा; न अस्माकम् । तोके पुत्रविषय। मा हिंसीः तनये पौत्रविषये। मा हिंसी; नः अस्माकं गोपु विषयभूतासु। मा नो अश्रेषु मा हिंसीः न; अस्माकमश्वेषु विषयभतेषु। यद्वा विभक्तिव्यत्ययेन ध्याख्यानम् । मारीरिष; अस्माकं तोकं तनयमायुर्गा अस्वानिति। मा नो वीरान् रुद्रभामिनो बधीः मावधीः नः अस्माकं वीरान् हे रुद्र, भामिनः। 'भामं क्रोधे'। क्रोधसंयुक्तान् । क; प्रत्युपकार इति चेत। हविष्मन्त; हविषा संयुक्ताः सदं सदाकालम् । इच्छब्द एवार्थे। त्वोवाह्वयामहे आह्वामो यागार्थम् । अनन्यशरणा वयमित्यभिप्रायः ।।16।।

श. भा.–हे रुद्र ! नः अस्माकं तोके पुत्रे तनये पौत्रे च मा रीरिषः मा हिंसीः । तद्विषयां हिसां मा कुर्त्यिर्थः । एवं न आयुषि जीवने मा रीरिषः मा हिंसी। नः गोषु धेनेषु मा रीरिषः । नः अश्वेषु तुरगेषु च मा रीरिषः । विभक्तिव्यत्ययो बाहुलकत् (पा. 3.1.85) तोकं तनयम् आयुः गा अश्वान् । किं च भामिनः क्रोधयुतानपि नोऽसकं वीरान् भृत्यान् मा बधीः "भाम क्रेधे" (पा. 3/3/170) णिनिः। क उपकार इति चेत्तत्राह-यतः हविष्यमन्तो हविष्मन्तो हविर्युक्ताः । सदम् सदाकाले। इच्छब्दः एवकारार्थे। सदैव त्वा त्वां वयं हवामहे यागाय आह्वयामः । त्वदेशशरणा वयमिति भावः ।।16।।

नमो हिरण्यबाहवे सेनान्ये दिशा च पतये नमो नो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः शष्पिञ्जराय त्त्विषीमते पथीनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः ।।17।।

उ. भा.–नमो हिरण्यावाहवे। इत उत्तरं यजंषि द्रापे अन्धसस्पते इति यावत्। द्वयोद्वयो रुंद्रयोश्च स्तुतिः। तिस्रोशीनयो रुद्राणां कणिअडकायां कण्डिकायामाष्टवष्टौ रुद्राः तेषां चोभयतोनमस्काराः अन्ये अन्यतरतोनमस्कारा अन्ये रुद्रास्ते घोरतरा शान्ततराः यत उभयतोनमस्करा इति। नमोस्तु हिरणअयालंकारभूषितबाहवे। सेनान्ये च सेनां नयतीति सेनानीः। दिशां च पतये नमः। नमो वृक्षेभ्यो हरिकेशेभ्यः वृक्षरूपेन्यो रुद्रेभ्यो नमस्कार इति। हरितानि पर्णानि केशा इद येषां लक्ष्यन्ते । पशूनां पतये नमः। शष्पिञ्जराय नवप्ररूढानि तृणानि शप्यं तद्वणारय। त्विपीमते। स्त्रिपदीप्तिः। पथीनां पतये नमः। पयामिति प्राप्ते छान्दसम् । नमो हरिकेशाय लोहितकेशाय। उपवीतिने यज्ञोपवीतिने पुष्टानां समृद्धानां पतये नमः ।।17।।

श. भा.–अतः परं तिस्रोऽशीतयो रुद्राणां द्वयोर्द्वयोर्नमस्कारः । एकैकस्यां कण्डिकामष्टावष्टौ रुद्रा; । तेषु येऽशान्ततरास्तेषामुभयतो नमस्काराः, हिरण्यमाभरणरूपं

बाह्वोर्यस्य स हिरण्यबाहुः । स च सेनान्नयतीति सेनानीः तस्मै रुद्राय नमः । दिशां च परतये पालकाय रुद्राय नमः । हरयो हरितवर्णाः केशाः पर्णरूपाः येषां ते हरिकेशाः । तेभ्यः वृक्षेभ्यो वृक्षरूपरुद्रेभ्यो नमः । पशूनां जीवानां पतये पालकाय रुद्राय नमः । शष्पिञ्जराय शष्यपम्बालतृणं त्दवत्पिञ्जराय पीतरक्तवर्णाय । (सोपध) दिलोपछान्दसः । त्विषिर्दीप्तिरस्यास्तीति त्विषिमान् तस्मै त्विषीमते "संहितायां शृणुते"ति प्रातिशाख्यसूत्रेण त्विषिशब्दस्य दीर्घः । ईदृशाय रुद्राय नमः । पथीनां मार्गाणां पतये पालकाय नमः । पथामिति प्राप्ते छान्दसं रूपम् । पथिन्शब्दो मार्गवाची । उत्तरदक्षिणतृतीया मार्गाः श्रुतावुक्ताः। हरिकेशाय नीलवर्णकेशाय । जरारहितायेति यावत् । उपवीतिने मङ्गलार्थ यज्ञोपवीतधारिणे रुद्राय नमः। पुष्टानां गुणपूर्णानां नराणां पतये स्वामिने नमः ।।17।।

नमे बभ्लुशाय व्याधिनेऽनन्नानाम पतये नमो नमो भवस्य हेत्यैं जगतां पतये नमो नमो रुद्रायातयायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्ये वनानां पतये नमः ॥18॥

उ. भा.—नमो बम्लुशाय बधुवर्णाय । यषुः कपिलः। व्याधिने विध्यतीति व्याधी। अश्वानां पतये नम;। नमो भवस्य हेत्यै। भवः संसार;। हेतिरायुधम् । संसारस्य छेत्रे। जगतां पतये नम; जगतां जङ्गमानाम् । नमो रुद्राय आततायिने । आततेन धनुषा एतीत्यातायी उद्यातायुधाय। क्षेत्राणां पतये नमः। नमः सूताय मूतोऽश्वसारथि;। अहन्त्यै अहघ्रे । नहि सूतः कंचिदपि हन्ति। बनानां पतये नमः ।।18।।

श. भा.—अत्र नमः संबन्धिपदातिरिक्तानि पदानि विशेषणानि ज्ञेयानि । एवं सर्वत्र। बभ्लुशाय बभ्रुवर्णाय रुद्राय नमः बभ्रुः कपिशः । व्याधिने विघ्यतीति व्याधी तस्मै। अन्नानाम्पतये पालकाय नमः । नमो भवस्य हेत्यै । भवः संसारतस्य हैतेयै आयुधाय। संसारच्छेदकायेत्यर्थः। जगतां पतये पालकाय नमः । नमो रुद्राय आततेन धनुषा सह एति गच्छतीति आततायी तस्मै। किम्भूताय ? अहन्त्यै न हि कपि हन्तीति अहन्तिस्तस्म । वनानां पतंये रक्षकाय नमः।।18।।

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नम उच्चैघोषायाक्रन्दयते पत्तीनां पतये नमः ॥19॥

उ. भा.—नमो रोहिताय। वर्णतो निर्देशः। स्थपतये स्थपतिर्गृहादीनां चेता। चयनं करोति विश्वकर्मरूपेण। वृक्षाणां पतये नमः। नमो भुवन्तये भुवं पृथिवीं तनोति विस्तारयतीति भुवन्ति। वारिवस्कृताय वरिवो धनम् तत्कृतं येन का वारिवस्कृतः। दीर्घत्यं छान्दसम् । ओषधीनां पतये नमः। नमो मश्रिणे। प्रसिद्ध एव मन्नी। वाणिज; वणिगेव वाणिजः। कक्षाणां पतये नमः। नदीकक्षः पर्वतकक्षो था। नम उच्चैर्षोपाय महाशब्दाय। आक्रम्दयते आक्रमन्दः प्रसिद्धः। पत्तीनां पतये नमः। हस्तश्वपपदातिसंख्या पत्तिः ।।19।।

श. भा.–रोहिताय लोहितवर्णायारुणाय नमः । स्थपतये गृहादिनिर्माणकर्त्रे । वृक्षाणां पतये नमनो नमो भुवन्तये भुवं पृथ्वीं तनोति विस्तारयति इति भुवन्ति तस्मै । वरिवस्कृतायौषधानां पतये नमो वरिवोवृक्षवनम् अर्चनं धनं वा तत्कृतं येन सः वरिस्कृतः तस्मै। दीर्घत्वं छान्दसम। ओषधीनां धान्यानां पतये नमः । नमो मन्त्रिणे वाणिजाय वणिगेव वाणिजस्तस्मै नम; । कक्षाणां पतये नमः । कक्षो नदीकक्षः पर्वतकक्षो वा तेषां पतये पालकाय। उच्चैर्घोषो ध्वनिर्यस्य तस्मै। उच्चैर्घोषाय नम; । आक्रन्दयते आक्रन्दयतीत्याक्रन्दयन् तस्मै। युद्धे महा शब्दाय । पत्तीनां सेनाविशेषाणां पतये पालकांय नमो, हस्त्यश्वरथपदातिभि; पत्तिरित्युब्वटः ।।19।।

नमः कृत्स्नायतया धावते सत्वनां पतये नमो नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो नमो निचेरवे परिचरायारण्यांनां पतये नमः ॥20॥

उ. भा.–नमः कृत्स्नायतया। कृत्स्नायततायेति प्राप्ते तकारलोपशबन्दसः। कृत्स्नं चासवायतं च कृत्सायतः पूरितधनु तस्य भावः कृत्स्नायतया तथा हेतुभूतया धावते। श्राकर्णपूरितधनुपेद्यर्थः। सत्वनां सत्यानां पतये नमः। नमः सहमानाय अइभभवनशीलाय निब्याधिने नितरां विष्यतीति निब्धायी। आच्याधिनीनां पतये नम आविम्यन्ति याः सेनास्ता आव्याधिन्यः। नमो निपङ्गिणे निपङ्गः खड्गम् । ककुभाय ककुभ इति महात्रामसु पठितम् । खेनानां पतये नम खेन औरः। नमो निचेरवे नितरां चेरतीति निचेरुः। परिचराय सर्वतोगत्रे। अरण्यां पतये नमः ।।20।।

श. भा.–कृत्स्नायतया कृत्स्नश्चासावायतश्चेति कृत्स्नायतस्तस्य भाव; कृत्स्नायतता तया। अर्थाद्धनुषः । तकारलोपश्छान्दसः । आकर्णपूरितधनुष्टवेन हेतुभूतेन धावते युद्ध शीघ्रङ्गच्छते रुद्राय नमः ।सत्त्वनां सत्त्वानां पतये नमः। आकारलोपश्छान्दस;। नम सहमानाय अभिभवनशीलाय । निव्याधिने नितरां विध्यति हन्ति शत्रूनिति निव्याधी तस्मै.। आव्याधिनीनां पतये नमः। आविध्यन्तीत्याव्याधिन्यस्तासां पतये नमो। निषङ्गिणे खड्ग-निधान-(तूंणीर)-युक्ताय । ककुभाय महते । ककुभ इति तु महन्नामसु पठितम् । स्तेनानां पतये नम स्तेनश्चौरः, नितरां चरतीति निचेरुः तस्मै, परितः चरतीति परिचरः सर्वतो गन्ता, आरणअयानाम् अरणअये भवानां मृगाणां पतये नमः ।।20।।

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमः सृकायिभ्यो जिघा ꣳ सद्यो मुष्णतां पतये नमो नमोऽसिमद्भयोनक्तंच-रद्भ्यो विकृन्तानां पतये नमः ॥21॥

उ. भा.– नमो वञ्चते। वञ्चतिर्गत्यर्थः गत्रे। परिवञ्रते सर्वतोगत्रे स्तायूनं पतये नमः। स्नायु और एव। नमो निषङ्गिणे खङ्गिणे इषुभिमतें इषुधिरस्यांस्तीति इषुधिमान् । तस्कराणां

पतये नमः। तस्कर औंर एव। नम; सूकायिन्यः। मूक इति बञ्रनामसु पठितम् । सृकेण गृहीतेन एतुं शीलमेपामिति सृकायिणः। जिर्घासद्यः हन्तुमिच्छद्य; मुष्णतां पतये नमः। 'मुष स्तेये' नमोऽसिमन्द्यः। असिः खजं तत्संयुक्तेभ्यः नक्तचरद्भ्यः रात्रौ गच्छद्भ्यः विकृन्तानां पतये नमः। विकर्तनशीला विकृन्ताः ।।21।।

श. भा.—वञ्चत इति ।वञ्चतिर्गत्यर्थः । ततो लटः शता वञ्चते गमनशीलाय नमः। परिवञ्चते सर्वतोगमनशीलाय । वञ्चते वञ्चकाय प्रकाशतस्करायेति केचित् । नम इति सर्वत्र योज्यम् । स्तायूनां पतये नमः। स्तायुश्चौरविशेषः । नमो निषङ्गिणे कद्गिने इषुधिमते इषुधिस्तूणः तत्सहिताय । तस्कराणां पतये नमः । (निघं. 2/20) सृकेव गृहीतेन एतुं शीलमेषामिति सृकायिनः तेभ्यः । जिघांसद्भ्यः हन्तुमिच्छद्भ्यः हन्तुमिच्छद्भ्यः । मुष्णतां पतये नमः । मुष्णतां चौराणां, मुष्णन्तश्चौराः । 'मुष स्तेये'। असिमद्भ्यः असियुक्तेभ्यः । नक्तं रात्रौ चरद्भ्यः रात्रौ गच्छद्भ्यः । विकृन्तानां विकर्त्तनशीलानां पतये नमः ।।21।।

नमऽउष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमोनमऽइषुमदभ्योधन्वा-यिभ्यश्चवो नमोनमऽआतन्वानेभ्यः प्रतिधानेभ्यश्च वो नमो नमऽआयच्छद्भ्योऽस्यद्भ्यश्च वो नमः ॥22॥

उ. भा.—नमः उषईषिणे ऋण्णीपोऽस्मातु उष्णीयः शिरोवेष्टन् । गिरिचराय गिरः पर्वते चरतीऽगिरिचरः। कुलुञ्चानां पतये नमः। कुत्सिकं लुचति कृष्ण या लुञ्चतीति कुलुञ्चः। नम इषुमत्र धन्वायिभ्यश्र नमः। भ्याध्यायां बहुवचनधर्मः प्रदशगते। नमोश्तु ये यू मिषुमन्तस्तेभ्य इषुपमद्यः। धनुषा गृहोदेन एतुं शीलते पामिति धन्वायिनः। 'वा संज्ञायाम्' इति धनुषो धन्व धन्वायिम्यः। चकारः समुच्चयार्यीयः। व युप्समयं नमः आतन्वांनेम्य; उटिप्तज्याकानि धूनंषि कुर्वाणेभ्यः। प्राप्तदधानेन्यश्र वो नमः प्रतिद्धानाः संधानं कुर्वाणाः। न आयच्छत्र्यः आकर्षद्यो धनूंषि। असत्यस्त्रश्च वो नमः । 'अक्षेपणे' काण्डनि क्षिपत्र्यः ।।22।।

श. भा.—उष्णीप्मस्यास्तीत्युष्णीषी । उष्णीषं शिरोवेष्टनम् । गिरौ चरतीति गिरिचरस्तस्मै पर्वथसञ्चारिणे नमः। कुलुञ्चानाम्पतये नमः । कुत्सितं कुलानि वा लुञ्चन्ति हरन्तीति कुलुञ्चाः "लुञ्च अपनयने" (भ्वा. प.) कर्म्मण्यम् (पा. 3.2.1) कुं पृथ्वीं लुञ्चन्तीति केचित् । नम इषुमद्भ्यः । धन्वायिभ्यः धनुषा एतुं गन्तुं शीलमेषामिति धन्वायिनः । "वा संज्ञायामि"ति धनुषो वा अनङ् । चकारः समुच्चयार्थः। नमऽआतन्वानेभ्यः उत्क्षिप्य काण्डानि धनूंषि आततानि कुर्वद्भ्यः। प्रतिदधानेभ्यश्च प्रतिदधते सन्दधते बाणान्धनुषीति प्रतिदधानाः सन्दधानास्तेभ्यः। आयच्छन्त्याकर्षन्ति धनूंषि ते आयच्छन्तस्तेभ्य आयच्छद्भ्यः। अस्यन्ति बाणानित्यस्यन्तस्तेभ्योऽस्यद्भ्यो नमः काण्डानि क्षिपद्भ्यः । "असु क्षेपणे' (दि. प.) शतरि श्यन् ।।22।।

नमो विसृजद्भ्यो विद्धद्भ्य वो नमो नमः स्वपदम्यो जाग्रद्भ्योश्च वो नमो नमः शयाने आसीनेभ्यश्च वो नमो धावद नमस्तिष्ठ्भ्योभ्यश्च वो नमः ॥23॥

उ. भा.—नमो विसृज्याः काण्डानि क्षिपण्यः योद्धरां प्रविभ्यत्र वो नमः । विभ्यन्ति ताडयन्ति चे शनै विभज्यः। नमः स्वपद्भ्यो जाग्रत्यअ वो तसः। शयानेभ्य आसीनेभ्यश्च वो नमः। मन कि यो नमो नमः। शतृशानजन्नान्पेतानि पदानि देव ।।23।।

श. भा.— (बाणान्) विसृजद्यभ्यः काण्डानि योगं प्रति क्षिपद्भ्यः । विध्यद्भ्यः शंत्रूस्ताडयद्भ्यो नमः स्वपद्भ्यः स्वापं कुर्वद्भ्यः स्वप्नावस्थामनुभवद्भ्यः सुषुप्त्यवस्थावद्भ्यः। जाग्रद्भ्यश्च वो नम। शयानेभ्य शेरते इति शयानास्तेभ्यः सुषुप्त्यवस्थावद्भ्यः । आसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नम; । एतानि पदानि निगदव्याख्यातानि । अतः परमद्वैतप्रतिपादनाय स्तुतिः ।।23।।

नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो श्वेभ्योऽश्वपतिभ्यञ्च वो नमो नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृहꣳतीभ्यश्च वो नमः ॥24॥

उ. भा.— इत उत्तरं जातेभ्यो जुहोति। जाता जातिविशेषा; त इहोच्यन्ते रुद्राद्वैतप्रतिपादनाय। रुद्रलोके किलेत्यंभूत रुद्राः सन्तिं। तदुक्तम् । 'अथो एवं हैतानि रुद्राणां वातानि' इति। नमः सभाभ्यः सभादिभ्यो रुद्रदृष्टिः कर्तव्येति तात्पर्यायः। सभापतिभ्यश्च वो नम;। नम अश्वेभ्यः अश्वपतिभ्यश्च वो नमः। नम आच्याधिनीभ्यः आविष्यन्तीत्याच्याधिन्यः सेना; विविध्यन्तीभ्यश्च वो नमः। विविधं विध्यन्तीति विग्रह सेना एवाभिधेया। नम उगणाभ्यः उदुपसर्गत्त्यान्त्यलोपः। उद्गूर्णगणाः समूहा यासु सेनासु ता एवमुचन्यते । त् इतीभ्यश्च वो नमः। ठंहतिहिंसाकर्मा । हिंसन्तीभ्यः ।।24।।

श. भा.—वः युष्मभ्यं नमः । केभ्यः? सभाभ्यः । सभापतिभ्यश्च सभास्वामिभ्यो नमः। अश्वेभ्यः अश्वपतिभ्यश्च। आव्याधिनीभ्यः आविध्यन्तीत्याव्याधिन्यः सेनास्ताभ्यः । विविध्यन्तीभ्यः सेनाभ्यः। विशेषेण विध्यन्तीति विविध्यन्त्यस्ताभ्य उमणाभ्यः उद्गत - गणाभ्यः सेनाभ्यः। एवमुदुपसर्गस्यान्त्यलोपश्छान्दसः । तृहतीभ्यश्च वो नमः। तृंहतिर्हिंसाकर्मा, हिंसन्तीभ्य; सेनाभ्यः। तृहणं बज्राभिप्रहरणं, पोथनं मूसलप्रहारः शस्त्रघात खङ्गादिप्रहार इति हिंसायामेव भेदाः ।।24।।

नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यों । गृत्सपतिभ्यश्च यो नमो नमो विरुपेभ्यो विश्वरूपेभ्यश्च वो नमः॥25॥

उ. भा.—नमो गणेभ्यः। गणः समृद्धः । गणपतिश्च श्री नमः । नमो व्रातेभ्य। व्रातमर्दन्ति ते माना गण विशेषकः। ब्रातपतिभ्यश्च वो नमः। नसो गृत्सेसेभ्य; गृपो मेधावी। गृत्सपतिश्च वो नमः। नमो निरुपेभ्यः निकृतष्टलोभ्य; नानारूपेभ्यो वा। विषरूपेभ्यश्च वो नम;। विष्वरुपाः सर्वरूपाः ।।25।।

श.भा.—गणः समूह ततस्वरूपेभ्यो नमः । गणपतिभ्यश्च वो नमः । नमो व्रातेभ्यः (व्रातं समूहमर्हन्तीति) व्राताः गणविशेषाः, एवं व्रातपतिभ्यश्च वो नमः । नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमः। गृत्सो मेधावी । नमो विरूपेभ्यो विश्वरूपेभ्यः। विश्वरूपाः सर्वरूपास्तेभ्यः! "स्तोमौघनिकर व्रातवारसङ्घातसञ्चयाः" इत्यमरेणोक्तेः, व्रातः समूहः ।।25।।

नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्योऽअरथिभ्यश्च वो नमो नमः क्षतृभ्यः संगृहीतृभ्यश्च वो नमो नमो महद्भ्योऽअर्भकेभ्यश्च वो नमः ॥26॥

उ. भा.—नमः सेनाभ्यः । सेना चमूः। सेनानिभ्यश्च वो नमः । सेनां नयतीति सेनानीः। नमो रथिभ्यः रथाः येषां सन्ति ते रथिनः। अरथेभ्यश्च वो नमः। अरथा रथ वर्जिता योद्धारः। नमः क्षत्तृभ्यः रथानामधिष्टातारः क्षत्तारः संग्रहीतृभ्यश्र वो नमः। संग्रहीतारच सारथयः। नमो महद्भ्यः महान्तो जातिविद्यादिमित्कृष्टाः। अर्भकेभ्यश्च वो नमः। अर्भका अल्पकाः प्रमाणादिभिः।।26।।

श. भा.—सेना चमूस्तत्स्वरूपेभ्यो वो युष्मभ्यं नमः सेनान्यन्तीति सेनान्यः तेभ्यः । नमो रथिभ्यो रथा येषां ते रथिनः तेभ्यः । अरथेभ्यश्च अरथा रथवर्जिता योद्धारः तेभ्य; । क्षतृभ्यः रथानामधिष्ठातारः क्षत्तारः। तेभ्यः संगृहीतृभ्यो नमः। संगृहीतारः सारथयः। नमो महद्भ्यो महान्तो जातिविद्यदिभिरुत्कृष्टाः अर्भकेभ्यश्च वो नम; । अर्भका अल्पकाः प्रमाणादिभि; इत्युव्वटः ।।26।।

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्योमृगयुभ्यश्च ॥27॥

उ. भा.—तसः तक्षस्यो रथकारेभ्यश्च वो नमः स्थचारोरषं करोत्तीति लक्ष्मी विशेषएष। नमः कुत्सलेभ्यः कमोरेश्श्र वो नमः। कुललाः कुम्भश्रयः। कसोरा सोहकाराः। नमोः निषादेभ्यो पुञ्जिष्टेस्यश्च वो नमः। निरादरा सात्हिसाः। पुज्जिष्ठाः जात्यन्तरसंवद्धाः पुल्कासदृयः। ततः श्रुतिभ्यः। शुतो नयन्तीति श्रन्यः तेभ्यः श्वतिस्य। नमतेद्वेस्वसत्वं छन्दसम् । श्वगणिकों उच्यन्ते। मृगयुभ्यश्च वो नमः। 'इदंषुरिदंकाममानः' दर्शन यास्कः। मृगान् कामयन्तीति मृगयवः पापर्द्धिकाः तेभ्यो मृगयुस्यः ।।27।।

श. भा.—तक्षाणो रथशिल्पजीविनः तेभ्यो नमः । रथङ्कुवन्तीति रथकारास्ताक्षणे विशेषाः नमः कुलालेभ्य; कुलालाः कुम्भाकाराः कम्मरिभ्यः कर्मारा लोहकाराः। नमो निषादेभ्यः निषादा मांसभक्षका धीवराः । पुञ्जिष्ठा जात्यन्तरसङ्कीर्णा सङ्करादयः, पक्षिपुंजघातकाः पुल्कसादयो वा तेभ्यः। शुनो नयन्तीति श्वन्यः तेभ्यः । नयतेर्ह्रस्वत्वं छान्दसं श्वगणिन इति यावत् । मृगयुभ्यश्च वो नमः । मृगान् कामयन्त इति मृगयवः व्याधाः। "इदंयुरिदंकामयमन' इति यास्कः (निरु. 6/31) "सुप आत्मनः क्यजि" (पा. 2/1/8) ति क्यच् । 'क्यचि चे" (पा. 7/4/33) ति प्राप्तस्स्येत्वस्य "न छन्दस्यपुत्रस्ये" (पा. 7/4/21) ति निषेध;। तेभ्यो मृगयुभ्यो वो नमः ।।27।।

नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च ॥28॥

उ. भा.– नमः श्वभ्यः श्वपतिभ्यश्च वो नमः इत्युभयतोनमस्काराः समाप्ताः। नम इषुमद्भ्यो धन्वायिभ्यश्च वो नम इत्यारभ्य ये शब्दाः अतिक्रान्ताः ते पूजावचना वा न युष्मदादेशाः । इत उत्तरं रुद्रनामानि। नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च। नमो नीलमणिवाय च शितिकण्ठाय च । नीलग्रीपः कृष्णग्रीवः। शितिकण्ठः श्वेतकण्ठः।।28।।

श. भा.– नमः श्वभ्यः श्वपतिभ्यश्च वः युष्मभ्यं नमः अस्तु। उभयतो नमस्काराः समाप्ताः । इत उत्तरं रुद्रनामानि नमो भवाय च रुद्राय च नमः सर्वाय च पशुपतये च नमो नीलग्रीवाय च । नीला श्यामा ग्रीवा यस्य स तस्मै । शितिकण्ठाय च। शितिशब्दः श्वेतपर्य्याय इत्युव्वटः । 'शिती धवलमेचकौ' इति विश्वकोशात् ।।28।।

नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्त्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिविष्टाय च नमो मीढुष्टमाय चेषुमते च ॥29॥

उ. मा.–नमः कपर्दिने च व्युसकेशाय च । कपदीर जटामुकुटधारी। व्युप्ता मुण्डिताः केशा यस्य व्युप्तकेशः। नमः सहस्राक्षाय च शतधन्वने च बद्धक्षाय बहुधनुष्काय च। नमो गिरिशयाय च शिपिविष्टाय च गिरौ शेत इति गिरिशयः। शिपिविष्टः शिप इन निर्वेष्टितः स्रलतिरित्यमिधेयः प्रजन नवत् वेष्टनरहितः। यद्वा उदितमात्र आदित्य उच्यते। शिपिशब्देन च बालरश्मय उचन्यते। नमो मीदृष्टमाय चेपुमते च। मीदृष्टमः सेक्तृतम; युवा परिणामरहित इत्यर्थः। इपुमान् उपुसंयुक्तः ।।29।।

श.भा.–कपर्दिने जटाजूटाधारिणे नमः । व्युप्तकेशाय च । विशेषेण उप्ता मुण्डिताः केशा यस्य स व्युप्तकेशस्तस्मै। सहस्राक्षाय-बह्वक्षाय शतधन्वने बहुधन्वने नमः । गिरौ कैलाशे शेते गिरिशयस्तस्मै । शिपिविष्टाय विष्णुरूपाय, "विष्णुः शिपिविष्ट" इति श्रुतेः। यद्वा शिपिषु पशुषु विष्टः प्रविष्ट "पशवो वै शिपिरि" तिश्रुते; । सर्वान्तर्यामितया स्थित इत्यर्थः। यद्वा 'शिपिर्यज्ञ आदित्यो वा रविर्वा तैराविष्टो भवती" ति निरु (5/8) क्तकारयास्कोक्तेः। यद्वा शिपिविष्ट उपरिनिर्वेष्टितः। खलतिरभिधेयः। प्रजननवद्वेष्टनरहितः। यद्वा उदितमात्र आदित्यः स्तूयते । शिपि शब्देन च बालरश्मय उच्यन्त इत्युब्वटः। मीढुष्टमाय-सेक्तृतमाय यूने। परिणामरहितायेत्यर्थः इषुमते बाणयुक्ताय ।।29।।

नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमोऽऽग्याय च प्रथमाय च ॥30॥

उ. भा.–नमो ह्रस्वाय च वामनाय च। रूपतोनमस्काराः। ह्रस्वो लघुप्रमाणः। वामन संकुचितावयवः। नमो वृहते च वर्षीयसे च । बृहते महते वर्षीयसे वृद्धतराय च सवृधे च। वृद्ध; प्रसिद्धः सद्धः तेन समानवयाः। नमोऽऽग्रयाय च प्रथमाय च। अप्रमेभवोऽऽपः प्रथमो मुख्यः।।30।।

श. भा.–ह्रस्वो लघुप्रमाणकः । तस्मै वामनाय सङ्कुचितवायवाय, बृहते महते। वर्षीसे वृद्धतराय । "प्रियस्थिरे" (पा. 6/4/157) त्यादिना वृद्धशब्दादतिशायिने ईयसुनि तस्य वर्षा देशः। वृद्धाय सवृधे तेन समानवयसे । अग्रे भवोऽग्रयः । "अग्राद्यत्" (पा. 4/4/116) इत्यनेन यत्प्रत्ययः, प्रथमो मुख्यः तस्मै ।।30।।

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाच्चापगल्भाय च नमो जघन्याय च बुध्न्याय च ।।32।।

उ. भा.–नमो ज्येष्ठाय च कनिष्ठाय च। वयोवस्थितिरित्यभिप्रायाः पद्नमस्काराः। नमः पूर्वजाय चापराज च। पूर्वो जातः पूर्वजः अपरो जातः अपरजः। नमो मध्यमाय चापगल्भाय च। मध्ये भवो मध्यमः अपगतगर्भः अपगल्भः। एकगर्भास्तरितः। नमो जघन्याय च बुध्न्याय च। जघन; पश्चाङ्गागः बुभमदिः तत्र भवः। इति द्वादश यत्प्रत्ययान्ता रुद्राः ।।32।।

श. भा.–ज्येष्ठायेत्यादिवयोऽवस्थाविशेषाभिरप्राया नमस्काराः । पूर्वो जातः पूर्वजः अपरो जातः अपरजः ! मध्ये भवो मध्यमः । अपगतो गल्भो जननेन्द्रियं यस्य सोऽपगतगल्भः। 'गलभ धाष्टर्ये" (भ्वा. आ.) गल्भनं गल्भ धाष्टर्यम् । अपगतगल्भः एकगर्भान्तरितो वा। अव्यवहितः कनिष्ठः । जघनं कटिपश्चाद्भागः, बुध्नं वृक्षादिमूलभागः तत्र भव; ।।32।।

नम आशवे चाजिराय च नमः शीभ्या च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ।।31।।

उ. भा.–नम आशवे चाजिराय च शीघ्रनामनी। शुरध्वनो व्यापारः। अजिरः 'अज गतिक्षेपणयोः। अजतीत्यजिरः। नमः शीध्याय च शीम्याय च। शीघ्रशीभशब्दौ क्षिप्रनामतनी। एवं तत्र भव इति छान्दसो यत्प्रत्ययः अधिष्ठातृदेवतावचन;। उपरितनेप्वेवमेव योज्यम् । नम ऊर्म्याय चावस्वन्याय च। ऊर्जिलकल्लोकः। अवाचीनमुदकस्य गच्छतः स्वनो ध्वनिः अवस्वनः। नमो नादेशाय च द्वीप्याय च। नद्यां भवः द्वीपे भवः। द्वीपो नद्या मध्ये उदकरहितः प्रदेशः।।31।।

श. भा.–आशवे च अजिराय च। द्वे अपि शीघ्रनामनी । अश्नुत इति आशुः। अध्वनो व्यापकः, अजति गच्छतीत्यजिरः । "अज गतिक्षेपणयोः।" (भ्वा. प.) शीघ्र–यशोभ्यौ क्षिप्रनामनी "शीभृकत्थने" (भ्वा. आ.) शीभते कथ्यते इति शीघ्र आत्मश्लाघी पचाद्यच् । ततः "तत्र भव" इत्यर्ते "भवेच्छन्दसि" (पा. 4/4/110) इति छान्दसो यत्प्रत्ययः। अधिष्ठातृदेवतावचनः। अग्रेऽप्येवमेव बोद्धव्यम् । ऊर्मिर्जलकल्लोलः। अवाचीनं गच्छदुदकस्य स्वनो ध्वनिरवस्वनस्तत्रभवाय । नद्यां भवो नादेयः, "नद्यादिभ्यो ढक्" इति ढको ढस्येयः (पा. 7/1/2) द्वीपे भवो द्वीप्यः। द्वीपो नद्या मध्ये निरुदकप्रदेशः ।।31।।

नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नमः श्लोक्याय चावसान्याय च नम उर्वर्याय च खल्याय च ।।33।।

उ. भा.–नमः सोभ्याय च प्रतिसर्याय च। सोभ इति गन्धर्वनगरं सुभमिति वा। अभिचारकर्मसरः प्रतिसरः प्रत्यभिचारः। नमो यान्याय च क्षेम्याय च। नमः श्लोक्याय

चावसान्याय च। श्लोकः शब्दः। अवसानं समाप्तिः। नम उर्वर्याय च खल्याय च। उर्वरः सीतयो; सर्वसस्याज्ययोः सीतयोर्लाङ्गलमार्गद्वयोरन्तर । खलो धान्यखलः ।।33।।

श. भा.—सोभइति गन्धर्वनगरमुक्तम् यद्वा उभाभ्यां पुण्यपापाभ्यां सहितः सोभो मनुष्यलोकः। "पुण्येन पुण्यलोकं नयित पापेन पापमुभाभ्यं मनुष्यलोकमि त्याथर्वणश्रुते;अभिचारकर्मप्रतिसरः विवाहाङ्गोचितं हस्तसूत्रं वा, "आहुः प्रतिसरं हस्तसूत्रे माल्यस्य मण्डने' इतिविश्वः। यामे भवो याम्यः। यामः प्रहरः। क्षेमं कुशलं, श्लोका वैदिकमन्त्रा यशो वा, तत्र भवाय । अवसानं समाप्तिस्तत्र भवाय । उर्वरायां सर्वसस्याढ्यायां (धान्यरूपेण) भव उर्व्वर्य्यः "उर्वरा सर्वसस्याढ्या" इत्यमरः। उ़र्वरः सीतयोरन्तरम् इत्युव्वट़ः। सीता लाङ्गलपद्धतिः, तयोरन्तरं, खलो धान्यखलः "खलः कल्के भुवि द्वनौ क्रूरे कर्णेजपेऽधमे" इतिविश्वकोशात् ।।33।।

नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नम आशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च ॥34॥

उ. भा.—नमो वन्याय च कक्षयाय च। वनं वृक्षसमूहं वा। कक्षो नदीभ्यक्षः पर्वतकक्षो वा। नमः श्रवाय च शनि अवाय च ब्रहमः श्रब्द; प्रतिश्रवायः प्रतिशब्दः नम आशुपेषाय चशुरधाय च। आशुसेनः शीघ्रसेनः । आशुरथः शीघ्रप्रसूत नमः शूराय चावभेदिने च। शूरः शवतेः। अवाचीनं शीलमस्येत्यवभेदी ।।34।।

श.भा.—वनं वृक्षसमूहः । उदकं च "वनं प्रस्त्रवणो गेहे प्रवाहेऽम्भसि कानने"इति हैमः । कक्षः, नदीकक्षः पर्वतकक्षो वा "कक्षो वीरुधि दोर्मूले कच्छे शुष्कतृणे वने" इति हैमः। श्रवः शब्दः। प्रतिश्रवः, प्रतिशब्दः। आशुषेणः शीघ्रसेनः आशुरथः शीघ्ररथः। शूरः शरभेदी। अवभेदी-अवाचीनं भेत्तुं शीलमस्येति अवभेदी ।।34।।

नमो बिल्मिने च कवचिनें च नमो वर्मिणे च वरुथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च ॥35॥

उ. भा.—नमो बिल्मिने च कवचिने च। विल्मल्यास्तीतिविल्मी। विल्मं भासनम् उत्तराशनुच्यते। कवचं पट्टस्यूतं कर्पसगर्भम् । नमो वर्मिणे च वरूथिने च । वमै लौहं वरुयं इस्तिन उपरि गृहाकारः कोष्टकः। नमः श्रुताय च श्रुतसेनाय च । श्रुताय सर्वलोकविदिताय। श्रुतसेना प्रसिद्धा सूर्यस्य । नमो दुन्दुभ्याय च आहनन्याय च। दुन्दुभी भवः दुन्दुभ्यः आइने भव आहनन्यः ।।35।।

श.भा.—बिलम्मस्यास्तीति बिल्मी। बिल्मं शिरस्त्राणं, बिल्मं भासन मुत्तमाङ्गमुच्यते इत्युव्वटः । कवचं पट्टस्यूतं कार्पासगर्भं, वर्म 'लोहकवचं, वरूथं हस्तिन उपरि गृहाकारः प्रकोष्ठकस्तद्वते नमः । श्रुताय-सर्वलोकविदिताय, श्रुतसेनाय श्रुता प्रसिद्धा सेना चमूर्यस्य तस्मै, दुन्दुभौ भेर्या भव; दुन्दुभ्यः, आहनने वाद्यताडने भवः आहनन्यः तस्मै।।35।।

नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च ॥36॥

श.भा.- घृष्णुः प्रगल्भः, सर्वं प्रमृशतीति प्रमृशः पण्डितः। नामो निषङ्गिणे इषुधिमते च निशङ्ग खड्गः सोऽस्यातीति, इषवो धीयन्तेऽत्रेति इषुधिः तद्वते नमः। तीक्ष्णा इषवो यस्य स तीक्ष्णेषुः। आयुधमस्यास्तीत्यायुधी तस्मै नमः। स्वायुधाय शोभनायुधाय। सुधन्वने शोभनधनुषे नमः।।36।।

उ. भा.—नमो एष्णवे च प्रमृशाप च एष्ण प्रगल्भः प्रमृशः सर्व परिसृष्टि पण्डित इटाकी। नमो हिनत त्रेपुनि मते च। विषद्ध खद्गं सतम्यातीति । इषधीय्ते श्रमिनश्रिति दुधिः नम; तीक्ष्णेषवे चायुभिने च। तीक्ष्णा इषतोऽस्य विद्यन्त इति तीक्ष्णेषु आयुधमस्यास्त्रीवायुधी। नमः सायुध्याय च मुध्वने च। शोभनायुध स्वायुधः। शोमनधनुः सुधन्वा ।।36।।

नमः स्त्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च ॥37॥

उ. भा.—नमः स्त्रुत्याय च पथ्याय च। नद्या एकदिशोदकवाहिनी स्त्रुतिस्तत्रभवः स्त्रुत्यः। पथि भव; पथ्यः। नमः काट्याय च नीप्याय च । काटे भवः काट्यः काटः कूपः नीचैयंन्ति यत्रायः स नीपः तत्र भवो नीप्यः। नम; कुल्याय च सरस्याय च। कुल्यायां भवः कुल्यः। सरसि भवः सरस्यः। नमो नादेयाय च वैशान्ताय च। नद्यां भवो नादेयः। 'श्रीम्यो ढक्' वेशन्तः तडागः तत्र भवो वैशन्तः ।।37।।

श.भा.—नद्या एकदेशवाहिनी स्त्रुतिः । तत्र भवः स्त्रुत्यः, पथि भवः पथ्यः, काटे भवः काय्यः। कुत्सितं अटतीति काटः विषममार्गः, कूप इति उब्बटः "काटः कुल्यापदेशो वे" ति महीघरः। नीचैर्गच्छन्तायापो यत्र स नीपः निम्नभूमिः । "ऋक्पूरब्धूः पथामि" (पा. 5/4/74) ति अप्रत्ययः,। "द्वयन्तरुपसर्गेभ्योऽप ईदि" (पा. 6/3/97) ति, अपशब्दस्येकारः, "कुल्याल्पा कृत्रिमा सरित्" इत्यमरः । कुलेषु देहेषु वान्तर्यामिरूपेण भवः। "कुलं देहेऽन्वये गुणे" इति रभसः। कुल्यायां भवः कुल्यः। सरसि भवः सरस्यः, नद्यां भवो नादेय;, वेशन्तोऽल्पसरः तत्र भवः वैशन्तः ।।37।।

नमः कूप्याय चावट्याय च नमोवीध्याय चातप्याय च नमो मेध्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च ॥38॥

उ. भा.—नमः कूप्याय चावट्याय च । कूपे भव कूप्यः । अवटे भव अवढ्यः अवटो गर्तः । नमो वीयाय चातप्याय च। इन्धीदीप्तौ विगतदीप्तिर्वीध्रः घनागमः तत्र भवोवीघ्रयः आतपे भव आतप्यः। नमो मेध्याय च विद्युत्याय चं। निगद् व्याखायानम् । नमो वर्ष्याय चावर्ष्याय च । वर्षे भववर्ष्यः। अवर्षे भव अवर्ष्यः ।।38।।

श. भा.–कूपे भवः कूप्यः । अवटे गर्ते भवः अवट्यः । विशेषेण इन्धति दीपयतीति वीध्रः, "इन्धी दीप्तौ" तत्र भवो बीध्रयः। आतपे भवः आतप्यः। मेघे भवो मेघ्यः। विद्युति भवः विद्युत्यः। वर्षे भवो वर्ष्यः। अवर्षे भवोऽवर्ष्यः ।।38।।

नमो वात्याय च रेष्मयाय च नमो वास्तव्याय च वास्तपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च ॥39॥

उ. भा.–नो वात्याय च रेष्यमयाय च। वाते भवो वात्यः। रिषतिहिंसार्थ;। 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन् । रेप्स । तत्र भवो रेप्यः। नमो वास्तव्याय च वास्तुपाय च वास्तु गृहं तत्र भवो वास्तव्य; वास्तुपतिर्वास्तुपः। नमः सोमाय च रुद्राय च नामतो नमस्काराः। नमस्ताम्राय च वर्णतो नमः स्वकाराः ।।39।।

श.भा- वाते भवो वात्यः। रेष्मे भवो रेष्म्यः। रेष्मः हिंसा । रिषति हिंसायाम् । (दि. प.) "अन्येभयोऽपि दृश्यन्त" (पा. 3/2/75) इति मनिन् । वास्तु गृहं, तत्र भवो वास्तव्यः। वास्तुं पातीति वास्तुपः, सोमाय च रुद्राय चेति नामतो नमस्कारः । ताम्राय चारुणाय चेति वर्णतो नमस्कारः ।।39।।

नमः शंगवे च पशुपतये च नमऽउग्राय च भीमाय च नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय॥40॥

उ. भा.–नमः शांगवे च पशुपतये च। शं सुखं गवां करोतीति शंगुः। पशूनां पतिः। नम उग्राय च भीमाय च। उग्रउद्गूर्णः। भीमो भीषणः। नमोऽप्रेवधाय च दूरेवधाय च। अग्रेस्थितो हन्ति अग्रेवधः। दूरेस्थितो हन्ति दूरेवधः। नमो हश्रे च इनीयसे च। हन्तीति हन्ता हनीयान्हन्तुतमः। नमो वृक्षेभ्यो इरिकेशेस्यः । हस्तिवर्णानि येषां वृक्षायां पत्राणि न एवमुच्यते । नमस्ताराय नास्यति इनारयति संसारमृत तारः ।।40।।

श.भा.–शं सुखं गमयति इति शङ्गु; । पशूना पतिः पशुपति; । उद्वर्ण उग्रः। भीमो भीषणः । अग्रे स्थितो हन्तीत्यग्रेवधः, दूरे स्थितो हन्तीति दूरेवधः, हंन्त्रे हननकर्त्रे, हनीयसे अतिशयेन हननकर्त्रे। हरयो हरितवर्णानि केशा इव पत्राणि येषां तेभ्यो वृक्षेभ्यो नमः । तारयति उत्तारयति संसारादिति तारस्तस्मै ।।40।।

नमः शंभवाय च मयोमवाय च नमः शंकुकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥41॥

उ. भा.–नमः शंभवाय च मयोभवाय च। 'शम उपशमे'।'अस्य। शं सुन्ननाम। शंभावयतीति शंभवः। यद्वा। शमा सुखेन वा भावयतीति शंभवः। शं च आनन्दरूपश्च। कालदेशानदच्छित्रं भवनं तच्छक्तिश्र। आनन्दविज्ञान इत्यर्थः। इयमेव व्याख्या मयोभुवाशब्दस्य। नमः शंकराय च मयस्कराय च। शंकरोतीति शंकरः। मयः करोतीति मयस्करः। नमःशिवाय च शिवतराय च शिव; शान्तो निर्विकारः। शिवतरन्ततोऽप्यधिको निरतिशय सर्वज्ञबीजः।।41।।

शं.भा.—शं भवत्यस्मादिति शम्भवः सुखभवः, "शम उपशमे" धातुः । यद्वा शं चासौ भवश्च शम्भुः । शमानन्दरूपः भवः कालदेशानवच्छिन्नः। मय इति सुखरूपः । भवः भवनशक्तिः। आनन्दविज्ञानघनरूपः । शङ्करोतीति शङ्करः। मयः करोतीति मयस्करः, मयः सुखनाम। शिवाय शान्ताय निर्विकाराय शिवतराय निरतिशयसर्वबीजाय ।।41।।

नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च ॥42॥

उ. भा.—नमः पार्याय चावार्याय च। पारे भवः पार्यः। अवारे भवः अवार्यः नयाः प्रतातरणार्य च। प्रतरन्ति येन तत्प्रतरणम्। उद्कमुच्यते। उचरिन्त येन तदुत्तरणम् नोरुच्यते। नमस्तीर्थ्याय च कल्याण च। तीर्थे भवस्तीर्थ्यः। कृले भवः फूल्यः। नमः शषप्याय च फेन्याय च । प्ररूढानि तृणानि शप्पमुत्यन्ते तत्र भवः शप्प्यः। केने भवः फेन्यः ।।42।।

श. भा.—पारे भवः पार्य्यः । अवारे भवः अवार्यः । 'पारावारे परार्वाची तीरे पात्रं तदन्तरमि"ति कोषः। प्रतरति येन तत्प्रतरणं नौकादि लघुद्रव्यं, किं च उत्तरति अनेनेत्युत्तरणं तीर इत्युच्यते, तीर्थे भवः तीर्थ्यः, कूले भवः कूल्यः, शष्पे शरतृणे भवः शष्प्यः, फेने भवः फेन्यः, तस्मै नमः ।।42।।

नमः सिकत्याय च प्रवाह्याय च नमः किꣳशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नम इरिण्याय च प्रपथ्याय च ॥43॥

उ. भा.—नमः सिकत्याय च प्रवाह्याय च नमः किछशिलाय च यक्षणाय च नमः कपर्दिनै च नमः किꣳशिलाय च क्षणाय च नमः कुपर्दिने च पुलस्तये च नम इरिण्याय च प्रपथ्याय च। कपर्दी जटामुकुटधारी। पुरिस्तष्ठतीति पुलिस्त शुभाशुभदिदृक्षया। नम इरिण्याय च प्रपध्याय। इरिणए भव इरिण्यः। निरुदक-प्रदेश इरिणम् । प्रपथे भवः प्रपथ्यः।।43।।

श. भा.—सिकतासु भवः सिकत्यः । प्रवाहे भवः प्रवाह्यः । किमतदुदकमुत हिमीभूतशिलेति यत्र वितर्कः स किंशिलः । अथ वा किं शिला उत कर्करीति। क्षियन्ति वसन्त्यस्मिन्नप इति क्षयणः स्थिरजलप्रदेशस्तस्मै नमः। कपर्दो जटाजूटोऽस्यास्तीति कपर्दी। पुरस्तिष्ठति शुभाशुभदिदृक्षया इति पुलस्तिः । रंलयोरैक्यत्वमत्र, थस्य तत्वं रस्य लत्वं छान्दसम् । यद्वा पुर्पु शरीरेषु अस्तिः सत्ता यस्य स पुलस्तिः सर्वान्तर्यामी तस्मै। इरिण्याय च प्रपथ्याय च । इरिणे भव इरिण्यः । इरिणो निरुदकप्रदेशः। प्रकृष्ट पन्थाः प्रपथः । प्रपथे भवः प्रपथ्यः ।।43।।

नमो व्रज्याय च गोष्ठयाय च नमस्तल्पयाय गेह्याय च नमो हृदय्याय च निवेष्याय च नमोः काटटयाय च गह्वरेष्ठठाय च ॥44॥

उ. भा.—नमो वश्याय च गोश्यायं च व्रजे भवो व्रज्यः। पाइस्तिष्टसिग्रिव गोष्ठ त्र बऽो गोणः—

हृदयाय च गेह्याय च। तन्नदाय्यम् । वेद गर्भगृहम् 'तत्र भवः' इति वदिनः। नमो हृद्यायय च निवेषंप्याय च। हृदये भवो हृदय्यः। निवेप्पे भवो निवेष्पः। निर्वष्ण आवर्तः। भ्रमः। नमः काटयाय च गह्वरेष्ठाय च। कल्टे भव; काट्य्ः काटः कूपः। गहरे तिष्ठति गह्वरेष्टः। गह्वै महदुदकम् ।।44।।

श. भा.– बज्रे गोसमहू भवो व्रज्य; । गावस्तिष्ठन्त्यत्रेति गोष्ठ । तत्र भवो गोष्ठ्यः। तल्पे भवः तल्प्यस्तल्पः शयनीयं, गेहे भवो गेह्यः, हृदये भवो हृदय्यः, निवेष्पे भवो निवेषप्यः। निवेष्पः आवर्तः, नीहारजलं वा। काटे भवः काट्यः। काटः कूपः। गह्वरे तिष्ठतीति गह्वरेष्ठः। गह्वरं महदुद्कम् ।।44।।

नमः शुष्क्याय च हरित्याय च नम पाꣳस् व्याय च रजस्याय च नमो लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्याय च ॥45॥

उ. भा.–नमः शुष्क्याय च हरित्याय । च शुष्के भवः शुष्क्यः। हरिते भवो हरित्यः हरितमाद्रस् । नमः हरितामर्द्रम् । नम पासच्याय च रजस्याय च पांसुपु भवः पांसख्यः। रजसि भवो रजस्य;। नमो लोप्याय चोलप्याय च । लोपे भवो लोप्यः। लुप्वढ इति लोपः। उलपे भव उलप्यः। ऊधर्घ्व लप्यते उच्चार्यते नतु लोप इवाश्रवणमुपैति उलप्यः। नमः ऊर्ज्याय च। ऊर्वे भव ऊर्ध्वः। ऊर्वो वदवाग्निः। स शोभनः सूर्यः तत्र भवः सूर्च्यः ।।45।।

श.भा.–शुष्के भवः शुष्क्यः । हरिते भवः हरित्यः । हरितमाद्रम्, पांसुषु भवः पांसव्यः, रजसि भव; रजस्यः, लोपे भवः लोप्यः, उलपे भव उलप्यः । उलपो बल्वजादितृणविशेषस्तत्र भवः उलप्यः तस्मै। "उलपस्तु गुल्मिनी तृणभेदयोः" ऊर्वो वाडवाग्निस्तत्रं भव ऊर्व्यः स इव शोभन सूर्वस्तत्र भवः सूर्व्यः कल्पानलः तस्मै नमः ।।45।।

नमः पर्णाय च पर्णशदाय च नम उद्गुरमाणा चाभिग्ध्नते च नम आखिदते च प्रखिदते च नमः इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमः वः किरिकेभ्यो देवानाꣳहृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नम आनिर्हतेभ्यः ॥46॥

उ.भा– नमः पर्णाय च पर्णशदाय च। पर्णं प्रसिद्धम् । पर्ण शब्दः पतितपर्णावस्थानवान्। नम उद्गुरमणाय चाभिघ्नते च। उद्गुरमाणः उद्यमनशीलः। अभिघ्नतेऽभिहननं कुर्वते। नम आखिदते च "खिद् दैन्ये" दैन्यभावं कुरुते। अभक्तानांप्रकर्षेण दैन्यभावं कुरुते निषिद्धसेविनाम् नमइषकृद्भ्यो धनुष्कृद्भश्चवो नमः। इषून्ये कुर्वन्ति ते इषुकृत तेभ्यो नमः। ये यूयं धनुष्कृतः तेभ्यो युष्मभ्यो नमः। युष्मदादेशयोगात्प्रत्यक्षा एते रुद्राः। समाप्तास्तिस्रोऽशीतयः। इदानीं रुद्राणां हृदयभूतानामग्निवायुसूर्याणां संबन्धीनि यजूंषि उच्यन्ते। नमो वः किरिकेभ्यः। नमोवः युष्मभ्यं ये यूयं किरिकाः कुर्वन्तीदं जगत् वृष्ट्याद्युपकारेण किरिकाः अग्निवायुसूर्याः देवानाꣳ हृदयेभ्यः रुद्राणां हृदयभूताः। रुद्राणां हृदयभूताः। नमो विचिन्वत्केभ्यः। विचिन्वन्ति पृथक् कुर्वन्ति धर्मकारिणं पापकारिणं च ते विचिन्वत्काः। नमोविक्षिणत्केभ्यः। विविध क्षिण्वन्ति

हिंसन्तिते विक्षिणत्काः। नम आनिर्हतेभ्यः हन्तिर्गत्यर्थः। एते ह्यग्निवायुसूर्याः सर्गादावाभिमुख्येनैतेभ्यो लोकेभ्यो निर्गताः।।46।।

श.भा- पर्णाय पर्णस्वरूपाय। पर्णशदाय पर्णशद इति पतितपर्णावस्थानम् उद्गुरमाणः उद्यमनशीलः अभिध्नतेऽभिहननं कुर्वते "स्वाभक्तानामि"ति शेषः। "खिद दैन्ये" (रु०ग०) आङ्-पूर्वः। लटः शता पदव्यत्ययो विकरणव्यत्ययश्च। आखिदते-दैन्यभावं कुर्वते इत्युव्वटः। प्रखिदते अभक्तानां प्रकर्षेण दीनभावं कुर्वते। ये इषवो बाणान् कुर्वन्ति ते इषुकृतः तेभ्यो नमः। ये यूयं धनुष्कृतस्तेभ्यो नमः। युष्मदादेशयेगात्प्रत्यक्षा एते रुद्राः। तिस्रेऽशीतयो रुद्राः समाप्ताः। इदानीं रुद्राणां हृदयभूतानामग्निवायुसूर्य्याणां सम्बन्धीनि यजूंषि उच्यन्ते वो युष्मभ्यं नमः। वः केभ्यः, किरिकेभ्यः "एते हीदꣳ सर्वं कुर्वन्ती"- ति श्रुतेः। कुर्वन्तीदं जगद्वृष्ट्यादिद्वारेणेति किरिकाः वाय्वग्निसूर्य्याः। किम्भूतेभ्यः? देवानां रुद्राणामग्निवायुसूर्याणां हृदयभूतेभ्य इत्यर्थः। विचिन्वन्ति पृथक्कुर्वन्ति धर्मकारिणं पापकारिणं चेति, विचिन्वत्काः। विविधं क्षिण्वन्ति हिंसन्तीति विक्षिणत्कास्तेभ्यः। आनिर्हतेभ्यः- आनिर्गच्छद्भ्यः हन्तिर्गत्यर्थः, एते अग्निवायुसूर्याः सर्गादावेतेभ्यो लोकेभ्यः आभिमुख्येन निर्हता निर्गता इत्यर्थः।।46।।

द्रापे अन्धसस्पते दरिद्र नीललोहित । आसां प्रजानामेषा पशूनां मा भेर्मा रोङ्मो च नः किंच नाममत् ।।47।।

उ. द्रापे अन्धसम्पते। सप्तकण्ढिका एकद्रस्तुतिः। उपरिष्टदृहती। हे द्रापे। 'द्रा कुत्सायांगतो'। द्रापयतीति द्राविः अयथोक्तकारिणं कुत्सितां गतिं नयति। हे अन्धस्सपते सोमस्य पते। हे दरिद्र हे निष्परिग्रह । हे नील लोहित। 'नीलानि चास्यैतानि रूपाणि च' इति श्रुतिः। एवं संबोधघ्य रुद्रं अभेदानीमभयं याचते। असां प्रज्ञानाम् अस्मदीयानाम् एषां पशूनां मा त्वं भैषीः। मारोक् अभिभ्यश्च मा त्वं रुजः मा भाङ्गीः। मो च नः किंचनाममत्। मा च नः अस्माकं किंचन अपत्यादिकम् । आममत् 'अम रोगे'। मा चस्माकमपत्यादिकं रोगसंयुक्तं कृथा इत्यर्थः ।।47।।

श.भा- सप्तकण्डिका एकरुद्रस्तुतयः। हे द्रापे, "द्रा कुत्सायां गतौ" (अ०प०) द्रापयतीति द्रापिः। अतथोक्त- (पाप-) कारिणः कुत्सितां गतिं नयतीत्यर्थः। हे अन्धसस्पते! अन्धसः अन्नस्य सोमस्य पते पालक!। हे दरिद्र! निष्परिग्रह। हे नीललोहित! नामान्येतानि रूपाणि चेति श्रुतौ एवं सम्बोध्य रुद्रमभयं याचते। हे शिव! नः अस्माकम् आसां प्रजानाम् एषां पशूनाम् गवादीनां त्वं मा भेः भयं मा कार्षीः। मा रोक् भङ्ग मा कार्षीः "रुजो भङ्गे"। मो च नः कि च नाममत् । पुनः न अस्माकं किं चन अपत्यादि माऽऽममत् मा रुग्णं कुरु, "अम रोगे" लङि धातोरमागम आर्षः। उः पादपूरणः।।47

इमा रुद्रांय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः। यथा शमसद्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ।।48।।

उ. भा.- इमा रुद्राय। जगती। इमा; मती; याभिः स्तूयते ता रुद्राय। तवसे 'महसे बलवते या। उभयत्र हि तवः-शब्दः पञ्चते। कर्पर्दिने जटामुकुटधारिणे। क्षयद्वीराय क्षयन्ति वसन्त्यस्पिन्वीहा इति क्षयद्वीरस्तस्तै भयद्रीराय। प्रभारामहे प्रेरयामः । तथा वयं प्रेरयाम;। यथा येन प्रकारेण। शमसत् द्विपदे चतुष्पदे। शं सुखम् असत् भवंति द्विपदां चतुष्पदां। यथा विश्वं सर्व पुष्टं समृद्धं ग्रामे अस्मिन् अनातुरम् आपद्रहितं स्वस्यं भवति ।।48।।

श.भा- वयं इमा मती; बुद्धीः रुद्राय प्रभरामहे-प्रेरयामः, "हृग्रहोर्भश्छन्द- सि" (पा० 3।1।84 वा०) इति हकारस्य भकारः। याभिः स्तूयत इत्यर्थः। कथं भूताय? तवसे महते बलवते वा। उभयत्र तवःशब्दः पठितः (निधं 2।9।3-3) कपर्दिने-जटामुकुटधारिणे। क्षयद्वीराय।क्षयन्तो निवसन्तो वीरा यत्र। तथा प्रेरयाम यथा येन प्रकारेण द्विपदे मनुष्ये चतुष्पदे पशौ शं कल्याणं असत् भवतु। किञ्च विश्वं सर्वं पुष्टं समृद्धं भवतु। अस्मिन् ग्रामे अनातुरम् आपद्रहितत्वं भवतु।।48।।

या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी ।
शिवा रुतस्य भेषजी तया नो मृड जीवसे ॥49॥

उ.भा. या ते रुद्र ! अनुष्टुप् हे रुद्र, या तव शिवा शान्ता तनः शरीरम् । शिवा। अतिशयार्थ पुनर्वचनम् । विश्वाहा भेषजी सर्वदा भिषपत्त्वेन वर्तते। शिवा रुतस्य व्यधेः भेषजी। रुतशब्दो व्याधिवचनः। यद्वा शिवारुतस्य शिवारे कृतस्य शव्दस्य भेजषी। अपशकुनइच्रीत्यर्थः। तया तन्वा नः अस्मान् मृड सुखय। जीवसे जीवनाथ ।।49।।

श.भा-हे रुद्र! या ते तव शिवा शान्ता तनूः शरीरं तया त्वं नः अस्मान् मृड सुखय। किमर्थम् ? जीवसे-जीवनाय! तनूः किम्भूता? शिवा कल्याणा। आदरार्थं पुनः पुनर्वचनम्। विश्वाहा सर्वदा रुतस्य व्याधेः भेषजी। भिषकत्वेन सह वर्तते। रुतशब्दो व्याधिंवचनः। यद्वा शिवारुतस्य फेत्कृतशब्दस्य भेषजी अपशब्दान् हन्त्री-इत्यर्थः।।49।।

परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः। अव स्थिरा मघवद्भयस्नुष्व मीढ्वस्तोकाय तनयाय मृड ॥50॥

उ.भा.- परि नः अनुष्टुप् । परिवृणक्तु परिवर्जयतु नः अस्मान् रुद्रस्य हेतिः आयुधं परित्वेषस्य दुर्मतिरघायो परिगृणक्तु स्वेपस्य क्रोधिनो ज्वलितस्य दुर्मतिः दुष्टाः मतिः अधायोः अधं पापं यः कामयते परस्मै कर्तुं स अघायु तस्य अघायोः। उत्तरोऽर्धर्चः प्रत्यक्षकृतो द्वितीयं वाक्यम् । अवस्थिरा मधवत्र्यवस्तुष्व अवतनुष्य अवतारय शियिलीकुरु। स्थिरा मघवत्र्वस्तनुष्व अवतनुष्व अवतारय शिथिलीकुरु। स्थिरा स्थिराणि धनूंषि। केभ्योऽर्याय अवतनुष्व। मघवत्रवः मघं धनं हविर्लक्षणं येषामस्ति ते मघवन्तः तेभ्यो मघवत्र्यो यजमानेभ्योवर्धाय। नतु अयागशीलेभ्यः प्रतिपिद्धसेविभ्यः। किंच। हे मीढः 'मिह सेचने' सेक्तः। मध्यस्थानो वा दृष्टिकर्मणा स्तूयते। युवा वा कृत्वा अपरिणामित्वेन स्तूयते। सोकाय तनयाय सूड। तोकाय पुत्राय तनयाय पौत्राय। सुद सुखम् ।।50।।

श.भा- रुद्रस्य हेतिरायुधं नोऽस्मान् परिवृणक्तु-परितो वर्जयतु। अस्मान्मा हन्त्वित्यर्थः। अघायोः पापशीलस्य दुर्मतिश्च नः परिवृणक्तु परिवर्जयतु। किम्भूतस्य? त्वेषस्य "त्विषिदीप्तौ"8 दीप्तस्य क्रुद्धस्येत्यर्थः। स्थिरा स्थिराणि धनूंषि मघवद्भ्यः मघवदर्थे अवतनुष्व अवतारय शिथिली-कुरु। मघं धनं हविर्लक्षणं येषां तेभ्यः यजमानेभ्य इत्यर्थः। किंच हे मीढवः! सेक्तः! तोकाय पौत्राय, तनयाय पुत्राय च मृउ सुखय। कर्मणि चतुर्थी।।50।।

मीढुष्टम शिवतम शिवो नः सुमना भव । परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचरपिनाकं बिभ्रदागहि ।।51।।

उ. भा.- मीढुष्टम । यममध्या त्रिटुप् । हे मीढुष्न सेक्तृतम । हे, शिऽतम, शिवो नः अस्माकं सुमना; शोभनमनस्कश्च भव। किंच । परमे वृक्षे दूरदेशावस्थयिनि आयुधं विचाय स्थापयित्वा। कृत्ति चर्म वसानः। आचर आचरणमद्या नम पिनाकं विभ्रत् पिनांक कोदणअड; तं धारयन् आदि आगच्छ ।।51।।

श.भा- हे मीढुष्टम! सेक्तृतम! हे शिवतम! नः अस्माकं शिवः सुमनाश्च शोभनमनाश्च भव। किं च परमे दूरदेशावस्थायिनि वृक्षे आयुधं निधाय स्थापयित्वा कृत्तिं वसानश्चर्म परिदधानः। आचरागच्छ तपश्चरेति वा। पिनाकं स्वं धनुबिभ्रत् धारयन् आगाहि आगच्छ।।51।।

विकिरिद्र विलोहित नमस्ते अस्तु भगवः। यास्ते सहस्रꣳ हेतयोऽन्यमस्मन्नि-पवन्तु ताः।।52।।

उ.भा.- विकिरिन्द्र । द्वे बनुष्टभौ। हे विकिरिद्र विकिरिन्द्र वयतीति विकिरिन्द्रः विलोहित विगतकल्पभाव। गले अस्तु हे भघवन् । एवमिटूत्य अथ पाचते। पास्त्य सुर हेमनदेनिक सहयशब्दोऽनन्नवचनः। अन्यास्मि। श्रिवृन्द नाः पुरुषं विलपुन्तु ताः ।।52।।

श.भा- हे विकिरिद्र! विविधं किरि घाताद्युपद्रव द्रावयति नाशयतीति विकिरिद्रः। हे विलोहित! विगतकलुषभाव! हे भगवः भगवन् ! ते नमोऽस्तु। यासते तव हस्ते सहस्र हेतयः असंख्यातानि आयुधानि सन्ति। ताः अस्मत् - अस्मत्तः अन्यं पुरुषं प्राति निवपन्तु निपतन्तु (घ्नन्तु)। भगव इति 'मतुवसो रुः सम्बुद्धौ च्छन्दसि" (पा0 8/3/1) इति न कारस्य विसर्जनीयः।।52।।

सहस्राणि सहस्रशो बाह्वोस्तव हेतयः तासामीशनो भगवः पराचीना मुखा कृधि ।।53।।

उ.भा.- सहस्राणि बहूनि सहस्रशः। 'संख्यैकवाचनाश्च बीप्सायाम्' इति शस् । असंख्यातानि सहस्राणि। अनन्तत्वप्रतिपादनार्थम् । बाह्वोस्तव हेतयः आयुधानि तासां हेतीनाम् ईशानः सन् हे भगवः, 'मतुवसोरुः संबुद्धौ छन्दसि' इति विसर्जनीयः। हे भगवन्। पराचीनानि पराञ्चितानि पराश्रुस्रानि मुखा मुखानि कृधि कुरु ।।53।।

श.भा- हे रुद्र! ते तव बाह्वेः याः सहस्रशः सहंस्राणि आयुधानि सन्ति तासां हेतीनाम् ईशानः प्रभुस्त्वं मुखा मुखानि अस्मत्तः पराचीना पराचीनानि पराश्रितानि पराङ्मुखानि वा कृधि-कुरु। सहस्रस्यानन्तत्वप्रतिपादनाय शस्रत्ययः।।53।।

असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम्।

तेषाꣳसहस्रयोजनेऽव धन्वानि तन्मसि ॥54॥

उ.भा.- असंख्याता। बहुरुद्रदेवत्या दशानुष्टुभः पृथिवीसनां नमस्कारः । असंख्यातानि सहस्राणि ये रुद्रा अधिभूम्याम् भूम्यांमुपरि स्थिताः। तेषां सहस्रयोजनेःम्मसि अवतनुम'' अवतारयामः। धन्वानि भनूंषि ।।54।।

श.भा- हे रुद्र! असंख्याता असंख्यातानि सहस्राणि ये रुद्रा अधिभूम्याम् भूम्या उपरि स्थिताः। तेषां सहस्रयोजने अवस्थितानां धन्वानि धनूंषि अवतन्मसि अवतनुमः अवतारयामः।।54।।

अस्मिन्महत्वर्णवेऽन्तरिक्षे भवा अधि।

तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥55॥

उ.भा.- अस्मिन्महति मध्यस्थानः । अस्मिन्दति अर्णवे । श्रणे उद्कनामसु पटितम् वो मत्वर्थीयः। अर्वणति अन्तरिक्षे भवा रुद्राः। अधि उंपरि स्थिताः ये तेषामिति कृतव्याख्यानम्।।55।।

श.भा.- अस्मिन्नन्तरिक्षे भवा रुद्रा अधि उपरि स्थिताः। तेषामिति व्याख्यातम् । अन्तरिक्षे किम्भूते? अर्णवे। अर्णः पानीय तद्युक्ते। मत्वर्थीयो वकारः सलोपश्च (पा० 5/2/109 वा०) महति-व्यापके।।55।।

नीलग्रीवाः शितिकण्ठा दिव ꣳरुद्रा उपश्रिताः।

तेषाꣳसहस्रयोजनेऽव धन्वानि तन्मसि ॥56॥

उ. नीलग्रीवाः नीलग्रीवाः। द्युस्थाना उच्यन्ते। नीलप्रीवाः। कृष्वचनो नीलशब्दः। शितिकण्ठाः शितिशब्दः श्वेतवचनः। दिवंय द्युलोकं रुद्रा उपश्रिताः अधिष्ठितः अध्याश्रिताः ये तेषामित्युक्तम् ।।56।।

श.भा- ये नीलग्रीवाः कृष्णकण्ठाः शितिकण्ठाः श्वेत कुण्ठाश्च रुद्राः दिवं द्युलोकम् उपश्रिता उपरिस्थिताः तेषामित्यादि पूर्ववत् ।।56।।

नीलग्रीवाः शितिकण्ठा शर्वा अधः क्षमाचराः।

तेषा ꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥57॥

उ.भा.- नीलग्रीवाः। पृथिव्या अघो ये रुद्रास्त उच्यन्ते। नीलग्रीवाः सिथिकण्ठाः शर्वाः रुद्रा अधः क्षमाचरा अधः पृथिव्यां संचरन्ति ये तेषामिति कृतव्याख्यानम् ।।57।।

श.भा- ये शर्वाः रुद्रा नीलग्रीवाः शितकण्ठाः अधः क्षमाचराः पृथिव्या अधः संचरन्ति तेषामिथ्यादि पूर्ववत् ।।57।।

ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः ।

तेषाꣳसहस्त्रयोजनेऽव धन्वानि तन्मसि ।।58।।

उ.भा.- ये वृक्षेषु आसते शणिपअराः शष्पिरवर्णाः। नवप्ररूढानि तृणानि शप्पशब्देनोच्यन्ते। नीलग्रीवाः विलोहिताः विगतकलुषभावाः। विविधं वा लोहिताः। लोहित लोहित-शब्देन वा धातको लक्ष्यन्ते। त्वग्लोहित मज्जादि विमुक्तेत्यर्थः तेषामित्युक्तम् ।।58।।

श.भा- ये रुद्राः वृक्षेषु वने आसते। किम्भूताः? शष्पिञ्जराः शष्पा इव पिञ्जरवर्णाः। शष्प नवतृणं, नीलग्रीवाः विलोहिता विगतकलुषभावाः विविधं लोहिता वा। लोहितशब्देन धातव उच्यन्ते। तेन त्वग्लोहितमज्जादियुक्ता इत्यर्थः। तेषामित्यादि पूर्ववत् ।।58।।

ये भूतानामधिपतयो विशिखासः कपर्दिनः ।

तेषाꣳ सहस्त्रयोजनेऽव धन्वानि तन्मसि ।।59।।

उ. भा.- ये भूतानां प्राणिनामधिपतय ईश्वराः। विशिखासः विशिखा एव विशिखासः। सर्वमुण्डा इत्यर्थः। कपर्दिनः जटिलाः तेषामित्युक्तम् ।।59।।

श.भा.- ये भूतानां प्राणिनाम् अधिपतय ईश्वराः। विशिखासः विशिखाः। असुगागमः सर्वमुण्डाः। कपर्दिनो जटिलाः। तेषां धन्वानि धनूंषि ावतन्मसि अवतनुमः नमयामः।।59।।

ये पथां पथिरक्षय ऐलवृदा आयुर्युधः तेषां । तेषां

ꣳसहस्त्रयोजनेऽव धन्वानि तन्मसि ।।60।।

उ. भा.- ये पथाम् ये रुद्राः पयां मार्गाणाम् अधिपतय इति शेषः। ये च पथिरक्षयः पन्थां ये रक्षन्ति । एलवृदाः इलानामन्नानां समूह ऐलम् तत् ये विभ्रति ते एलभृतः सन्तोपि परोक्षृत्तिना शब्देन एलवृदा इत्युच्यन्ते। आयुर्युधः आयुजीवनं पणीकृत्य ये युध्यन्ति ते आयुर्युधः चौरादवो वा रुद्रा वा तेषामित्युक्तम् ।।60।।

श.भा- ये रुद्राः पथामधिपतयः मार्गाणामीश्वराः। ये च पथिरक्षयः पथां पलाकाः। इलानामन्नानां समूह ऐलं ये बिभ्रति ते ऐलभृतः सन्तोऽपि परोक्षवृत्तिना शब्देन ऐलबृदाः इत्युच्यन्ते। आयुर्युधः। आयुर्जीवनं पणीकृत्य युध्यन्ते आयुर्यधः। चौरादयो वा रुद्रा वा। तेषामित्यादि पूर्ववत् ।।

ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।

तेषांꣳसहस्त्रयोजनेऽव धन्वानि तन्मसि ।।61।।

उ.भा.- ये तीर्थानि । ये रुद्राः तीर्थानि प्रगदायप्रभृतीनि। प्रचरन्ति सृकाहस्ताः सृका इत्ययुधानाम। आयुदहम्ता निषद्विण; स्वद्रिनः1 तेषामिस्युक्तम् ।।

शं.भा- ये रुद्रास्तीर्थानि प्रयागभृतीनि.प्रचरन्ति-गच्छन्ति। सृकाहस्ताः आयुधवन्तः। सृका इत्यायुधनाम। निषङ्गिणः खङ्गिनः। तेषामित्यादि पूर्ववत् ।।61।।

येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।

तेषाꣳसहस्त्रयोजनेऽव धन्वानि तन्मसि ।।62।।

उ.भा.- येऽद्रेषु ये अग्रेषु अवस्थिताः विविध्यन्ति अतिशयेन विध्यन्ति ताद्वयन्ति। येषामधिकारः अन्नस्य भक्षयितारो व्याधिभिर्गृहीतच्या इति। पात्रेषु व्यवस्थिताः पियतो जनान् ये विविध्यन्ति तेषामित्युक्तम् ।।62।।

शं.भा- ये अन्नेष्ववस्थिताः विविध्यन्ति विशेषेण ताडयन्ति। अयमर्थः। येषामयमधिकारः अन्नस्य भक्षयितारो रोगादिभिर्गृहीतव्या इति ये च पात्रेष्ववस्थिताः सन्तः पिबतः जनान् विविध्यन्ति, तेषामिथ्यादि पूर्ववत् ।।62।।

य एतावन्तश्च भूया ꣳसश्च दिशो रुद्रा वितस्थिरे।

तेषाꣳसहस्त्रयोजनेऽव धन्वानि तन्मसि ।।63।।

उ.भा.- य एतावन्तश्र ये रुद्रा एतावन्तश्र भूयांसश्र बहुतराश्रोक्तेभ्यः। दिशः रुद्रा; वितस्थिरे विष्टन्य स्थिताः तेषामित्युक्तम् ।।63।।

शं.भा- ये एतावन्तः रुद्रा भूयांस उक्तेभ्योऽपि बहुतराः दिशः वितस्थिरे। विष्टभ्य स्थिताः। तेषामित्यादि पूर्ववत् ।।63।।

इत उत्तरं त्रिलोकस्थिता रुद्राः स्तूयन्ते—

नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दर्श प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो स्तु ते नोऽवन्तु तेनो मृडन्यन्तु ते यं द्वेष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।।64।।

उ.भा.- इत उत्तरं श्रीणि यजूंषि त्रिस्थानाश्च रुद्राः स्तूयन्ते । नमोऽस्तु। नमः अस्तु रुद्रेभ्य ये दिवि द्युलोके स्थिताः येषां रुद्राणां वपै वृष्टिः इषवः आयुधस्थानीयम् तेभ्यो रुद्रेभ्य; दृश प्राचीः अङ्गुलीः करोमि नमस्कारार्थम् इति सर्वत्र संवध्यते। दश दक्षिणा दश प्रतीक दक्ष उर्दशषचीदमः दम ऊध्वोः तेभ्यः नमः अस्तु ते नः अगनाय अचन्दु रक्षन्तु ते नः अस्मान् गृढयन्तु सुखयन्तु। ने तेषां रुद्राणां जम्भे मुखे दध्मः। यद्वा ते रुद्रा वयं च यं द्विष्म यश्च नः द्वेषि । तमेषां रुद्राणां जम्भे दध्मः। समञ्जसमेव सर्वम् ।।64।।

शं.भा- तेभ्यो रुद्रेभ्यो नमोऽस्तु। केभ्यः? ये दिवि द्युलोके स्थिता येवां रुद्राणां वर्षं वृष्टिः इषवः आयुधस्थानीयं, तेभ्यो रुद्रेभ्यो दशाङ्गुलोः प्राचीः करोमि नमस्तकारार्थमितियावत्। एवं दशाङ्गुलीः दक्षिणाः। दश प्रतीचीः दश उदीचीः। दश ऊद्र्ध्वाः। करोमीति सर्वत्र। तेभ्यो नमोस्तु। ते नः अस्मान् अवन्तु रक्षन्तु। मृडयन्तु सुखयन्तु। ते वयं च सन्तर्पितरुद्राः सन्तो यं पुरुषन्द्विष्मः यश्च नः अस्मान् द्वेष्टि तम् एतेषां रुद्राणां जम्भे मुखे दध्मः धारयामः।।64।।

नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दर्श प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु ते नऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।।65।।

म. ये अन्तरिक्षे रुद्रा वर्तन्ते तेभ्यो रुदेभ्यो नमोऽस्तु। येषां रुद्राणां बात इपव; वायुरायुधस्थानीयः कुवतेनानं विनाश्य वातरोगं वोत्पाद्य जनाघ्नन्ति। तेभ्योऽन्तरिक्षस्थेभ्यो वातेभ्यो रुदे्भ्यो नमोऽस्तु। शिष्टं व्याख्यातम् ।।65।।

श.भा- नमोऽस्तु येऽन्तरिक्षे येषां वात इषवः। तेभ्यो दश इति पूर्ववत् ।।65।।

नमोऽस्तु रुद्रेभ्यो ये पृथिव्या येषामन्नमिषवस्तभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोर्दचीर्दशोध्वास्तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो । मृड्यन्तु ते यं यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।।66।।

उ. द्वे कण्डिके उत्तार्थे ।।65।। 66।।

श.भा- नंमोऽस्तु रुद्रेभ्यो येषामन्नमिषवः। तेभ्यो दश इतिद्वयोः कण्डिकयोरुक्त एवार्थः।।66।।

इतिशतरुद्रजपे पञ्चमोऽध्यायः।।5।।

सोमसूक्तम्

इदानीं च यजनेन प्रसन्नो महादेवो मृत्युबन्धनान्मुक्तयेऽभ्यर्थ्यते- सकरुणानिधिर्भगवान् अस्मान् स्वाराधकान् उर्वारुकमिव बन्धनात् इव यथा उर्वारुकं=कर्कटी कर्कन्ध्वादेः फलमत्यन्तपक्वं सत्, बन्धनात् - स्वस्य, प्रसववृन्तात् अनायासेन प्रमुच्यते, तद्वत् निःसीम प्रणयप्रसादशालिभिस्सर्वापदुन्मूलिभिः कृपाकटाक्षैः मृत्यो : अविद्यात्कार्यसंसारलक्षणात् बन्धनात् मुक्षीय मोचयत्वित्यर्थः। अमृतात् = लौकिकपारलौकिकपारमार्थिकसुखरूपात् अभ्युदयनिः श्रेयसरूपफलद्वयात्, मा मुक्षीय मा मोचयतु = मा वियोजयत्वित्यर्थः। यद्वाऽहं महादेव-प्रसादात् मृत्योः मुक्षीय-मुक्ता भूयास्म, अमृतात् मोक्षसुखान्मा मुक्तो भूयासं, मम भ्रंशो माभूदित्यर्थः। ऋग्विधान नाम्नि ग्रंथे मृत्युंजयस्यास्य मन्त्रस्य लौकिकं-जपफलमाह-शौनकोमहर्षिः- "समुद्दिश्य महादेवं त्र्यम्बकं त्र्यम्बकेत्यृचा। एतत्पर्व शतं कृत्वा जीवेत् वर्षशतं सुखी।" इति।

याजक-सम्बन्धिन्यः कुमार्य्योऽपि पुरुषवदुत्तरेण त्र्यम्बकमिति मन्त्रेण तं रुद्रं परिचरन्ति। अतः इह पाठभेदोऽपि दृश्यते। यथा हि सुगन्धिं तं पतिवेदनं भर्तृलम्भयितारमित्यर्थः। तादृशं त्र्यम्बकं त्रिनेत्रधारिणं रुद्रं वयं याजकसम्बन्धिन्यः कुमार्यो यजामहे पूजयाम इत्यर्थः। किमर्थं पूजयामः? यतः इतः ज्ञाति वर्गात् अहं मुक्षीय, स मां मोचयतु। रुद्रप्रसादात् इतः मातृ-पितृ भ्रातृवर्गान्मुक्षीय मुक्षीमहि मुक्ताः भूयास्म इत्यर्थः। पितुर्गोत्रं गृहं च परित्यज्य भर्त्तुर्गोत्रे गृहे च वसाम" रुद्र प्रसादादिति। अर्थात् बन्धानात् मुक्ता भवेम। तत्रदृष्टान्तः। उर्व्वारुकमिव बन्धानादिति।

यथोर्वारुकं कर्कन्ध्वादेः फलमत्यन्तं पक्वं सत् बन्धानात् वृन्तात् अतिरिक्तो ज़ायते, न पुनः तेन सह युजयते, तथैव कर्कटीवत् अमुतो मा मुक्षीय विवाहानन्तरं भविष्यतः पत्युः सकाशान्मा मा मुक्ता भूयामस् । पितुर्गोत्रं कुलं, गृहं च विहाय पत्युर्कुले च सर्वदा त्र्यम्बक रुद्रप्रसादाद्वसाम। अमुतः पतिगृहान्मा मां मुक्षीय सा मा मां मोचयत्विति।

वयꣳसोम व्रते तव मनस्तनूषु विभ्रतः ।

प्रजावन्तः सचमेहि ॥1॥

उ.भा.- वयसोम। सौमीगायत्री जपे विनियुक्ता। हे सोम, वयं व्रते तव। व्रतमिति कर्मनाम। तव कर्मणि वर्तमानाः मनस्तनूपु शरीरेषु जाग्रस्त्वसुषुस्त्यादिकेषु। विभ्रतः धारयन्तः प्रजावन्तश्च सचेमहि सेवितव्यानि वस्तूनि।।1।।

श.भा- हे सोम! तव व्रते कर्मणि (निघं 2/1) पितृयज्ञे वर्त्तमाना वयं, तनूषु शरीरेषु जाग्रत्स्वप्नसुषुप्त्यादिषु अवस्थासु मनः बिभ्रतः धारयन्तः सचेमहि सेवेमहि "सेवितव्यानि वस्तूनी" ति शेषः।।1।।

एष ते रुद्र भागः सह स्वस्राऽम्बिकयां तं जुषस्व स्वाहैष ते रुद्र भाग आखुस्ते पशुः ॥57॥

उ.भा.- एष ते। रौद्रोयमनुवाकः त्रैयम्बकाः पुरोडाशास्त्र विनियुक्तः अवदानहोमे। एष ते तव हे रुद्र, भागः। सह स्वस्रा। स्वस्रेति भगिन्युच्यते। सह भगिन्या अम्बिकया तं भागं जुपस्व। स्वाहा सुहुतमस्तु। अतिरिक्त माखत्कर उपकिरति। एष ते तब रुद्र भागः। आखुर्मूषिका ते तव पशुः ।।2।।

श.भा- त्रैयम्बकाः पुरोडाशाः। तत्रावदानहोमेऽयं विनियुक्त;। हे रुद्र! एश ते तव भागः अंशः स्वस्रा भगिन्या अम्बिकया सह सहितस्तम् इममस्माभिर्दीयमानं स्वं भागं जुषस्व-सेवस्व। स्वाहा तत्सुहुतमस्तु। अतः परमाखूत्करं परिकिरति हे रुद्र! तव आखुः मूषकः पशुर्भागः।।

अव रुद्रमदीमह्यव देवं त्र्यम्बकम् । यथा नो वस्य सस्करद्यथा नः श्रेयसस्करद्यर्था नो व्यवसाययात् ॥3॥

उ.भा.- आगत्य जपति। अवरुद्रम् । द्वे पङ्क्तिकुभौ। भवयुह्य पृथक् कृत्वान्याभ्यो देवताभ्यो रुद्रन् अदीमहि। 'अव् भक्षणे' छान्दसो णिचो लोपः। रुद्रमादयामः भोजयामः। अवगम्य च तं ज्ञात्वा देवं त्र्यम्बकम् । तथाच भोजयामः। यथा नो वस्त्यसस्करत् येन प्रकारेणास्मान्त्रसीयसः कुर्यात् । 'वस निवासे' इत्यस्य तृजन्तस्य वस्तेति भवति। ततः 'तुश्छन्दसि' इति ईयसुनि कृते वसीयत इति भवति। तत इकारलोपे वस्यस इति भवति। वस्तृतरानिति पर्यायः । वसनशीलनित्यर्थः। तथा चास्मान् श्रेयसः प्रशख्यतरान् कुर्यात्। यथा

चास्मान् व्यवसाययात्। विपूर्वस्यावपूर्वस्य च 'पोन्तकर्मणि' इत्यस्य ण्यन्तस्य आशिपि लुङि सार्वधातुके यासुटि व्यवसाययादित्येतद्रूपं भवति। यथा चास्मान् सर्वकर्मणामन्तं प्रापयेदित्यर्थः।।3।।

श.भा- वयम्। अवयुत्य (पृथक्कृत्य) "अन्याभ्यो देवताभ्यः" इति शेषः रुद्रमदीमहि आदयाम भोजयाम, "अदभक्षणे" छान्दसो णिलोपः। तथाऽवगत्य ज्ञात्वा त्र्यम्बकमदीमहि यथा येन प्रकारेण स नोऽस्मान् वस्यसः वस्तृतमान् वसनशीलनकरत् कुर्यात्। "वसनिवासे" इत्यस्य तनि वस्तेति भवति। "तुश्छन्दसी" ति (पा0 6।4।154) तृनो लोपः। वसीयस इति प्राप्ते ईलोपश्छान्दसो भवति। एवं तथाऽऽदयामः। यथा च नः अस्मान् श्रेयसः प्रशस्यतरानकरत् - कुर्यात्। यथा च नः अस्मान् व्यवसाययात् विशेषेण कर्मणामन्तं नयेत् "षोऽन्तकर्मणी" त्यस्य (दि0प0) ण्यन्तस्य विपूर्वस्यावपूर्वस्य चाशिषि लिङ्। आर्द्धधातुके धातोरात्वे युकि रूपम्।।3।।

भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजम्। सुखं मेषाय मेष्यै ॥4॥

उ.भा.- भेषजमसि। हे रुद्र, यस्त्वं स्वभावत एव भेषजमौषधं भवसि सर्वप्राणिन। अतः प्रार्थ्यते देहि भेषजम्। गवे अश्वाय पुरषाय भेषजं देहि। सुखं देहि। सुहितं स्तेभ्यः प्राणेभ्यः इति सुखम्। मेषाय मेप्यै च।।4।।

श.भा- हे रुद्र! यतस्त्वं स्वभावत एव भेषजम् औषधमसि। सर्वप्राणिनां। हितकारी भवसि। अतः सम्प्रार्थये गवेऽश्वाय पुरुषाय भेषजं "देही"ति शेषः। मेषाय मेष्यै सुखन्देहि।।4।।

त्र्यम्बकं यजामहे सुगन्धि पुष्टिवर्धनम्। उर्वारुकमिव वन्धनामृत्योर्मुक्षीयं माऽमृतात्। त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम्। उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥5॥

त्र्यम्बकँय्यजामहे सुगन्धिम्पुष्टिवर्द्धनम्।
उर्व्वारुकमिव बन्धनान्मृत्त्योर्म्मुक्षीय॥
माऽमृतात् ॥५॥

श.भा- वयं त्र्यम्बकं शिवं यजामहे पूजयामः। सुगन्धिं दिव्यगन्धोपेतं मर्त्यदोषरहितं, पुष्टिवर्द्धनं पुष्टेर्धनधान्यादेर्वर्द्धयितारम्। अतः सोऽस्मान् मृत्योः सकाशात् मुक्षीय मोचयतु। पुरुषव्यत्ययश्छान्दसः। कस्मात्क इव? बन्धनाद् उर्वारुकमिव। उर्वारुः कर्कटीविशेषः। अनायासे दृष्टान्तः। माऽमृताद् अमृतान्मा मोचयतु।।5।।

कुमार्यो रूपवन्तं पतिं प्रार्थयन्ते—

उ. त्रयम्बकम्। द्वानुष्टभौ। यं वयं त्रयम्बकं यजामहे पूजयामः। सुगन्धिम्। 'गन्धस्येदुत्पूति–' इत्यादिना समासान्तः। पुष्टिवर्धनम् पोषस्य वर्धयितारम्। योऽस्मान् उर्वारुकमिव बन्धनात् उर्वारुकः फलयितारम्। योऽसन् उर्वारुकमिव बन्धनात्। उर्वारुकः फलविशेषः यथा

पक्क; स्ववन्धनाद्वियुज्यते एवं मृत्योर्मुक्षीय मोचय मोचयतु। पुरुषव्यत्ययश्छान्दसः। माऽमृतात्। मा कदाचित् अमृतात् मोचयतु। अग्नि त्रिः परियन्त्येन मन्त्रेण। कुमार्यश्चोत्तरेण परियन्ति। यं त्र्यम्बकं यजामहे शोभनगन्धम्। पतिवेदनम् भर्तृलम्भयितारम्। उर्वारुकमिव बन्धनात्। इतो सुक्षीय ज्ञातिवर्गान्मोचयतु। मामुतः पतिवर्गान्मोचयतु। 'सा यदि त इत्याह ज्ञातिभ्यस्तदाह मामुत इति पतिभ्यस्तदाह' इति श्रुतिः ।।6।।

श.भा- वयं त्र्यम्बकं शिवं यजामहे पूजयामः। किम्भूतं? सुगन्धिं दिव्यगन्धोपेतम्। पुनः किम्भूतं? पतिवेदनं पतिं वेदयतीति पतिवेदनस्तं भर्तृलम्भयितारमित्यर्थः, "विद्लृ लाभे" (रु030)। किम्प्रार्थयते ? इतः ज्ञातिवर्गाद् अहं मुक्षीय, स मां मोचयतु। बन्धनात् मुक्तां भवेयमिति। उर्वारुकमिवेति दृष्टान्तम्पूर्ववत्। अमुतः पतिस्थानान्मा मुक्षीय स मा मां मोचयतु इति।।6।।

एतत्ते रुद्राऽवसं तेन परो मूजवतोऽतीहि। अवततधन्वा पिनाकावसः कृत्तिवासा अहिꣳसन्नः शिवोऽतीहि ॥7॥

उ.भा.- त्र्यम्बकानासजति। एतत्ते रुद्र। एतत् ते तब हे रुद्र, अवसं पथ्यदानं शंबलम्। तेन पत्यदानेन परः परस्तात् । मूजवान्नामपर्वतः भगवतो रुद्रस्य वसतिः ताम्। अतीति गच्छ। कथंभूतो गच्छ। अवततंधन्वा अवतारितधनुः। पिनाकावसः पिनाको रुद्राङ्कुशः रुद्राकुशकृतकुशलः। कृत्तिवासाः चर्मवसनः। अहिंसक्षः अविनाशयन्नः अस्मान् शिव; शान्तो भूत्वा अतीहि पूजितं गच्छ ।।7।।

श.भा- रुद्रं यजति- हे रुद्र! एतत् तें तव अवसं हविःशेषाख्यं भोज्यम् । पथ्यदनम्। पाथेयम् "सम्बलश्चोच्यतेऽवसमिति" तेन अवसेन सम्बलेन परः परस्तात् मूजवतो नाम पर्वतात् त्वम् अतीहि गच्छ। मूजवन्नाम्नि पर्वते रुद्रः वसति। कथम्भूतो गच्छ? अवततधन्वा अवततं विस्तृतं धनुर्यस्य सोऽवततधन्वा अवरोपितधनुष्कः, पिनाकावसः विनाकैः कृतः अवसः आच्छादनं यस्य सः। विनाको रुद्रस्य धनुः सोंऽशुकेन कृतसंवरणः यथा भवेत्तथा गच्छेत्यर्थः। नः अस्मान् अनाशयन् शिवः भूत्वा अतीहि। हे शिव पूजितः सन् गच्छ। पुनरुक्ति स्त्वादरार्था।।7।।

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्।
यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम् ॥7॥

उ.भा.- यजमानो मुण्ड्यमानो जपति। त्र्यायुषम् । उष्णिक् । लिङ्गोक्ता देवता। त्रीण्यायूंषि समाहृतानि बाल्ययौवनस्थविराणि त्र्यायुषम् । यजमग्नेः त्र्यायुषम् यश कश्यपस्य यच देवेषु तननो अस्तु तदस्साकमस्तु भवतु। त्र्यायुषमित्याशीः ।।8।।

शा.भा- त्रीणि आयूंशि समाहृतानि त्र्यायुषं बल्ययौवनस्थाविराणि। तथा च यत् जमदग्नेः कश्यपस्य च त्र्यायुषं यच्च देवेषु त्र्यायुषं तत् नः अस्माकम् "अस्त्वित्याशोः प्रार्थनम्।।8।।

शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिसीः। निवर्तयाम्या-युषेऽन्नाद्याय प्रजननाय रायस्योषाय सुप्रजास्त्वाय सुवीर्याय ॥9॥

उ. लोऽक्षुरमादत्ते। शिवो नमासि। हे क्षुर, यतः स्वं शान्तनामासि। यस्य च तव स्वधिति पिता। स्वधितिः वज्रः। तस्मै नम; ते तुभ्यं भवतु। मा मां मा हिसीः मा विनाशय। वपति। निवर्तयामि। निपूर्वो वपतिरिह मुण्डनार्थः। मुण्डयामि त्वाम् । आयुरर्थम् अन्नाद्यर्थम् धनस्य पोषार्थम् शोभनापत्यतायै शोभनवीर्याय च ।।9।।

शा.भा- हे क्षुर! यः त्वं नाम नाम्ना शिवोऽसि। ते स्वधितिर्वज्रः पिता, तस्मैते नमोऽस्तु । हे भगवान् । मीमांसा हिंसीः मा नाशय। त्वया निवर्त्तयामि मुण्डयामि, निपूर्वो पृतिर्मुण्डने वर्तते, किमर्थम् ? आयुषे अन्नाद्याय अन्नाय तद् भिन्नाय च। यदा अन्नं च तदाद्यं चेति अन्नाद्यं तस्मै। प्रजननाय च प्रकृष्टजननाय रायस्पोषाय-रायोधनं तस्य पुष्ट्यै। सुप्रजास्त्वय-शोभनापत्यतायै सुवीर्याय शोभनवीर्याय।।9।।

परिशिष्टम्

सहायक ग्रन्थ सूचीः

1. अथर्ववेद- सपादक श्रीदामोदर सातवलेकर स्वाध्याय मंडल पारडी, 1958।
2. अथर्ववेद- श्रीराम शर्मा आचार्य, संस्कृति संस्थान, बरेली, 1996।
3. अथर्ववेद एवं गोपथ ब्राह्मण- संपादक-ब्लूम फील्ड़ व सूर्यकान्त, चौखम्बा संस्कृति सीरिज, वाराणसी- 1964।
4. अथर्व प्रातिशाख्य- सम्पादक- सूर्यकान्त मेहरचन्दलक्ष्मनदास दिल्ली- 1968।
5. अथर्ववेदपरिशिष्ट- संपादक रामकुमार राय, चौखम्बा ओरियंटलिया, वाराणसी।
6. आपतम्ब धर्मसूत्र- संपादक रामचंद्र शर्मा, सनातनधर्म प्रेस मुरादाबाद, 1987।
7. ईशादिनौ उपनिषद् - संपादक हरिकृष्णदास गोयनन्द, गीताप्रेस, गोरखपुर, सं- 2055।
8. ऋग्वेद संहिता वोल्यूम I, II संपादक- एफ. मैक्समूलर, चौखम्बा संस्कृत सीरिज, वाराणसी, 1966।
9. ऋग्वेद द्वितीय भाग- संपादक वसन्त श्रीपाद सातवलेकर स्वाध्याय मंडल पारडी, 1989।
10. ऐतरेय ब्राह्मण प्रथम-सम्पादक सुधाकर मालवीय तारा प्रिटिंग वर्क्स, वाराणसी- 1986।
11. ऐतरेय ब्राह्मण-द्वितीय सम्पादक सुधाकर मालवीय तारा प्रिटिंग वर्क्स, वाराणसी- 1987।
12. ऐतरेय आरण्यक- संपादक- आर्थर वेरिडेल कीथ, आक्सफोर्ड यूनिवसिटी प्रेस, लंदन, 1969।
13. जैमनीय अश्वमेधपर्व-संपादक-हनुमान प्रसाद पोद्दार गीताप्रेस, गोरखपुर।
14. छान्दोग्योपनिषद् - गीताप्रेस, गोरखपुर, संवत् 2055।
15. तैत्तिरीय संहिता- चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2000।
16. ताण्ड्य महाब्राह्मण प्रथम भाग -संपादक-ए0 चित्रस्वामी शास्त्री दि चौखम्बा संस्कृत सीरिज ऑफिस वाराणसी- 1935।

17. ताण्ड्य महाब्राह्मण द्वितीय भाग- संपादक-ए0 चिन्नस्वामी शास्त्री दि चौखम्बा संस्कृत सीरिज ऑफिस वाराणसी- 1936।
18. दि निघण्टु एंड दि निरुक्त - सम्पादक लक्ष्मण स्वरूप- पंजाब यूनिवसिटी ओरियंटल पब्लिकेशन लाहौर, 1926।
19. निरुक्त शास्त्रम् - संपादक- भगवद्दत्त, श्रीरामलाल कपूर ट्रस्ट, अमृतसर, संवत् 2021।
20. बृहदेवता- संपादक- उमेशचन्द्र पांडेय, चौखम्बा संस्कृत संस्थान, 2005।
21. बृहदारण्यकोपनिषद् - गीताप्रेस, गोरखपुर, संवत् - 2014।
22. मैत्रेयणी संहिता- श्रीपाद दामोदर सातवेलकर स्वाध्याय मंडल- 1998।
23. मनुस्मृति-संपादक चमनलाल गौतम संस्कृति संस्थान बरेली, 2000।
24. याज्ञवल्क्यस्मृति - संपादक उमेशचंद्रपाण्डेय चौखम्बा, वाराणसी- 1967
25. वाजसनेयि प्रातिशाख्य- संपादक-डॉ0 वीरेन्द्र कुमार वर्मा, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2001।
26. वाजसनेयि संहिता सम्पादक - अल्वर्ट बेवर.चौखम्बा संस्कृत सीरिज ऑफिस वाराणसी- 1972।
27. वाल्मीकि रामायण प्रथम एवं द्वितीय गीताप्रेस, गोरखपुर, संवत् 2053।
28. विदुरनीति ” ” ” 2043।
29. विष्णु पुराण- संपादक- श्रीमुनिलाल गुप्ता, संवत् 2043।
30. शतपथ ब्राह्मण (माध्यंदिन) संपादक-अल्वर्ट बेवर चौखम्बा संस्कृत सीरिज ऑफिस, वाराणसी 1964।
31. शतपथब्राह्मण सम्पादक- मोतीला शास्त्र राजस्थान पत्रिका, जयपुर।
32. शाखायन गृह्यसूत्र संपादक- एस.आर. सहगल, मुंशीराम मनोहरलाल दिल्ली- 1960।
33. सामवेद-संपादक श्रीरामशर्मा आचार्य, संस्कृति संस्थान, बरेली, 1996।
34. धर्मशास्त्र का इतिहास खण्ड तृतीय उत्तर प्रदेश हिन्दी संस्थान, लखनऊ, 1994।
35. गृह्यमंत्र एवं उनका विनियोग-कृष्णलाल नेशनल पब्लिशिंग हाउस दिल्ली, 1970
36. वैदिक.विज्ञान और भारतीय संस्कृति-गिरिधर शर्मा चतुर्वेदी, बिहार राष्ट्रभाषा परिषद्, पटना- 1972।

37. आपतम्ब कल्प में यज्ञविद्या- कुंवलाल जैन इतिहास, विद्या प्रकाशन दिल्ली- 1984।
38. वैदिक साहित्य का इतिहास- भारतीय विद्या प्रकाशन, दिल्ली 1978।
39. वैदिक क्रोनोलॉजी एण्ड वेदांग ज्योतिष-बाल गंगाधर तिलक मेसर्स तिलक ब्रदर्स गायकवाड़ा पुणा सिटी- 1925।
40. वेद विद्या निदर्शन- भगवदत्त, इतिहास प्रकाशन मंडल, दिल्ली 1959।
41. वैदिक एज- आर0सी0 मजूमदार, लंदन 1951।
42. वैदिक राजनीतिशास्त्र विश्वनाथ प्रसाद वर्मा, बिहार हिन्दी ग्रंन्थ अकादमी, पटना 1975।
43. वेदशास्त्र संग्रह विश्वबंधु साहित्य अकादमी, दिल्ली- 1966।
44. वैदिक संपत्ति-रघुनंदनलाल शर्मा, स्वाध्याय मंडल बड़ौदा, 2004।
45. वेदार्थ प्रवेशिका- संपूर्णानन्द भारतीय ज्ञानपीठ, वाराणसी, 1969।
46. वैदिक देवता- डॉ0 गयाचरण त्रिपाठी-भारती विद्या प्रकाशन, दिल्ली, 1982।
47. भारतीय संस्कृति का विकास (वैदिकधारा)- मंगलदेव शास्त्री काशी विद्यापीठ बनारस, 1956।

48. ऋग्वेद	-	विश्वेश्वरानन्द वैदिकशोध संस्थान, पंजाब ।
49. शुक्लयजुर्वेद संहिता	-	चौखम्बा संस्कृत संस्थान, वाराणसी ।
50. शुक्लयजुर्वेदकाण्व संहिता	-	स्वाध्याय मण्डल, पारड़ी ।
51. कृष्णयजुर्वेदतैत्तिरीय सहिता	-	,, ,, ,,
52. अथर्ववेद संहिता	-	,, ,, ,,
53. अथर्ववेद संह्तिा	-	,, ,, ,,
54. शतपथ ब्राह्मणम्	-	ज्ञान पब्लिशिंग हाउस, दिल्ली ।
55. तैत्तिरीयब्राह्मणम्	-	चौखम्बा संस्कृत सीरीज, वाराणसी ।
56. मैत्रायणी संहिता	-	स्वाध्याय मण्डल, पारड़ी ।
57. ताण्ड्यमहाब्राह्मणम्	-	चौखम्बा संस्कृत सीरिज, वाराणसी ।
58. मनुस्मृतिः	-	,, ,, ,, ,,
59. योगदर्शनम्	-	गीताप्रेस, गोरखपुर ।
60. वेद परिचयः	-	पं शिवशंकर झा, वाराणसी ।
61. वेदोदधिरत्नम्	-	डॉ. उपेन्द्र झा, दरभंगा ।
62. याज्ञवल्क्यस्मृतिः	-	चौखम्बा संस्कृत सीरिज, वाराणसी ।

63. मन्त्रार्थचन्द्रोदयः - पं. दामोदर झा, गिद्धौर ।
64. विदुरनीति - देहली पॉकेट बुक सेलर ।
65. चाणक्यनीति - देहली पॉकेट बुक सेलर ।
66. हितोपदेश - ,, ,, ,, ।
67. याज्ञवल्क्य शिक्षा - सं. अमरनाथ पशुपतीश्वर, काशी ।
68. पाणिनीय शिक्षा - चौखम्बा संस्कृत सीरिज, वाराणसी ।
69. पाराशरी शिक्षा - चौखम्बा संस्कृत सीरीज, वाराणसी ।
70. माण्डूकीय शिक्षा - दरियागंज, नई दिल्ली ।
71. वेदस्य व्यावहारिकत्वम् - डॉ. ज्योत्स्ना, चौखम्बा विश्व भारती, वाराणसी।
72. पातंजल योगप्रदीप - ओमानंद तीर्थ, गीताप्रेस, गोरखपुर ।
73. महाभारतम् - गीताप्रेस, गोरखपुर ।
74. रामचरितमानस - गीताप्रेस, गोरखपुर ।
75. श्रीमद्भागवतम् - गीताप्रेस, गोरखपुर ।
76. श्रीमद्भगवद्गीता - गीताप्रेस, गोरखपुर ।
77. वैदिक विज्ञानम् - गिरधर शर्मा चतुर्वेदी, दिल्ली ।
78. वैदिक साहित्य एवं संस्कृति - शारदा संस्थान, वाराणसी ।
79. तैत्तिरीयोपनिषद् - मोतीलाल बनारसी दास, दिल्ली ।
80. वैदिक गणित - मोतीलाल बनारसी दास, दिल्ली ।
81. छान्दोग्योपनिषत् - मोतीलाल बनारसी दास, दिल्ली ।
82. मीमांसासूत्रम् - संस्कृति संस्थान, बरेली ।
83. दिव्यज्योतिः - भारती विहार, शिमला ।
84. स्कन्द पुराणम् - संस्कृति संस्थान, बरेली।
85. वैदिक विज्ञान एवं भारतीय संस्कृति - बिहार राष्ट्रभाषा परिषद, पटना।
86. पुराण परिशीलन - बिहार राष्ट्रभाषा परिषद, पटना।
87. गुह्यसमाजतन्त्रम् - मिथिला शोध संस्थान, दरभंगा।
88. सांख्ययोगदर्शनम् - संपादित-गोस्वामी दामोदर शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी ।

89. भारत के योगी - संस्कृति संस्थान, बरेली।
90. योग - राधाकृष्ण नेवटिया, सर्वसेवा संघ, वाराणसी।
91. घेरण्ड संहिता - डॉ. चमनलाल गौतम, संस्कृति संस्थान, बरेली।
92. अष्टांग योग सिद्धि - ,, ,, ,,
93. गोरक्ष संहिता - ,, ,, ,,
94. शिवसंहिता - ,, ,, ,,
95. हठयोग प्रदीपिका - ,, ,, ,,
96. योगनिद्रा - स्वामी सत्यानंद सरस्वती, बिहार योग विद्यालय, मुंमेर।
97. कुण्डलिनी योग - स्वामी सत्यानंद सरस्वती, बि. योग वि. मुंगेर।
98. आसन प्राणायाम मुद्राबंध - ,, ,, ,, ,,
99. योग एवं शारीरिक शिक्षा - ,, ,, ,, ,,
100. सस्कृत निबंध रत्नाकर - डॉ. राजकिशोर सिंह, प्रकाशन केन्द्र, लखनऊ
101. वैदिक योगसूत्र - पं. हरिशंकर जोशी, चौखम्बा संस्कृत सीरिज,
102. ईशादिदशोपनिषद्-शांकर भाष्य - मोतीलाल बनारसी दास, दिल्ली ।
103. मन्त्रोपनिषदतकम् - स्वामी महेश्वरानंद गिरि, बंबई ।
104. चतुर्वेदभाष्य भूमिका - पं. बलदेव उपाध्याय, वाराणसी ।
105. वैदिक वाङ्मग्यस्येतिहास - श्री जगदीशचन्द्र मिश्र, वाराणसी ।
106. स्वामी विवेकानंद जीवनी - स्वामी अपूर्वानन्द, नागपुर ।
107. वेदशास्त्र संग्रहः - विश्वबन्धु-साहित्य अकादमी, दिल्ली।
108. बौद्धर्मदर्शन - आचार्य नरेन्द्र देव, बिहार राष्ट्रभाषा परिषद्, पटना।
109. बौद्धधर्मदर्शन - आचार्य नरेन्द्र देव, बिहार राष्ट्रभाषा परिषद् पटना।
110. भारतीय संस्कृति और साधना - गोपीनाथ कविराज, बि.राप., पटना।

111. तांत्रिक वांग्मय में शाक्त दृष्टि - गोपीनाथ कविराज, वि.रा.प्र., पटना।

112. शैवमत - डॉ. यदुवंशी, बिं.रा.प. पटना।

113. भारतीय प्रतीक विद्या - डॉ. जनार्दन मिश्र, बि. एस. प. पटना।

114. षड्दर्शन रहंस्य - पं. रंगनाथ पाठक, बि रा प. पटना।

115. विश्वधर्मदर्शन - पं. रंगनाथ पाठक,, बि. रा. प., पटना।

116. तन्त्र कल्पतरु - रमादत्त शुक्ल, शाक्त साधना पीठ, प्रयाग।

117. षट्चक्रनिरूपणम् - हंसस्वरूप स्वामीं, कलकत्ता ।

118. निरुक्तम् - म. म. मुकुन्द झा बख्शी, मेहरचन्द लक्ष्मण दास, दिल्ली

119. ब्रह्मविज्ञान प्रवेशिका -

120. अहोरात्रवादः -

121. रजोवादः - म. म. मधुसूदन विद्यावाचस्पति, जयपुर।

122. इन्द्रविजयः -

123. यज्ञमधुसूदन -

124. बृहद्देवता (शौनकीया)

125. आध्यात्म रामायणम् - गीता प्रेस, गोरखपुर ।

126. व्याख्यानपंचक - पं. मोतीलाल शर्मा, जयपुर ।

127. वेदा रहस्य - द्वारा टी. ए. बमवाले, वाराणसी ।

128. विजन इन लौंग डार्कनेस - भी. एस. अग्रवाले, वाराणसी ।

129. वेदरश्मि - वा. श. अग्रवाल, पारड़ी, गुजरात ।

130. ईशादि नौ उपनिषद - गीता प्रेस, गोरखपुर ।

131. स्वामी सत्यानंद - योग स्वर्ण जयंती स्मारिका, जबलपुर, 1994

132. कल्याण पुराणांक - गीता प्रेस, गोरखपुर ।

133. संस्कृत मंजरी - दिल्ली संस्कृत अकादमी।

134. दूर्वा - मध्यप्रदेश संस्कृत अकादमी, भोपाल।

135. दिव्यज्योतिः - शिमला ।

136. शोधप्रभा - दिल्ली ।

137. संस्कृतामृतम् - दिल्ली ।

138. संस्कृतामृतम् - दिल्ली ।
139. संभाषण सन्देश; - बंगलौर ।
140. पांचजन्य - दिल्ली ।
141. कादम्बिनी तंत्र विशेषांक - दिल्ली ।
142. महाभाष्य - चौखम्भा संस्कृतसीरिज, वाराणसी।
143. जैमिनीय न्यायमाला - ,, ,, ,,
144. काठक संहिता
145. शारदा तिलक
146. अपराजितपृच्छा
147. सिद्धान्त कौमुदी ।
148. शुक्लयजुर्वेद संहिता - चौखम्बा विद्याभवन, वाराणसी- 2007
149. श्लोक वार्तिक ।
150. ऋग्वेदभाष्य भूमिका
151. कात्यायन श्रौतसूत्र
152. ब्रह्माण्ड पुराण ।
153. कुर्मपुराण
154. अमरकोश
155. विष्णु पुराण
156. योगवासिष्ठ
157. दुर्गासप्तशती
158. योगतारावली
159. चरक संहिता
160. गोरखबानी
161. महार्थमंजरी :
162. योगबीजः
163. नायसिद्धो की बानियाँ
164. हरिलीलामृतम्
165. स्वामिनारायण वाचनामृत ।
166. योगभेदद्वात्रिंशिका

167. तत्वार्थ सूत्रम्
168. हैमयोगशास्त्रम्
169. पद्मावत्
170. सिद्धसिद्धान्तपद्धति
171. प्रेमप्रकाश; शाह वरकतुल्ला
172. वैशेषिक दर्शनम्
173. तर्कभाषा
174. सांख्यसूत्रम्
175. विवेक चूड़ामणि
176. विवेक विलासः
177. वेदरश्मि कला प्रकाशन, वाराणसी- 2012
178. वेदपारिजात, कला प्रकाशन, वाराणसी- 2011
179. संस्कृत शिक्षण, कला प्रकाशन, वाराणसी- 2013
180. वैदिकम् योगविज्ञानम्, कला प्रकाशन, वाराणसी- 2013
181. यजुर्वेदीय संस्कार सौरभम्, कला प्रकाशन, वाराणसी- 2013
182. श्रौतदृष्ट्यारुद्रस्य स्थिति :, कला प्रकाशन, वाराणसी- 2007
183. मन्त्रार्थदीपिका चौखम्बा संस्कृत सीरिज, आफिस, वाराणसी, 1967।

उद्धरण-ग्रंथ-संकेत-सूचीः

क्र.सं.	ग्रन्थ का नाम	ग्रन्थ संकेताः
1	2	3
1.	शुक्लयजुर्वेद संहिता	शु. य. सं.
2.	ऋग्वेद संहिता	ऋग्. सं.
3.	सामवेद संहिता	साम. सं.
4.	अथर्ववेद संहिता	अथर्व. सं.
5.	तैत्तिरीय संहिता	तै. सं.
6.	शतपथ ब्राह्मणम्	शत. ब्रा.
7.	ताण्ड्य ब्राह्मणम्	ताण्ड्. ब्रा.
8.	तैत्तिरीय ब्राह्मणम्	तै. ब्रा.
9.	गोपथ ब्राह्मणम्	गोपथ. ब्रा.
10.	ऐतरेय ब्राह्मणम्	ऐ. ब्रा.
11.	तैत्तिरीयाख्यकम्	तै आ.
12.	ऐतरेयारण्यकम्	ऐ आ.
13.	बृहदारण्यकोपनिषद्	बृहद्. उ.
14.	तैत्तिरीयोपनिषद्	तै. उ.
15.	छान्दोग्योपनिषद	छान्द. उ.
16.	कठोपनिषद्	कठो. उ.
17.	कौषीतकीयोपनिषद्	कौ. उ.
18.	श्वेताश्वत्तरोपनिषद्	श्वे. उ.
19.	काठकोपनिषद्	काठ. उ.
20.	निरूक्तम्	नि.
21.	ऋग्वेद भाष्य-भूमिका	अथर्व. भा. भू.
22.	मनुस्मृतिः	म. स्मृ.
23.	याज्ञवल्क्यस्मृतिः	या. स्मृ.
24.	पाणिनीय शिक्षा	पा. शि.

25.	भाण्डकोपनिषद्	माण्ड. उ.
26.	कात्यायन श्रौतसूत्रम्	का श्रौ.
27.	जैमिनीय न्यायमाला	जै न्याय.
28.	सिद्धान्त कौमुदी	सि. कौ.
29.	पातंजल महाभाष्यम्	पा महा.
30.	विदुरनीतिः	वि. नी.
31.	पाणिनीय अष्टाध्यायी	पा. अ.
32.	मीमांसा सूत्रम्	मी. सू.
33.	निघण्टुः	निघ.
34.	दयानन्द भाष्यम्	दया. मा.
35.	वेदों का यथार्थ स्वरूपम्	वे का. द. स्व.
36.	सांख्यदर्शन	सां. द.
37.	योगदर्शनम्	यो. द.
38.	श्रीमद् भगवद्गीता	गीता.
39.	बाल्मीकीयं रामायणम्	वा. रा.
40.	मनोविज्ञान मीमांसा	म. विं. मी.
41.	अभिज्ञान शाकुन्तलम्	अभि. शा.
42.	रघुवंशम्	रघु.
43.	कुारसंभवम्	कु. सं.
44.	मेघदूतम्	मेघ.दूत.
45.	नीतिशास्त्रम्	नी. शा.
46.	विचारपीयूषः	वि. पी.
47.	महाभारतम्	म. भा.
48.	प्रारंभिक मनोविज्ञानम्	प्रा. मनो.
49.	विकासात्मक मनोविज्ञानम्	वि. मनो.
50.	अमरकोशः	30 कोश
51.	वैदिक विज्ञान और भारतीय संस्कृति	वै.वि. औ. भा.सं.
52.	मैत्रायणी संहिता	मै. सं.

53.	वेदस्य व्यावहारिकत्वम्	वे व्या.
54.	विश्वमनीषा	वि. म.
55.	शोथ प्रभा	शोध. प्र.
56.	शिक्षा मनोविज्ञान	शि. मनो.
57.	संस्कृत संजीवनम्	सं.सं.
58.	दिव्य-ज्योति	दि. ज्यो.
59.	वेदोमे मनोविज्ञान	वे. में मनो.
60.	वेद-परिचय	वे. परि.
61.	याज्ञवल्क्य शिक्षा	या. शि.
62.	योगदर्शन	योग. दर्श.
63.	शत्रुधन भाष्य	श.भा.
64.	उवट भाष्य	उ.भा.

लेखकपरिचयः -

नाम - **डॉ. धीरेन्द्र झा**
क्षेत्रीय संस्कृत शिक्षण प्रमुख
विद्याभारती, बिहार।

पिता का नाम - डॉ. उपेन्द्र झा

जन्म स्थान - ग्राम-बहरवन बेलाही, जिला-मधुबनी, बिहार।

शिक्षा - वेदाचार्य, शिक्षाशास्त्री, एम.ए. संस्कृत विद्यावारिधि (पी.एच.डी.)।

विशेष अभिरुचि- लेखन, भाषण, अध्ययन, अध्यापन, शोधमार्गदर्शन।

शोध विषय - वैदिकम् योगविज्ञानम्

प्रकाशित पुस्तकें - संस्कृतामृतम्, संस्कृत संभाषणम्, वेद पारिजात, शुक्लयजुर्वेदसंहिता की मातृमोदिनी हिन्दी व्याख्या (प्रथम से तृतीय अध्याय तक), वेदरश्मि, वैदिकम् योगविज्ञानम्, याज्ञवल्क्यशिक्षा-पार्वती हिन्दी भाष्य संवलिता, संस्कृत शिक्षण, युगप्रवर्तक स्वामी विवेकानन्द, विश्वविजयी विवेकानन्द, संस्कार पारिजात।

अप्रकाशित ग्रन्थ (यंत्रस्थ) - सोमयाग पद्धतिः, नारदीय शिक्षा-एक समलोचना, भाषा विज्ञान शतकम् कवि विमर्शः, वेदमञ्जरी, वेदश्रीः साहित्यमंजरी प्राची (संस्कृत काव्य संग्रहः) आख्या (संस्कृतगेय काव्यम्) वैदिककालीन शिक्षा पद्धति विमर्श।

पुरस्कार लाभ -

- 1999 में अमेरिकन बायोग्राफिकल इंस्टीच्यूट द्वारा विशिष्ट साहित्यिक योगदान हेतु "मैन ऑफ द ईयर" पुरस्कार प्राप्त।
- 2000 ई. शिक्षा के क्षेत्र में योगदान हेतु "मैन ऑफ द मिलेनियम" पुरस्कार अमेरिकन बॉयोग्राफिकल इंस्टीच्यूट द्वारा प्राप्त।
- श्री गुरु गंगेश्वरानंद राष्ट्रीय वेद वेदांग पुरस्कार से 2009 में सम्मानित किया गया।
- भाऊराव देवरस सेवा न्यास लखनऊ द्वारा वर्ष 2010-11 का 16वां पं प्रतापनारायण मिश्र युवा साहित्यकार पुरस्कार संस्कृत भाषा में योगदान हेतु प्रदत्त।
- बिहार हिन्दी साहित्य सम्मेलन पटना द्वारा 2016 में "पं. जनार्दन झा द्विज" सम्मान से अंलकृत किया गया।

कला-प्रकाशन

बी. 33/33-ए-1, न्यू साकेत कालोनी
बी. एच. यू., वाराणसी-5

ISBN - 978-93-87199-42-2

ISBN - 978-93-87199-42-2

मूल्य : 650.00 रुपये